पंचामृतानां स्नपनैः सुगंधस्नपनैरपि ॥ देवार्थमुखवासैश्च देवोद्यानैरनेकशः ॥ २१ ॥ महापूजार्थमाल्यादि गुंफनार्थैः
स्त्रिकाळतः ॥ शंखभेरिमृदंगादिवाद्यनादैः शिवाळये ॥ २२ ॥ घंटामडुर्ककुंभादिस्नानोपस्कर भाजनैः ॥ श्वेतैर्मार्ज्ज
नवस्त्रैश्च सुगंधैर्यक्षकर्दमैः ॥ २३ ॥ जपहोमैः स्तोत्रपाठैः शिववृत्तामोच्चभाषणैः ॥ रासक्रीडादिसंयुक्तैश्चलनैः स
प्रदक्षिणैः ॥ २४ ॥ एवमादिभिरुद्दंडैः क्रियाकांडैरनेकशः ॥ पंचरात्रमुपि त्वातु कृत्वातीर्थान्यनेकशः ॥ २५ ॥ छ

कंकोळकैः कर्पूरागरुकस्तूरिकंकोळैर्यक्षकर्दममित्यमरः ॥ क्रियासमुद्वैरित्ति एवमादिभिरित्ति उद्दंडैर्नानाप्रकारैः क्रियाकांडैः कर्मकांडप्रति
पादितैः कर्मभिरित्यर्थः ॥ यद्वा क्रियाकांडैः क्रियासमूहैरित्यर्थः ॥ २५ ॥ छ ।
उपसंहरति ॥ सः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

73

पंचरात्रमुषित्वेति पंचरात्रेण मावृत्काळात्रवतिता वं तं काळं स्थित्वेत्यर्थः॥ यद्वा काश्यां रात्रिदिनविभागस्य दिविषु सूर्याचंद्राभ्यां विनै
वेश्वरेणाकृतत्वात् यथा सूत्रण पार्थः॥ ता स्यां दिनरात्रिविभागवती तिस्त्र भूमयं काशी तिष्ठती लिप्रती लिवक्ष्यते वभुनव यस्मिन्धोन्नतैः
सर्वस्मिन् जगति भयदुते पि काशीस्थानां भयद्वर्णणा स्नावा देवागमनं तीर्थवा सार्थि संतर्पणादिक सर्वं संगच्छते॥ तथा नैव स

८।२

॥ ३८ ॥ दीनानाथीं असंतर्पीनत्वा विश्वेश्वरं प्रभु॥ ब्रह्मचर्यादिनियमैस्तीर्थमेवं प्रसाध्य वा॥ २६॥ पुनः पुन ॥ ३८ ॥
र्विश्वनाथं दृष्ट्वास्तुत्वा प्रणम्य च॥ जग्मुः परोपकारार्थं मगस्तिर्यत्र तिष्ठति॥ २७॥ स्वनाम्ना लिंग
मास्थाप्य कुंडं कृत्वा तदग्रतः॥ ज्ञानरूढिय स्थितेन जपन्निश्चळमानसः॥ ॥ ॥ २८॥ घ।

तेषु १ र्थीपत्निः॥ तेषां स्तुत्वेषुवीरेषु वकंपे भुवनत्रयं॥ दुर्वाससश्च कोपाग्निज्वालास्त्रियाकुंठिकृतं॥ तदा विविशतुः काश्यां सूर्याचंद्रम
सावपि॥ न गच्छेरक्ततानुदेशौ तत्तेजः शामितप्रभावित॥ अनेकशा आवृत्त्यावृत्य वक्रवारानि सर्थः॥ अगस्तिरिति॥ अगस्तिः स्या
दगस्त्याश्वेति वृक्षस्थेष्वपि॥ ॥ २९॥ ॥
छक्षरकोशांतोपि॥ १

द्वादका १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पि ७

तं दृष्ट्वेति ग्रथमतस्तमगस्त्यं दूरतो दृष्ट्वा पश्चात्स्त्रीवर्णणादेवा मुनेरुटजं प्रांगणं दृदृशुरिति द्विसप्ततिश्लोके नान्वयः ।। आगम्याष्टत्रिंशात्श्लोक
स्थितइतिशब्दपरामृष्टं कर्माहुः ।। साक्षादित्यादि ।। तत्र तत्र रएणमुनेरुत्प्रेक्षा अवशिष्टेनाश्रमस्थ पशुपक्ष्यादिवर्णनमिति विवेक्तव्यं ।।
सतां मनः सन्मनः ।। चपला विद्युत् ।। तडित्सौदामिनी विद्युच्चंचला चपलेत्यमरः ।। चपलचंचला अस्थिरेति यावत् ।। ३२ ।। हिंस्त्रैः

तं दृष्ट्वा दूरतो देवा द्वितीयमिव भास्करं ।। ज्वलज्ज्वलनसंकाशैरंगैः सर्वत्र सोज्ज्वलं ।। २९ ।। साक्षात्किं वडवाग्निर्वा मूर्त्तो वै
तपते तपः ।। स्वच्छां तुं विनिश्चलतमं निर्मलं सन्मनो यथा ।। ३० ।। अथवा सर्वतेजांसि त्रिदिवे मां ब्राह्मणीं तनुं ।। शीलयं
तिपरंधाम शांतं शांतपदाश्रये ।। ३१ ।। तपनस्तप्यते त्स्यर्थं दहनोपि न दह्यते ।। यन्नीव्रतपसाधापि चपलाचपलायते ।।
३२ ।। अस्याश्रमे घटृश्यंते हिंस्त्रा अपि समंततः ।। सत्वरूपा श्रमी सत्वास्त्यक्तवैरं स्वभावजं ।। ३३ ।। कुंडादंडेन किरिटः सिं
हं कंडूयते मृगः ।। अश्मपदांकेष्वपि त्रिकेस रीके सरोरुहः ।। ० ० ० ० ० ० ० ० ० ० ० ० ० ० ३९ ।।
ह्रैः ।। सत्वरूपाः सात्विकाः सत्वगुणप्रधानाइत्यर्थः ।। स्वभावजं साहजिकं वैरं त्यक्तुरित्यर्थः ।। ।। ३३ ।। रामायनमः ।। नारायनमः ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

75

निपातना २

करटः प्रशस्तगंडो॰ यस्यास्ती तिकरटिर्हस्ती घांदस्स वांसाधुत्वं॥ कांके स्यगंडोकरटोगजगंडकरटीकयावितिद्वादशसाहस्री॥ करटोगजगंडे

स्यात् कुसुंभे निंघशिवनइतिमेदिनी॥ कारः॥ अष्टापदः शरभः॥ अष्टापदः स्याल्कनके सारीणाफलकेपिच॥ अष्टापदस्तु शरभेवं स्याद्धु २

द्रुर्मस्याव मर्कटइति॥ विग्रुप्रकारः॥ नस्यांके क्रोडकेसरी सिंहः॥ सिंहो मृगेंद्रः पंचास्यहर्यक्षः केसरीहरिरित्यमरः॥ किंशुकः केसर

द्रुटः॥ केसरैः स्कंधस्थैः लोमविशेषैः किंजल्के केसरः पुष्पस्तुरोमविशेषयोरितिमेदिनीकारः॥ उक्ष्टत्वन्द्वः॥३४॥ सूकरो वाराहस्त पुः ब २

॥ ३९॥

शुंडादंडेन करीटिं सिंहं कंडूयते भृग्यः॥ अष्टापदांके स्वपिति केसरी केसरोद्भटः॥३४॥ सूकरस्तब्ध

रोमापि विहाय निजपृष्ठपं॥ वराहनस्तु नामध्येमुस्तान्यस्तेक्षणोबद्दी॥ ३५॥॥ राम नाम नाम

॥ ३९॥

रोमेतितस्य विशेषणं अतिरूरतयास्तब्धा॥ निठन्नमितानिरोमाणि यस्य सतथा॥ तथाविधोपी त्यत्तोनपोनलक्षणं नस्थानोत्तयाधाः सुराण्य

भगाः स्थान इतिवामुस्तामुकुरुविल्वेषुकुरुविल्वोमेघनादनामामुस्तकमस्त्रियामित्यमरः॥ मोथइति प्रसिद्धा उन्मुस्ते दत्तेईक्षणोबद्धेयेन समसा॥ ३९॥

मुस्ताकं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनं पृथ्वीं दारयतीति भूदारः। सूकरस्तथा विघोंयथान्यत्र भूविदारं करोतीति॥ अत्र न करोतीत्यर्थः॥ तत्र हेतुमाह सर्वालिंगमयीति॥
३६॥ क्रोडपोतं भूकरस्यावं वराहः सूकरो घृष्टिः कोल: पोत्री किरिः किटिः। दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपीत्यमरः॥ त
रक्षुर्मृगाद .. नः॥ तरक्षुस्तु मृगादन इत्यमरः॥ शार्दूलबाला न्याघ्रशावकाननुसार्य्य दूरीकृत्य शार्दूली व्याघ्री

भूदारोपि च भूदारं तथा कुर्यो घयथान्यतः॥ सर्वालिंगमयीकाशीपतस्तद्वीतियंत्रितः॥३६॥ क्रोडी
त्यक्रोडपोतं तरक्षुः क्रीडयत्सहो॥ शार्दूलबालाननुत्सार्य्य शार्दूली मेणपोतकः॥३७॥ चल
त्पुच्छो घपिबति फेनिलेनाननेनवै॥ स्वपंतं लोमशं भल्लुं वानरश्चलदंगुलिः॥३८॥ ॥ ॥ ॥

मेणपोतकः हरिणबालकः दयायाँ॥३७॥ चलत्पुच्छं पस्यसः॥ तथा पिबतिपय इति शेषः॥ पिबतिरत्र द्विकर्म्मकः लक्षणया चश
र्दूल्यास्तनं पिबतीत्यर्थः॥ फेनिलेनाननेन फेनयुक्तेन मुखेन॥ स्वपंतं शयानं भल्लुं ऋक्षं अथ भल्लुके॥ ऋक्षाच्छभल्लभ
ल्लूका इत्यमरः॥ कथंभूतं लोमशं बहुलोमयुक्तं॥३८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अनुकंपायांच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूका लिक्षा॥ लिक्षा पूका कीटभेदा लिक्षा तु स्याद् युका मयेति मालती॥ समावीक्ष्ययेन नाग्रेण संबंधः॥ दंतकोटिभिर्दंताग्रैर्भक्षयेत्॥ अत्र साहजिकेनेराभावस्य विवक्षितत्वात् घूकाभक्षणं दोषावहं यदा मत्ता नामेव यूकानां भक्षणम त्र विवक्षितं॥ अत एव संवीक्ष्य वीक्ष्येत्युक्तं॥ यद्वा लक्षणया अंगुलीभिर्विचार्य्य संवीक्ष्य वीक्ष्य दंतकोटिभिर्दूरीकरोतीत्यर्थः॥ अथवा वानरजातिस्वभावत्वात् इक्षये दिवेत्यर्थः॥

॥ ५० ॥ यूकाः संवीक्ष्य वीक्ष्येव भक्षयेद्दंतकोटिभिः॥ गोलांगूलास्तु रक्तमुखा नीलांगा यूथनायकाः॥ ७ ॥ जातिस्वभावमात्स्यर्य्यस्त्वेकेकत्र रमंति च॥ रात्रगाः क्रौडंति च बहुकैस्तैः पृष्ठलुंठनैर्मुहुः॥ ४० ॥ आखुभुक् आखुभुजः कूर्णं कंडूयते चलाननः॥ मयूरपुच्छपुच्छो निद्रालुर्लुः सुखाधिकं॥ ४१ ॥ स्वकंठं घर्षयत्येव केकिकंठे भुजंगमैः॥ भुजंगमफणापृष्ठेन कुलः स्वकुलोचितं॥ ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गोलांगूलाः कपिविशेषाः तेषां विशेषणं॥ रक्तमुखा नीलांगा इति च॥ स्वतंत्रा इति वा॥ ३९॥ रात्रगाः मृगविशेषाः तैः प्रसिद्धैः तैः इति पाठेपि स एवार्थः॥ ४०॥ आखुभुग्जो मार्ज्जारः ओतुर्विडालः ओतुर्विडालो मार्ज्जारो वृषदंशक आखुभुगित्यमरः॥ ४१॥ केकिकंठे मयूरग्रीवायां पृष्ठलुंठनैः पृष्ठ संघर्षणैः सटा फणा सटायां तु फणा द्वयोरित्यमरः॥ ४२॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मकरमंडालकः। शबरो नामाद्दृष्टो कुत्रेह्न लोकिर्दुऊ गोवासमितिद्ह: ३

लुठन्क्रीडेत् । उत्प्लुत्योत्प्लुत्य उत्फाल्योत्फाल्य लीलया अवज्ञया ॥४३॥ भयमगणयित्वैवेत्यन्वयः ॥ क्षुधां बुभुक्षयार्त्तः ॥ पीडित इति याव
त् क्षुधां ध इति पाठे पि स एवार्थः ॥ कारुण्यपूर्णहृत् । करुणया पूर्णा प्रज्ञानः ॥४४॥ अहो आश्चर्ये हर्षे वा ॥४५॥ उद्दंडकोदंडमत्यूर्जित मात्सर्यः ३
चापं ॥ अथास्त्रियौ धनुश्चापौ । धनुः शरासनं कोदंडकार्मुकमित्यमरः ॥ शांबरं भिल्लं शबरो नामाम्लेच्छ ॥४६॥ दृष्ट्वा दृप्ता नि

वैरं परित्यज्य लुठन्प्लुत्योत्प्लुत्य लीलया ॥ अलोक्य मूषकं सर्पोप्यवरतं च बदनाजतः ॥४३॥ क्षुधार्तोपि न गृ
ह्णाति सोपि तस्माद्विपेतिन ॥ प्रसूयमानां हरिणीं दृष्ट्वा कारुण्यपूर्णहृत् ॥४४॥ तद्दृष्टिपातं मुंचन्वे
व्याघ्रो हरं व्रजत्यहो ॥ व्याघ्री याश्चस्य चरितं मृगीमगाविचेष्टितं ॥४५॥ उभे कथ्यं यतान्योन्यं सख्या
विवमुदान्विते ॥ दृष्ट्वाप्युद्दंडकोदंडं शांबरं शांबरो मृगः ॥४६॥ दृष्टेन वर्त्मस्यजति सोपिकं द्रूयते च
तं ॥ रोहितोरण्यमहिषमुद्धर्षति निराकुलः ॥४७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

लुज्जोगास शांबरो मृगादनोपीत्यर्थः ॥ रोहितो मृगावांतरजातिः ॥ कृष्णसाररुरुन्यंकुरंकुशंबररौहिषाः ॥ गोकर्णपृषतैणर्ष्य
रोहितश्चमरो मृगा इत्यमरः ॥ उद्धर्षति संस्पृशति संलुठति न गणयतीत्यर्थः ॥ उद्धर्षतीति वा पाठः ॥ निराकुलः निःशंकः ॥४७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥०रघु०टी०॥

चमरी चमरमृगविशेषस्य पत्नी शबरी शबरांगना चंडाल विशेषस्त्री॥ भेदाः किरात शबर पुलिंदा म्लेच्छजातय इत्यमरः॥ तस्याः केशैः स्वबा ळधिस्वीयं बाळहस्तं लांगुलमिति यावत्॥ वल्लिहस्त लक्ष्मबालधिरित्यमरः॥ संमिमीते परिमिनोति॥ गवयो मृगेंद्र विशेषः॥ गंधर्वः शरभो रामः सृमरो गवयः शशः॥ इत्यादयो मृगेंद्राद्या इत्यमरः॥ शल्लकः श्वावित् शल्ल एव शल्लकः॥ स्वार्थे कः॥ श्वाविन्तु शल्ल इत्यमरः॥ ४८

॥ ४१ ॥ चमरी शबरीकेशैः संमिमीते स्ववालधिं॥ गवयः शल्लकश्चायमुभावेकत्र तिष्ठतः॥ ४८॥ ॥ ४१ ॥
निजमात्सर्यमुत्सृज्य निजा तेजो नियंत्रितो॥ कुंडौ च मुंडयुद्धाय न सज्जेते जयैषिणौ॥ ४९॥

कमिति शाक्हं हत्वा युद्धाय उद्यते इति कुंडौ मेषौ नो मुंडयुद्धाय न सज्जेतां न प्रवर्तेतां॥ यद्वा कुंडौ तीक्ष्णशृंगौ मेषो जंतु विशेषो कुंडस्तीक्ष्णो घमे कुंडावल्किशेषचक्र भिन्ना इति रत्नमाला॥ यद्वा कुंडौ मदघूर्णौ भिल्लौ कुंडास्या ज्जाळहस्तिन्यां मदिराजल्कह्नस्तयोः॥ नलिन्यां सुरयोषायां कुंडः स्यात्मदनिर्झर इति विश्वप्रकाशः॥ मल्लयोर्मुंडयुद्धं तु शिरः शीर्षैरस्पोरसावितिभागवत्॥ ते प्रसिद्धं कुंडौ कुं डाराविति केचित्॥ जयैषिणौ जयकांक्षिणौ॥ ४९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(४०)

मृदुस्पर्शास्यात्तृणवंतिवृणगुल्मादीन्तृणानिचगुल्मानिचतान्यादीन्येषांतान् श्वापदाव्याघ्रादयःशुनआपदोयेभ्यस्ते
श्वापदाइतिव्युत्पत्तिपुरस्कारेणपुंसिश्वापदसर्प्पयोरित्यादिदर्शनादंतत्वेननिपातनात्॥पाठांतरेसुष्ठु
आपद्येभ्यस्तथाइतिव्याख्येयंकिमितिमांसभक्षणांविहायतृणादीन्दंतितत्राह॥५०॥आपदास्पदंआ

एणशावंमृगाणोपिमृदुस्पर्शातिपाणिना॥तृणवंतितृणगुल्मादीन्श्वाप
दास्त्वापदास्पदं॥५०॥लोकद्वयेदुःखदंहिधिक्तन्मांसस्यभक्षणं॥यः
स्वार्थंमांसपचनंकुरुतेपापमोहितः॥यावंसस्यतुरोमाणितावद्वर्षाणिनरके २
वसेत्॥५१॥

पदांआस्पदंस्थानंकुतोपतोद्वयेदुःखदंयन्मांसभक्षणंतद्विगर्हमितिसर्थः॥आपदां
पदमितिक्वचित्तत्रपदंस्थानंलोकद्वयेदुःखहेतुत्वमेवयःपंचयतिस्वार्थं इति॥५१॥ ॥२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्येनः पत्री पत्त्री पत्री श्येनइत्यमरः ॥ वर्त्तिकां वर्त्तकां वनचटकामितिसर्थः ॥ नावबोढ्यातिगौडेप्रसिद्धा ॥ वर्त्तिकावर्ति
कादयइत्यमरः ॥ चित्रामिति ॥५७॥ सुचिरं नरकान्भुक्त्वा ॥ पिकास्यां मलिनाशयाः मलिनांतःकरणाः संतो
भ्रमंति अहो एतच्चित्रमिति तत्र हेतुमाह मदिरेति मद्यपानासक्ता अभीक्ष्णमज्ञानमाश्रयंतो मधुपा एवभव

श्येनोऽपि वर्त्तिकां दृष्ट्वा भवेत्स्वेषपराङ्मुखः ॥ चित्रमत्रापि मधुपा भ्रमंति मलिनाशयाः ॥५७॥
सुचिरं नरकान्भुक्त्वा मदिरापानलंपटाः ॥ मधुपा एव जायंते भ्रांतिभाजः पुनः पुनः ॥५८॥
अत एव पुराणेषु गाथेति परिगीयते ॥ स्फुटार्थ अपुराणैर्ज्ञात्वा तैः पिनाकिनः ॥५९॥६०॥

घाश्चिस्याठः ॥ तदायमर्थः ॥ नरकजन्यं दुःखमस्माकं मास्यादिति खेदेनापि तमपिम
तीसर्थः ॥ भ्रमंति मधुनासयेति
धुनासपानासारे नैवमंतिसजंतीति अन्यत्सुर्वत ॥५८॥ हेतुमेव साधयंतो अत एव पुराणैः पुराणोवि
न्वेशास्त्रतोरीति वक्ष्यमाणां कथां प्रपंचारगीयते इत्यन्वयः स्फुटार्थास्पष्टार्था विश्वेश्वरस्वरूपज्ञतान्ने
वाक् ॥ ज्ञात्वेति प्राकृतं व्याख्यानं स्पष्टं ॥ भाने वं पठंति ॥५९॥६०॥ ६१॥ ६२॥ ६३॥ ६४॥ ६५॥ ६६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स

घर्मांस्तिता॥ हृदिस्थापीतिशेषः॥६०॥ विनेति प्रसादो नाममामयं ज्ञानाद्विसेवं रूपोनुपठः शिववर्जिताः
शिवतत्वज्ञानरहिताः॥६१॥ तिरोंचंतीति तिर्यंचः द्वितीयास्थाने प्रथमापश्वादीनिसर्थः तिरश्च इति

घर्मासंघाशिवेभक्तिः घर्मग्रंथेषु शिवार्चने॥ मघर्मासरतानां तु दूरे तिष्ठति शांकरः॥६०॥
विनाशिवप्रसादेहि प्रातिफापन नश्यति॥ अतएव भजंते ते पत्र नराः शिववर्जिताः॥६१॥
॥४३॥ दृस्यास्त्रनश्वरान् दृष्ट्वा तिर्यंचोमनुजोपि वा॥ अबोधिविबुधैश्वर्यं प्रभावः क्षेत्रजस्वपं॥६२॥
पतो विश्वेश्वरेणैते तिर्यंचोप्यत्रवासिनः॥ निधनावसरे मोच्यास्तारस्योपदेशतः॥६३॥
शालाक्षेत्रस्य माहात्म्यं योवसेतत्कृतनिश्चयः॥ तं तारयति विश्वेशो जीवंतमथवा मृतं॥६४॥

वापाठः अबोधिश्चातः॥ तुरेवार्थे अपंप्रभावः क्षेत्रजः स एव॥६२॥ यत इति॥ विश्वेश्वरेण तारकस्य प्रव
णावस्य राममंत्रस्येति वा मरणकाले उपदेशात् उपदेशमात्रेणैव उद्धार्यंत इत्यर्थः॥६३॥ ज्ञात्वेति
एवार्थे न तु शब्देन तारयसनेन संबंधः॥ तारयसेवेसर्थः॥६५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बा॰ स॰

अविमुक्तेति॥अविमुक्तेतिर्यग्योथेतेमुच्यंतएवेतेर्थेस्यजैतोरर्थः॥६५॥पक्षिकुठंपक्षिसमूहं॥६६॥सारसः पुष्कराह्वः पुष्कराह्वस्तुसारसइत्यमरः॥लक्ष्मणा
कंठेयोषिच्छीवायांमन्यामहइतिदेवानामुक्तिः उत्तरत्राप्येतस्यायथासंख्यंसंबंधोज्ञेयः॥६७॥वरटाहंसस्यस्त्री।हंसस्ययोषिद्वरटासारसस्यतुलक्ष्मणेत्यम
रः॥स्वबंधुपुटकोटिभिः॥स्वस्यबंधुःस्वचंचुकोटिरित्यर्थः॥चंचुस्त्रोटिरुभेस्त्रियामित्यमरः॥तस्यपुटंयुगुलंतस्यकोटिरग्रभागः॥चंचुपुटस्यद्वित्वेपितद्वयावय
वानांबहुत्वाद्बहुवचनं।कंडूयमानांकंडूतिंकुर्वाणांहंसकाममानंरातिपार्श्वयंतंपक्षधूननैःपक्षपोत्थवातनैर्वारयेन्निवारयेदित्यर्थः॥६६॥निरुध्यमानेति।वक्रेण

स्वबंधु॰३ अविमुक्तरहस्यज्ञामुच्यंतेज्ञानिनोनराः॥अज्ञानिनोपितिर्यंचोमुच्यंतेत्व कल्मषाः॥६५॥इत्याश्चर्यपरादेवायावद्वांत्याश्रमंमुनेः॥तावत्पक्षिकुठं
दृष्ट्वाभृशंमुमुदिरेपुनः॥६६॥सारसोलक्ष्मणाकंठेकंठमाधायनिश्चलः॥मान्यामहेनतिंडातिंध्यायेद्विश्वेश्वरंकिल॥६७॥कंडूयमानांवर
नैः३ टास्वबंधुपुटकोटिभिः॥हंसकाममयमानंतुरंरायत्पक्षधू[illegible]॥६८॥निरुध्यमानांवक्रेणचक्रीकेकिलभाषणैः॥वदंतीतिक्रिमच्चोपिकामि
ताकामिनंवर॥६९॥कलकंठःकिलोत्कंठमंजुगुंजतिकुंजगः॥ध्वनिस्थःश्रोष्यतिमुनिःपारावत्येतिवार्यते॥७०॥ रामनाम॥॥।

चक्रवाकेनाकोकश्चक्रश्चक्रवाकोरथांगाह्वयनामकइत्यमरः।[illegible]केकिलभाषणैः चक्रवाकजातिशब्दैः चक्री चक्रवाकी निरुध्यमानांनीपमाणामनोहिकामि
कानांवरिष्ठेतिसोपहासोक्तिः॥अत्रापानंदकाननेतत्रापुत्रगृहेतत्राप्यगस्त्याश्रमेइत्यपिशब्दार्थः।कामिताकामिनःसावःइतिवक्रोक्त्यर्थः॥६९॥कलकंठइति॥क
लोमधुरध्वनिःकंठेयस्यासौकलकंठः॥कलरवःपारावतइतियावत॥उत्कंठंऊर्ध्वग्रीवंमंजुमनोहरंयथाभवतितथाकुंजगोलतादिपिहितोदरःसन्गुंजति
अव्यक्तंशब्दंकरोतिसपारावतेपत्न्यावार्यते॥गुंजन्निकुंजगइतिक्वचित्पाठः।किंत्वेकस्यपक्षायावायंइतिनिःश्रीतेप्रसिद्धेवाकेपक्षधूननैरित्यनुषंजनीयंमि

त्यापारावद

(८५)

दी२

केकीमयूरः मयूरोबर्हिणोबर्हीनीलकंठोभुजंगभुक्।। शिखावलःशिखीकेकीमेघनादोनुलास्यपिस्मर्थः।।केकामयूरध्वनिः।।तदुयादगत्स्यपपात्।।चकोरःप
क्षिविशेषःतेषांविशेषाःहारीतोमद्गुःकारंडवःप्लवःतित्तिरःकुकुभोलावोजीवंजीवश्चकोरकः इत्यमरः।।चंद्रिकाकौमुदी।।चंद्रिकाकौमुद्योत्स्नेत्यम
रः।।नक्तंवृत्तंरात्रिभोजनं।।७१।।सारिकेतिसारिकापक्षिविशेषःशालिकइतिप्रसिद्धः।।सासारंपरमार्थंपठंति।।शुककीरौसमावित्यमरः।।संबोधयंतीति।।कि
तत्सारंकथंवासंबोधयतितदाह अहोइति अहोहेशुक अपारावारसंसारसिंधुपारप्रदःशिवइति।।पारपरतीरंअवारंअर्वाग्निनंतीरंपारावारंपरार्वाचीने
तीरेइतिवचनात्।।नविद्यतेपारावारेयस्यसअपारावारःसचासौसंसारएवसिंधुःसमुद्रःदेशेनदविशेषयोःसिंधुर्नासरितिस्त्रियामित्यमरः।।तस्यपारं

केकीकेकांपरित्यज्यमौनंतिष्ठतितद्भयात्।।चकोरश्चंद्रिकांमोक्तानक्तव्रतमिवास्थितः।।७१।।पठंतिसारिकासारंशुकंसंबोधयत्यहो।।
अपारावारसंसारसिंधुपारप्रदःशिवः।।७२।।कोकिलःकोमलालापैःकलयन्निवकाकलीं।।कंठिकाढोकलयतःकाशीस्थोन्नेति
भाषते।।७३।।मृगाणांपक्षिणामित्थंदृष्ट्वावेष्टांत्रिविष्टपं।।अकांडपतितंसंद्युष्टंनिनिंदुश्चिदशाभृशं।।७४।। ।। ।। ।।

समाप्तिंप्रददातीतिसतदा।।यद्वापारावारःसंसारसमुद्रोयेषांतान्जीवानुपारयतिमुक्तिप्रदानात्संशप्रकर्मणःकरोतीतिपद्या।।पारतीतिरसमाप्तोरितिचौरादिका
सारधातोःअपारावारसंसारपारःपरमात्मानंप्रददातीतितथाऽऽत्माप्रदःशिवइतिमारांभोशुकइतिसंबोधयती त्यर्थः।।अपारपारेतिकचित्पाठःतत्रअनं
तपारइत्यर्थः।।७२।।कोकिलइति।।कोकिलोवनप्रियः।।परभृत्कोकिलःपिकइत्यमरः।।काकलीसूक्ष्मध्वनीमधुरध्वनीवा।।काकलीतुकलेसूक्ष्मध्वनौतुमधुरा
स्फुटइत्यमरः।।यन्नूत्यारयन्नकलिक्ष्यकाल्यककंठिकाढौतोकाशिस्थान्नकलयतःनमारयनइतिवदतीत्यर्थः।।अकांडपातसंकष्टअकांडेअनवसरेहिरण्यकशि

कल०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरमिति॥वरंश्रेष्ठइत्यर्थः॥ननुभवंतोप्यमरत्वात्पुनरावृत्त्यभावेनश्रेष्ठइतिस्वयमाशंक्यस्वयमेवनिराकुर्वंति॥नदेवानपुनर्भवाइतिदेवावयंपुनर्भ
वापुनर्भवोजन्मयेषांतेपुनर्भवंतीतिपुनर्भवानइतिनअपितुपुनर्भवाएव॥द्वौनञौप्रकृतमर्थंगमयतइतिन्यायादमरत्वादिश्रवणंचत्वापेक्षिकमनोव
यंतुच्छाएवेत्यर्थः॥यद्वादेवावयंनइतिप्रथमनकारेणसंबंधःमावरस्यपश्चाद्देवत्वन्वेषणा॥यानेनपुनर्भवाइतिसंबंधनीयं॥ नवायेपुनर्भवाइतिपाठस्तु

वरमेतेपक्षिमृगाः पशवः काशिवासिनः॥येषांनपुनरावृत्तिर्नदेवायेपुनर्भवाः॥७५॥काशीस्थैःपतितैस्तत्र्यानवयंस्वर्गिर्नःक्षवितः॥काश्यां
पाताल्लयंनास्तिस्वर्गेपाताल्लयंमहत्॥७६॥वरंकाशीपुरीवासोमासोपवसनादिभिः॥विभिन्नछत्रसंछायांराज्यंनान्यत्रनीरिपु॥७७॥काशी
केमशाकेकारयंयत्सुखंहेलयाप्यते॥नत्पदंनाप्यतेन्यत्रयोगयुक्त्यापियोगिभिः॥॥७८॥ रामनामरारामनामनामरामनाम॥
वरंवारानसीरंकोनिःशंकोयोयमादपि॥नवयंत्रिदशायेषांगिरितोपीदृशीदृशा॥७९॥ ॥ छ

तिरोहितार्थः॥सपुनर्भवाइतिच॥७५॥७६॥नीरिपुनिर्गतारिपवोयस्माद्यस्मिन्नितिवानद्वाल्यंतत्रयथा॥७७॥योगमुक्त्यापियोगेष्टांगादिःयुक्तिर्युंजनमनुष्ठान
मितियावत्॥योगस्ययुक्तिर्योगयुक्तिस्तयापीत्यर्थः॥७८॥गिरितोविंध्यात्ईदृशीदृशानाशादशायज्ञादेरभावेनाप्यर्थयनोंस्मावादित्याक्षिप्तापः॥७९॥
श्रीविश्वेश्वरायनमः॥छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ छ॥ छ॥ छ॥ छ॥ छ॥॥शिवार्पणमस्तु॥नारायनमः॥ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८६

त २

ब्रह्मण इति ब्रह्मणो हिरण्यगर्भस्य दिवसस्य दिनस्याष्टांशोऽष्टभागे घटिकाचतुष्टये संध्याकालेऽइति यावत्तारोऽङ्गपदं त्रैलोक्यं सपाठं लोकाश्चलोक
पाला श्चैतैः सहवर्त्तमानं ॥८०॥ परार्द्धं ब्रह्मणः स्वमानेन पंचाशद्वर्षं परार्द्धद्वयं शतवर्षं तस्य नाशोऽपि प्राकृतप्रलयेऽपि अपिः समुच्चयार्थः ॥ पुः काशी
स्थः मनविनश्यति यावज्जीवं कस्यापि पुण्यवस्यान्नात्यथा वसरे शरीरपाते वसोऽज्ञानदावबोध ब्रह्मत्वेनावस्थानात् अतएव विध्यान्तु तस
वैस्मिन् जगति सपडुतेपि काशीस्थानोऽसयद्व वणाघसावाद्देवागमनं तीर्थं वा सार्थिसतर्पणं पवरात्रमुषित्वेत्यादिकं च मर्वसंगच्छत इति सूवमेव

॥८०॥

॥ ४५ ॥ परार्द्धद्वयनाशेऽपि काशीस्थो योन नश्यति ॥ तस्मात्सर्वप्रयत्नेन काश्यांश्रेयः समाचरेत् ॥८१॥ ॥ ॥ छ ॥ ४

सकारणमुक्तं यत्त्विदानीमन्यथा दृश्यते लक्ष्माणि नां पापोपचया द्विश्वेशप्रातिकूल्याच्च ॥ तथाचान्नैवोक्तं ॥ कथौविघ्नान्नविषं तिकाश्यां निवसतां
सतां ॥ ये पापनीलाश्चषंठाश्च मूर्खाः कुर्वंति पापान्यविशंकमार्मे ॥ तेषामनंतं क्षविता हि दुःखमायंदता रंन हि संन्नामोत्र ॥ लब्धापि सिद्धिं नोया
पायदि ॥ क्रुध्येद्विलोचनइति आदि ॥८१॥ ॥ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ छ राम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विपक्षेबाधकमाह॥अस्तिचेदिति॥काशीवासाभिलाषुकाःकाशीवासाभीप्सवः॥८१॥तत्पुण्यंतितन्नतत्पुण्यंचेतितत्पुण्यंतस्यपरिवर्जनेनयत्संयं

यत्तु - खंकाशिवासेत्तनृत्तद्धूलांऽमंडपे॥अस्तिचेत्कथंसर्वेकाशीवासाभिलाषुकाः॥८२॥जन्मांतरस
हस्त्रेषुयत्पुण्यंसमुपार्जितं॥तत्पुण्यपरिवर्त्तेनकाश्यांवासोत्रलभ्यते॥८३॥लब्धोपिसिद्धिंनोयाया
द्यदिक्रुध्येत्त्रिलोचनः॥तस्माद्विश्वेश्वरंनित्यंशरणंचारणंव्रजेत्॥८४॥धर्मार्थकाममोक्षार्थं
पुरुषार्थचतुष्टयं॥अखंडंहियथाकाश्यांनतथान्यत्रकुत्रचित्॥८५॥आलस्येनापियोयाया
द्गृहाद्विश्वेश्वरालयं॥अश्वमेधाधिकोधर्मस्तस्यस्याच्चपदेपदे॥८६॥यःस्नात्वोत्तरवाहिन्यां
यातिविश्वेश्वरादर्शने॥अद्ययापरयातस्यश्रेयसोंतोनविद्यते॥८७॥स्वर्धुनीदर्शनात्स्पर्शा
स्नानादाचमनादपि॥संध्योपासनतोजप्यात्तर्पणाद्देवपूजनात्॥८८॥ ॥ ॥

नविनिमयेनेत्यर्थः॥८३॥शरणंरक्षितारं॥८४॥अखंडंसमग्रंपूर्णमितियावत्॥८५॥८६॥८७॥स्वर्धुनीदर्शनादि
त्यारभ्यपंचम्यंतानांपदानांतृतीयांतानांचधर्मःस्यादुत्तरोत्तरइत्यग्रिमेणसंबंधः॥८८॥ ॥ ॥ ॥ ॥

87

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचतीर्थविलोकनात्॥ कपालमोचनपापमोचनऋणमोचनकुलस्तंभवैतरण्यवलोकनात्॥ यद्वा वरणासंभेदासिसंभेदे पंचनदशाश्वमेधमणिकर्णिकावलोकनात्॥ यद्वाऽऽदित्यद्रौपदीविष्णुदंडपाणिमहेश्वर॥ ढुंढिविनायक ज्ञानवापी नंदिकेश तारकेश महाकालेशपुनर्दंडपाण्यवलोकनात्॥ तथा चात्रैव वक्ष्यति। आदित्यं द्रौपदीं विष्णुं दंडपाणिं महेश्वरं॥ नमस्कृत्य ततो गच्छे

॥४६॥ पंचतीर्थविलोकाच्चतुर्नो विश्वेश्वरेक्षणात्॥ श्रद्धास्पर्शनपूजाभ्यां धूपदीपादिदानतः॥ १९॥ प्रदक्षिणे ॥४६
स्तोत्रपाठैर्नमस्कारैः स्तुनर्तनैः॥ देवदेव महादेव त्वं भो शिव शिवेति च॥ २०॥ धूर्जटे नीलकं
ठेशा पिनाकिन् शशिशेखर॥ त्रिशूलपाणे विश्वेश रक्ष रक्षेति भाषणैः॥ २१॥ मुक्तिमंडपिकायां
च निमेषार्धोपसेवनात्॥ तत्र धर्मकथालापात् पुराणश्रवणादपि॥ २२॥ नित्यादिकर्मकर
णात्तथातिथिसमर्चनैः॥ परोपकरणाद्यैश्च धर्मैः स्यादुत्तरोत्तरः॥ २३॥ ॥ ॥ ॥ ॥

त्तद्वत् ढुंढिविनायकं॥ ज्ञानवापीमुपस्पृश्य नंदिकेशं ततो व्रजेत्॥ तारकेशं ततोऽभ्यर्च्य महाकालेश्वरं ततः॥ ततः पुनर्दंडपाणिमित्येषा पंचतीर्थिकेति परिभाषिकपंचतीर्थविधानात्॥ यद्वा आदित्यादिमहेश्वरांतमेकं ढुंढिविनायकमेकं। ज्ञानवापी एकं। नंदिकेशादित्रयमेकं पुनर्दंडपाणिरेकं एवं पंचतीर्थिका चकारादन्येषामपि उत्तरोत्तरः उपर्युपरि श्रेष्ठो वा उपर्युदीच्यश्रेष्ठ षण्मुत्तरः स्यादित्यमरः॥ प्रतिदिनं वर्धमान इत्यर्थः॥ २३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मवृद्धिं सद्दष्टांतामाह॥शुक्लपक्षइतिपदेपदेक्षणेक्षणे॥१४॥वृक्षरूपेणधर्मस्तौतिश्रद्धेति॥अयंश्रुतिस्मृतिभ्यांप्रतिपादितोधर्मवृक्षईड्यःस्तुत्यः॥
सेव्यइतियावत्।आदिसन्वयः॥कथंभूतःश्रद्धास्तिक्यबुद्धिबीजंयस्यसः।पुनःकीदृशःब्राह्मणाचरणजलैःसिक्तोभीष्टःक्षरितइतियावत्॥पुनःकीदृशःयस्य
धर्मवृक्षस्यताःप्रसिद्धाःचतस्रोदशचतुर्दशसंख्याकाः।शिक्षाकल्पज्योतिश्छंदोनिरुक्तव्याकरणऋग्यजुःसामाथर्वमीमांसान्यायपुराणधर्मशास्त्रलक्षणाः॥अ
(शिक्षादायुर्वेदधनुर्वेदगांधर्वार्थशास्त्रलक्षणाश्चशाखास्कंधायस्यसःतदुक्तंवैल्लवे।अंगानिचतुरोवेदामीमांसान्यायविस्तरःपुराणंधर्मशास्त्रंचविद्याह्येता

॥ ॥शुक्लपक्षेयथाचंद्रःकलयाकलयैधते॥एवंकात्र्यांनिवसतांधर्मराशिःपदेपदे॥१४॥श्रद्धाबीजोविप्रपा॥ ॥
॥ ॥दांबुसिक्तःशाखाविद्यास्ताश्चतस्रोदशापि॥पुष्पाण्यथाद्वेफलेस्थूलसूक्ष्मेमोक्षःकामोधर्मवृक्षोयमीड्यः॥१५ ॥

श्चतुर्दश॥आयुर्वेदोधनुर्वेदोगांधर्वेस्त्रिवै ॥अर्थशास्त्रंचतुर्थंतुविद्याह्यष्टादशैवतु इति॥पुनःकीदृशः।यस्यधर्मवृक्षस्यअर्थान्योपार्जितध्यानानिपु
ष्पाणिकुसुमानियस्यसःपुनःकीदृशः॥यस्यधर्मवृक्षस्यस्थूलसूक्ष्मेद्वेफलेयस्यसःकेतेतत्राह॥मोक्षःकामइतिसूक्ष्मफलंमोक्षःस्थूलंफलंका म
इत्यर्थः।१५।

तेत्रय२

१०४०

ति२

ह्रीं ह्रिविद्याधिराजगामंत्रशाष्टं प्रणयवि[illegible] प्रप्यः॥ षडक्षरमंत्रं राजोवा॥ १६॥ काश्यांधर्म इति। सचासौ चतुष्पादश्चेति तथा संपूर्णइत्यर्थः॥ तेचपादाः सत्संत
दा २ पोदयाधीन मितिश्रेयः कैवल्यं नचैतद्वित्र मित्याह॥ १७॥ विश्वेशं[illegible] धर्मस्यार्थस्य कामस्यामृतं कैवल्यं नानिचनयातद्रूपेशुतेषस्ति भा[illegible]॥ द्वियत्वेन रूपस्वरू
रूपं ३ पंयस्यसः। तदुक्तं। अस्तिभातिप्रियं [illegible] नाह्नेत्यर्थ×म×पंचकं॥ आद्यंत्रयं ब्रह्मरूपंजगद्रूपं ततोद्वयमिति। यद्वाधर्मार्थकामामृ[illegible]नां अंते भ्यो कामा ता३

॥ सर्वार्था नामत्र दात्री भवानी सर्वान्नूकामानूपूरयेदत्र धौठिः॥ सर्वान्नूजंतून्मोचयेदंतकाले विश्वेशोत्रश्रोत्र मंत्रो॥
॥ ४७ ॥ ॥ पदेशात्॥ १६॥ काश्यांधर्मस्तचतुष्पादरूपः काश्यामर्थस्सोप्यनेकप्रकारः॥ काश्यां कामः सर्वसौख्यैकभूमिः॥ ॥ ४
॥ काश्यांश्रेयः स्तत्तुकिंनात्रयत्रं॥ १७॥ विश्वेश्वरो मत्र न तत्र चित्रं धर्मार्थकामामृतरूपरूपः॥ स्वरूपरूपः स॥
॥ हिविश्वरूपस्तस्मान्नकाशीसदृशी त्रिलोकी॥ १८॥ छ॥ यस्याः स्मरमात्रेणरुद्रंत्येनश्च्यवाध्रुवं॥ तस्यैनमः॥

यनिरूपणाय क्षराताव्यरूपं शरीरं लीलयाविग्रहोयस्यसः। तच्छिशरीरखंधत्वात्साधासंसारितात्तत्राह॥ स्वरूपरूपः स्वरूपमखंडितं सच्चिदानंदलक्षणं रूपं स्वरू
पंयस्यसः॥ इदंसर्वंयदयमात्मा॥ आत्मैवेद॰ सर्वंब्रह्मैवेद॰ सर्वमित्यादि॥ अरूपरूपइतिपाठेतुस्फुटो ऽरूपरूपः॥ मायाविश्वरूपः॥ त्रिलोकरूपः॥ हितत्
पइतिपाठः॥ क्वचित्॥ प्रकृतमुपसंहरेतितस्मान्नकोशीति॥ १८॥ छ॥ ॥ नमोस्तुसाबरालवेस्वयंभुवेस्वयंभुना हितस्वगप्रहारिणेसदाडिनेशोकारिणे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दद्दशुस्त्विति॥ तुशब्दः संभ्रमावद्योतकः॥ ९९। १०० ॥ नकेवलं मुनेरुटजं दद्दशुः पर्णशालांगणं पर्णशाला पर्णकुटितस्या अंगणं प्रांगणं वी
क्ष्यसन्नेमुः अत्रयम्निमेणान्वयः॥ सक्तिश्रद्धातिशयावद्योतकः सनुशब्दः उटजं विशिनष्टि॥ अप्सरान्वितयाधिकेनहोमधूपेतिविभिः कीदृ
शैः बहुभिः मृगशावैः ऋषिकन्यानुयायिभिः ऋषिकन्या अनुयातुं अनुगंतुं प्रतिगंतुं शीलं येषां तथा तैः ऋषिकन्यानुयातं किमर्थमिति
पृच्छायामाह श्यामाकांजलिपायार्थं श्यामाका धान्यान्न प्रस्कपांवार्थमित्यर्थः॥ कथंभूतैर्मृगशावैः धृतोपग्रहदर्भास्यैः धृताउपग्रह

इतिब्रुवाणागीर्वाणा दद्दशुस्तदुटजंमुनेः॥ होमाधूपसुगंधाद्यंबहुभिर्बहुभिर्वृतं ॥९९॥ श्यामाकांजलियायार्थ
मृषिकन्यानुयायिभिः॥ धृतोपग्रहदर्भास्यैर्मृगशावैरलंकृतं॥ १०० ॥ साईवल्कलकोपीनैर्वृक्ष
शाखावलंबिभिः॥ वर्द्धविघ्नमृगान्दिक्षुवागुरास्थिरिवावृतं॥ १०१ ॥ पतिव्रताशिरोरत्नलोपामुद्राधिमुद्रया॥
मुदितंवीक्ष्यसन्नेमुः पर्णशालांगणंसुराः॥ १०२॥ ॥ ॥ ॥ ॥ ॥ ॥

रूपादर्भाकुशाः अस्त्रीकुशंकुशोधर्मः पवित्रमित्यमरः॥ आस्येनयैस्तेतथा तैः साईवल्कलान्येवकोपीनानितैरावृतमित्यन्वयः कीदृशैः वृक्ष
शाखावलंबिभिः तरुस्कंधाश्रयिभिः कैरिवविघ्नायवमृगाः विघ्नमृगास्तान् धर्तुं बद्धुं वागुराभिर्मृगबंधिनीभिरिवेत्युत्प्रेक्षा पतिव्रतानांशि

शिरोरत्नं

लोपामुद्रानस्या स्त्रीकाणमुक्तगकसुडिकानया
मुदितंविङ्क्ता ॥ १०३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घृताकर्णाक्षिमाळिकायेनसतथातंअधिष्टितंआश्रितंवृष्यायतीनामासनंस्य॥ यतीनामासनंवृषीयमरः॥ पृष्टउपरिभागोयेनसतथा॥
तीपरमेष्टिवद्गुक्रं हिरण्यगर्भेवद्बृहंएवंभूतमगस्त्यं॥१०३॥ पुरोयतःसमालोक्यशेषैर्यथास्यात्तथाञ्जपञ्जयेतिचकारोनुक्तसमुच्चये

॥ ४८ ॥

विसर्जितसमाधिर्धृतकर्णाक्षिमाळिकी॥ अधिष्टितवृषीपृष्टेपरमेष्टिवद्गुक्रटी॥१०३॥ पुरोगस्त्यंसमालोक्यसर्वेदे
वाःसवासवाः॥ प्रहृष्टवदनाःप्रोचुःप्रोच्चैर्जयजयेतिवा॥१०४॥ मुनिरुत्थायतान्सर्वाननुपावेश्यपयसोवितं॥ आ
शीर्भिरभिनंद्याथपप्रच्छागमकारणं॥१०५॥ व्यासउवाच॥ ॥ इदंपुण्यतमाख्यानंश्रुत्वाभक्तिसमन्वि ॥ ४ ॥
तः॥ पठित्वापाठयित्वावव्रतश्रद्धावतांपुरः॥१०६॥ विधूयसर्वपापानिज्ञात्वाऽज्ञात्वाकृतान्यपि॥ हंसवर्णेनया
नेनगच्छेच्छिवपुरंपरं॥१०७॥ ॥ छ ॥ ॥ इतिश्रीस्कंदपुराणेकाशीखंडेअगस्त्याश्रमवर्णनोनामतृतीयोध्यायः॥ छ

प्रथमतःप्रणम्यपश्चाज्जयजयेतिप्रोचुः इत्यर्थः॥ अथवापूर्वोक्तविशेषणविशिष्टंवीक्षादराश्चीअस्मिनंद्युवर्दपिवाहर्षायिवोतियावत्॥ श्रोत्रादीनां
फलमाह॥ श्रोत्रादीनां॥ इदमित्येतत्॥ ॥१०७॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामगस्त्याश्रमवर्णनंनामतृतीयोध्यायः॥ ॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतिव्रता त्वरी लोपामुद्रानुवर्णनं ॥ चतुर्थे न एर्यते शेषपापरा विप्रणमानं ॥ अगस्तीति ॥ अगस्तिरगस्त्यइत्यनर्थांतरं ॥ मुनि
रूस्यायता न्‌सर्वानुपवेश्य मयोचितं ॥ आशीर्भिरभि नंद्याध्यपाद्यागमकारणमित्युक्तं ॥ तत्र इप्रतिमुनिप्रष्टाइति ॥ धिष
णाधिपतेः बृहस्पतेः व्यालुल्लोकिरेपरस्परं बहूनां देवानां मध्ये एकेन वक्तव्ये यो मान्यो मान्येषु पि बहुषु योगुरुः गुरु रूषपि

सूत उवाच ॥ ॥ मुनिप्रष्टास्तदा देवा भगवंस्ते किमब्रुवन् ॥ सर्वलोकहितार्थाय तदाख्याहि महामुने ॥ १ ॥
श्रीवेदव्यास उवाच ॥ ॥ अगस्तिवचनं श्रुत्वा बहुमानपुरःसरं ॥ धिषणाधिपतेरास्यं विबुधा व्या
लुल्लोकिरे ॥ २ ॥ वाक्पतिरुवाच ॥ ॥ एष एव गस्ते महाभाग देवागमनकारकाणं ॥ धन्योसि ह
रु: तस्त्यासि मान्योसि महतामपि ॥ ३ ॥ प्रत्याश्रम प्रति नगं प्रत्यरण्यं तपोधनाः ॥ किन्तु संति
मुनिश्रेष्ठ काचिदन्ये वने स्थितिः ॥ ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यः सर्वशास्त्रार्थदर्शितेषु पियो वक्तातेन वक्तव्यं अत एवं भूत्वा बृहस्पते स्तदास्यं व्यालुल्लोकिरे लोकलोचद्दर्शनइतिधातुः देवा
गमनकारणानुवादपूर्वकमगस्त्यं स्तौति श्व ॥ एवं तिस्त्रिभिः आश्रमं आश्रमं प्रति प्रत्याश्रमं एवमुत्तरत्रापि नगं पर्वतं शैलं वृक्षोन

गाविसमरःस्किनिर्गर्टा ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०पू०च०

ब्राह्मंतेजोवेदवर्चसंउदारस्यभावऔदार्यंदातृत्वंमहत्वंवा।उदारोदात्तमहतोरित्यमरः॥मनः आत्मविषयमननाद्यन्मनस्तदि
त्यर्थः॥५॥लोपामुद्रांस्तौतिपतिव्रतेयमारभ्यइदमेवव्रतमित्यतःप्राक्तनेनग्रंथेनसधर्मिणीत्यमरः॥६॥अरुंधत्यादिभिःसह
कन्नीभिर्वा।यथैषालोपामुद्राश्रेष्ठावर्ण्यतेतथान्याकापिनेतिनिश्चितमित्यन्वयः॥अरुंधतीवसिष्ठस्यपत्नीसावित्रीब्रह्मणः

॥४७॥ तपोलक्ष्मीस्त्वयीहास्तिब्राह्मंतेजस्त्वयिस्थिरं॥पुण्यलक्ष्मीस्त्वयिपरात्वय्यौदार्यंमनस्त्वयि॥५॥प
तिव्रतेयंकल्याणीलोपामुद्रासधर्मिणी॥तवांगच्छाययातुल्यापरकथापुण्यकारिणी॥६॥
पतिव्रतास्वरुंधत्यासावित्र्याप्यनसूयया॥शांडिल्ययाचसत्याचलक्ष्म्याचशतरूपया॥७॥
मेनयाचसुनीत्याचसंज्ञयास्वाहयातथा॥यथैषावर्ण्यतेश्रेष्ठानतथान्येतिनिश्चितं॥८॥

काश्चित्र२ अनसूयाऽत्रेः।शांडिलीकौशिकीब्राह्मणीपतिव्रताशिरोमणिः॥अग्निमातावा।सतीईश्वरपत्नीदक्षदुहिता।लक्ष्मीर्विष्णोः।
शतरूपास्वायंभुवस्यमनोः॥७॥मेनाहिमवतः॥सुनीतिर्ध्रुवजननीउत्तानपादस्यभार्या।संज्ञाविवस्वतः॥स्वाहाग्नेरिति॥८॥

पत्नी॥पत
णिगृहीत
द्वितीया
धर्मिणीः
॥४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताद्दक् पतिव्रतात्वमेवाह॥ मुकेमुकेइत्यादिना॥ प्रथमं प्रतिबुध्यति तत्र अबोधादिति शेषः॥९॥ क्वापि कस्मिंश्चिद्देशांतरे काळे वा प्रो
षिते देशांतरं गते त्वपि सकलभूषणरहिता सा भवति। तदुक्तं याज्ञवल्क्येन। क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं॥ हास्यं परगृहे यानं त्यजेत्प्रो

...मुंकेमुंके त्वयि विलोलिते तिष्ठति त्वयि तिष्ठति॥ विनिद्रिते विनिद्रति प्रथमं प्रतिबुध्यति॥९॥ अनलंकृतमा
त्मानं तव नो दर्शयेत् क्वचित्॥ कार्यार्थं प्रोषिते चापि सर्वमंडनवर्जिता॥१०॥ न च ते नाम गृह्णीयात्तो वायु
ष्यवृद्धये॥ पुरुषांतरनामापि न गृह्णीति कदाचन॥११॥ आक्रुष्टापि न चाक्रोशेत्ताडितापि प्रसीदति॥ इदं
कुरुष्व तं स्वामिन्नु मन्यतामिति वक्ति च॥१२॥ आहूता गृहकार्याणि त्यक्त्वा गच्छति सत्वरं॥ किमर्थं व्या
हति५ हृता नाथ स प्रसादो विधीयतां॥१३॥ न चिरं तिष्ठति द्वारि न द्वारमुपसेवते॥ अदापि तत्त्वयो किंचित्स्वे चि
त्त्वद दात्यपि॥१४॥ पूजोपकरणं सर्वमनुक्ता साधयेत्स्वयं॥ नियमोदकबर्हिषपत्रपुष्पाक्षतादिकं
॥१५॥ प्रतीक्षमाणावसरं यथाकालोचितं हितं॥ तदुपस्थापयेत्सर्वमनुद्वि... ग्नातिहृष्टवत्॥१६॥
मि९ सेवते सत्तुरुच्छिष्टमन्नं फलादिकं॥ महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीच्छति॥१७॥छ॥ छ ॥छ ॥

श्रा॥१

षितत्वर्तके ति॥१०॥११॥१२॥ स च किमर्थं व्याहूते त्यादि वक्ति चेति पूर्वक्रियाया अनुषंगः॥१३॥ न द्वारमुपसेवते शयनादि
नेति शेषः॥१४॥१५॥१६॥ प्रतीच्छति प्रतिगृह्णाति॥१७॥ ॥ ॥ ॥ ॥श्रीगणेशाय नमः॥ ॥ ॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९६

१०५० चं०

गण्टा॥ संयतोपस्करा सुनिर्लिप्ताचंकारा ॥१९॥ समाजोत्सवदर्शनं समाजश्चउत्सवश्च तयोर्दर्शनाः सा वमुत्सातमत्ताव

अविसृज्य न चाश्नीयाद्देव पित्र्य तिथि द्वपिणा परिचारकवर्गेषु गोषु भिक्षुकुलेषु चार्पयेत्
संयतोपस्करा दक्षा हृष्टा व्ययपरा वा सुखी॥ कुर्यात्त्व यानन्नुज्ञाता तानो पवासव्रतादिकं
॥१९॥ दूरतो वर्जयेदेषा समाजोत्सवदर्शनं॥ नगछेत्तीर्थयात्रादिविवाहप्रेक्षणादिषु॥२०॥ ॥

॥ ५० ॥ सुप्तं४ सुखं सुखासीनं रममाणं यदृच्छया॥ आंतरेष्वपि कार्येषु पतिं नोत्थापयेत् क्वचित्॥२१॥छ

स्त्रीधर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्शयेत्॥ स्ववाक्यं श्रावयेन्नापिया वत्स्नाता न शुद्धितः
॥२२॥ सुस्नाता भर्तृवदनमीक्षते न्यस्य न क्वचित्॥ अथवा मनसि ध्यात्वा पतिं भानुं विलोकये
येत्॥२३॥ हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा॥ कूर्पासकं च तांबूलं मांगल्याभरणं तथा
॥२४॥ केशसंस्कारकबरीकरकर्णादिभूषणं॥ भर्तुरायुष्यमिच्छंती दूरयेन्न पतिव्रता॥२५॥छ॥

मावेदयति नगछेदिति॥ रणा आंतरेषु अंतरंगेषु रहस्येष्विति यावत्॥२१॥२२॥ अथ चेति चर्नरिक्तापि गतद्वदिशेषः॥ कूर्पासकं चो
ळः॥ कंचुकीति प्रसिद्धः॥ न दूरयेन्न त्यजेत्॥२५॥छ॥छ॥ श्रीगणेशाय नमः॥छ॥छ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ यद्वाश्रमण्यापारिव्राजिक्याबौद्धपत्न्येत्यर्थः॥ दुर्भगया भाग्यहीनया प्राकृतयेत्यर्थः ३

रजक्यावस्त्रनिर्णेजकपत्न्या उदक्यावा॥ प्रथमेऽहनि चांडाली द्वितीये ब्रह्मघातिनी॥ तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यतीति वचनाद्यापदुक्तोऽनुवर्ततेना
वत्तया सखित्वं नाचरेदित्यर्थः॥ हेतुक्यासत्कर्मसु हेतुत्सिः संदेहं आपादयंत्या तदुक्तौ॥ संदेहकृद्धेतुत्सिः पंसत्कर्मसु सा हैतुकीति स्मरणा(यापाखं
डमार्गकृताभ्यासया कापाखंडिकेत्यर्थः॥२६॥२७॥ वर्द्धन्यां संमार्जन्यां दृषदि पेषण्यां अपिः समुच्चये॥ यंत्रके गोधूमादिचूर्णशिलायां देहल्यां गृह

नरजक्या न हैतुक्या न च श्रमणया न वा॥ न च दुर्भगया क्वापि सखित्वं कुरुते सती॥२६॥ भर्तृविद्वेषिणीं ना
रीं नैषा संभाषते क्वचित्॥ नैकाकिनी क्वचिद्भूयान्न नग्ना स्नाति न क्वचित्॥२७॥ नोलूखले न मुसले न व
र्द्धन्यां दृषद्यपि॥ न यंत्रके न देहल्यां सती चोपविशेत् क्वचित्॥२८॥ विना व्यवायसमयं प्रागल्भ्यं न क्व
चिच्चरेत्॥ यत्र यत्र रुचिर्भर्तुस्तत्र प्रेमवती सदा॥२९॥ इदमेव व्रतं स्त्रीणामयमेव परो वृषः॥ इयमेका देवपूजास्स भर्तुर्वाक्यं न लंघयेत्॥३०॥

व्याहरणं॥ गृहावग्राहणी देहली इत्यमरः इत्यर्थः॥ गृहद्वाराद्बहिरुक्षयनेऽपि भूम्यामित्यर्थः॥२९॥ प्रसंगात्स्त्रीधर्मानाह इदमेवेत्यादिना॥३०॥ व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५

क्लीबंवीर्यहीनं ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ सरमाशुनी सरमाशुनीत्यमरः ॥ ३६ ॥ ३७ ॥ ३८ ॥ रहो ग्राम्यधर्मं वराति श्चारस्तिजारेणसार्द्धमितिमु ल्कापे

॥ ५१ ॥ क्लीबं वा दुःखसंस्थं वा व्याधितं वृद्धमेव वा ॥ सुस्थितं दुःस्थितं वापि पतिमेकं न लंघयेत् ॥ ३१ ॥ हृष्टा हृष्टे विषण्णा स्या — विषण्णा स्या

प्रिये सदा ॥ एकरूपा भवेत्पुण्या संपत्सु च विपत्सु च ॥ ३२ ॥ सर्पिर्लवणतैलादिक्षयेपि च पतिव्रता ॥ पतिं नास्ती

ति न ब्रूयादायासेषु न योजयेत् ॥ ३३ ॥ तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत् ॥ शंकरादपि विष्णोर्वा प

तिरेकोधिकः स्त्रियः ॥ ३४ ॥ व्रतोपवासनियमं पतिमुल्लंघ्य या चरेत् ॥ आयुष्यं हरते भर्तुर्मृता निरयमृच्छति ॥ ॥ ५

॥ ३५ ॥ उक्ता प्रत्युत्तरं दद्याद्या नारी क्रोधतत्परा ॥ सरमा जायते ग्रामे शृगाली निर्जने वने ॥ ३६ ॥ स्त्रीणां हि प

रमश्चैको नियमः समुदाहृतः ॥ अभ्यर्च्य चरणौ भर्तुर्भोक्तव्यं कृतनिश्चयैः ॥ ३७ ॥ उच्चासनं न सेवेत न व्रजेत्प

रवेश्मसु ॥ न त्रपाकरवाक्यानि वक्तव्यानि कदाचन ॥ ३८ ॥ अपवादो न कर्तव्यः कलहं दूरतस्त्यजेत् ॥ गुरूणां

सन्निधौ वापि नोच्चैर्ब्रूयान्न वा हसेत् ॥ ३९ ॥ या भर्तारं परित्यज्य रहश्चरति दुर्मतिः ॥ उलूकी जायते क्रूरा वृक्ष

कोटरशायिनी ॥ ४० ॥ ताडिता ताडितुं चेच्छेत्सा व्याघ्री वृषदंशिका ॥ कटाक्षयति यान्यं वै केकराक्षी तु जायते ॥ ४१

उल्का स्त्रगयसा तिपेविका विस्समरः ॥ ३९ ॥ ४० ॥ वृषदंशिका मार्जारी व्याघ्रीवत् वृषदंशिके स्येकपदं वा ॥ केकराक्षी निर्यङ्क्षेत्राः वक्रनयने तिया वत् ॥ ४१ ॥ घ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वल्गुर्नामोर्ध्वचरणाधःशिरा वृक्षालंबिनी पक्षिविशेषः॥ स्वविड्भुजा स्वविष्ठाभक्षिणी वल्गुनी चेति पाठे स्वार्थे॥४३॥ यालक्ष्यत्येति यालक्ष्य
त्वंकारं कृत्वा हुंकृत्येति कचित्पाठः॥४४॥ विलुप्यवस्त्रादिना छादयित्वा धार्यस्य तत्भर्तृसंबंधिनी दृष्टिं सक्ते तिवा॥४६॥ बाह्या ठ

याभर्त्तारं परित्यज्य मिष्टमश्नाति केवलं॥ ग्रामे वा शूकरी भूयात् वल्गुर्वापि स्वविड्भुजा॥४३॥ यालंकृत्य प्रियं ब्रूते
मूकासा जायते खलु॥ यासपत्नीं सदेर्ष्येत दुर्भगा सा पुनः पुनः॥४५॥ दृष्टिं विलुप्य भर्त्तुर्या कंचिदन्यं समी
क्षते॥ काणा च विमुखी चापि कुरूपापि च जायते॥४६॥ बाह्यादायांतमालोक्य त्वरिता च जलासनैः॥
तांबूलैर्व्यजनैश्चैव पादसंवाहनादिभिः॥४७॥ तथैव चाटुवचनैः खेदसन्नोदनैः परैः॥ या प्रियं प्रीण
येत्प्रीता त्रिलोकी प्रीणिता तया॥४८॥ मितं ददाति हि पिता मितं भ्राता मितं सुतः॥ अमितस्य हि दातारं भर्त्ता
रं पूजयेत्सदा॥४९॥ भर्त्ता देवो गुरुर्भर्त्ता धर्मतीर्थव्रतानि च॥ तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत्॥५०॥
जीवहीनो यथा देहः क्षणादशुचितां व्रजेत्॥ भर्तृहीना तथा योषित् सुस्नाताप्यशुचिः सदा॥४९॥ अमंगलेभ्यः
सर्वेभ्यो विधवा ह्यत्यमंगला॥ विधवादर्शनात् सिद्धिः क्वापि जातु न जायते॥५०॥ विहाय मातरं चैकां सर्वमं
गलवर्जिता॥ तदाशिषमपि प्राज्ञस्त्यजेदाशीविषोपमां॥५१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

बाह्यप्रदेशात्॥४७॥ खेदसन्नोदनैः खेदापनोदनकर्तृभिः परैरन्यैश्च परैः श्रेष्ठैर्वा॥४८॥४९॥४०॥४२॥५०॥ तदाशिषमित्यत्र मातृव्यति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिक्तरं ऽविषयत्॥ सन्यस्ताखिळकर्मापि पितुर्वंद्यो हि मस्करी॥ सर्ववंद्येन यतिना प्रसूर्वंद्या प्रयत्नत इति॥ अत्रैव वक्ष्यमाणत्वात् आशी
विषोपमां सर्पोपमां॥ सर्पः पृदाकुर्भुजगो भुजंगोहिर्भुजंगमः॥ आशी विषो विषधरश्चक्री व्याळः सरीसृपः इत्यमरः॥ ५१॥ ५२॥ भ
र्तेति स्त्रिया जीवन्मृतो वा भर्त्रा ऽनुयात व्यो ऽनुगंतव्य इत्यर्थः॥ अत्रानुगर्ने दृष्टांतत्रयमाह॥ देहवदिति पाठत्रयेण विद्युता

॥ ५२ ॥ कन्याविवाहसमये वाचयेयुरिति द्विजाः॥ भर्तुः सहचरी भूयां जीवतो ऽजीवतो पि वा॥ परा॥ भर्त्तारं सदा ॥ ५२ ॥
नुयात् देहवच्छायया स्त्रिया॥ चंद्रमा ज्योत्स्नया यद्वद्विद्युता नृविद्युता यथा॥ ५३॥ अनुव्रजं
ती भर्त्तारं गृहात्पितृवनं मुदा॥ पदे पदे श्वमेधस्य फळं प्राप्नोत्यसंशयं॥ ५४॥ व्याळग्राही यथा
व्याळं बळादुद्धरते बिळात्॥ एवमुत्क्रम्य दूतेभ्यः पतिं स्वर्गं नयेत्सती॥ ५५॥ यमदूताः पलायं
ते सतीमालोक्य दूरतः॥ अपि दु[illegible]ष्कृतकर्माणं समुत्सृज्य च तत्पतिं॥ ५६॥ ॥ ॥ ॥

नुमेघः॥ ५३॥ पतिमनुव्रजंती पतिमनुगच्छंती चितारोहार्थमिति शेषः॥ पितृवनं श्मशानं मुदेति बळात्कारेण गमनं वार्यते॥ ५४॥ पतिव्र
तानां माहात्म्यमाह॥ व्याळग्राही सारपत्यशीळवमं[illegible]गोस्यतः प्रोक्तेने न ग्रंथेन व्याळं सर्प्पं ग्रहीतुं शीळं यस्य स व्याळग्राही म
नुष्यः पक्षिविशेषो वा उत्क्रम्य मोचयित्वा॥ ५५॥ ५६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नविश्रीमः न श्रेयं प्राप्नुयुः॥५७॥ दह्यत इति कर्मकर्तर्यात्मनेपदं॥ महस्तेजः॥५८॥ त्वत्रोसहरममाणा अत्री कर्त्री क्रीडमाना इति वा॥ तर्कं चातिस्वः को ज्योर्ध्वकोटीचया

सुमः १ नविश्रीमः नश्रेयं प्राप्नुयुः॥५७॥ दह्यत इति कर्मकर्तर्यात्मनेपदं॥ महस्तेजः॥५८॥ ... ॥६०॥६१॥ विकर्मस्था निंदति॥ शील भंगेनेत्येके ना॥६२॥

या २ निलोमानि मानवे॥ तावत्कालं वसेत्स्वर्गे भर्तारं नु गच्छतीति॥५९॥ के ते धन्यास्तत्राह॥ येषां गेहे पतिव्रतेति॥ शातितत्रतत्रे सत्रवीसावोद्ध्या॥ तत्र तत्र भूमिरि

पुनरपि पतिव्रतायामाहात्म्यमाह॥ पतिव्रताया इत्यष्टभिः॥ पतिव्रतायाश्चरणो यत्र यत्र भुवं भूप्रदेशं स्पृशेत् तस्य

नग

य

॥ न तथा बिभ्रिमो वह्नेर्न तथा विद्युतोऽथवा॥ आप तं तीसमालोक्य च यं दूताः पतिव्रतां॥५७॥ न पन स्तपते॥

॥ स्वं तं दहनोऽपि न दह्यते॥ कंपंते सर्वतेजांसि दृष्ट्वा पातिव्रतं महः॥५८॥ यावल्लोम संख्यास्ति तावत्को॥

॥ द्ध्युतानि चा॥ भर्त्रा स्वर्गसुखं भुंक्ते रममाणा पतिव्रता॥५९॥ धन्या सा जननी लोके धन्योऽसौ जनकः पुनः॥

॥ धन्यः स च पतिः श्रीमान्येषां गेहे पतिव्रता॥६०॥ पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः॥ पतिव्रतायाः पु

॥ ण्येन स्वर्गसौख्यानि भुंजते॥६१॥ शीलभंगेन दुर्वृत्ताः पातयंति कुलत्रयं॥ पितुर्मातुस्तथा पत्युरिहामुत्र च दुः॥

॥ खिताः॥६२॥ पतिव्रतायाश्चरणो यत्र यत्र स्पृशेद्भुवं॥ तत्रेति भूमिर्मन्येत नात्र भारोऽतिपावनी॥६३॥ छ॥[illegible]॥छ॥

॥ विभ्यत्पतिव्रतास्पर्शं कुरुते भानुमानपि॥ सोमो गंधर्वहव्यापि स्वपावित्र्याय नान्यथा॥६४॥

स्व

तिमन्येत मन्यते॥ किंतदाह॥ नात्र मम भारोऽस्ति किंत्वनेन पादस्पर्शेनाहं पावनी पवित्र्यकर्त्री पवित्रेति वा॥६३॥ विभ्यत्स्वयं कुर्वाणां अर्थात्सापेभ्य इति त्रयाणां विशेषणं॥६४॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धा०

जाड्यं जडत्वमज्ञानं तु राक्षो वैरिणार्थः ॥ अन्यपावना अन्येषां पावनकर्त्र्यः ॥ ६५ ॥ एवंभूता तु भार्या दुर्लभेत्याह गृहे गृहे इति रूपलावण्यगर्विताः रूपमंगसौष्ठवं लावण्यं
कांतिस्ताभ्यां गर्विताः ॥ ६६ ॥ ६७ ॥ परेति ॥ भार्यया द्वयं जीयत इति सामान्येनान्वयः ॥ प्रश्ना त्वं किं द्वयमित्याशंक्याह ॥ परलोकोयं लोक इति देवपित्र्यातिथि

॥ आपः पतिव्रतास्पर्शमभिलष्यंति सर्वदा ॥ अद्यजाड्यविनाशो नो जातास्त्वद्यान्यपावनाः ॥ ६५ ॥ गृहे गृहे न किं नार्यो रू ॥

(५३) ॥ रूपलावण्यगर्विताः ॥ परं विश्वेशभक्त्यैव लभ्यते स्त्री पतिव्रता ॥ ६६ ॥ भार्या मूलं गृहस्थस्य भार्या मूलं सुखस्य च ॥ ॥

॥ भार्या धर्मफलावाप्त्यै भार्या संतानहेतवे ॥ ६७ ॥ परलोकस्त्वयं लोको जीयते भार्यया द्वयं ॥ देवपित्र्यातिथीज्या ॥

॥ दिनाभार्यः कर्म चार्हति ॥ ६८ ॥ गृहस्थः स हि विज्ञेयो यस्य गेहे पतिव्रता ॥ यथा ग्रसते न्या प्रतिदिनं जरया राक्षसी ॥ ॥

॥ स्याथवा ॥ ६९ ॥ यथा गंगावगाहेन शरीरं पावनं भवेत् ॥ तथा पतिव्रतां दृष्ट्वा सदनं पावनं भवेत् ॥ ७० ॥ अनुया ॥५ पावने

॥ तिनमात्तरं यदि देवात्कथंचन ॥ तथापि शीलसंरक्ष्यं शीलभंगात्पतत्यधः ॥ ७१ ॥ तद्दैगुण्यादपि स्वर्गी सतिः पा ॥

॥ तिनान्यथा ॥ तस्याः पिता च माता च भ्रातृवर्गस्तथैव च ॥ ७२ ॥ सांबकर्पूरगौरायगंगा शिवेभ्यः सततं नमः ॥ छ ॥ घ ॥

था ज्यादि कर्मेत्यन्वयः ॥ अन्याः पतिव्रताः प्रतिपदं प्रतिक्षणं प्रतिदिनमिति क्रियासात्म्यः ॥ ६९ ॥ जंबैराक्षसी तया जरया राक्षस्या ग्रस्य तइति शेषः ॥ ६९ ॥ अवेति यथेति
था ज्यादिकर्मेत्यन्वयः ॥ अन्याः पतिव्रताः प्रतिपदं प्रतिक्षणं प्रतिदिनमिति ... ॥ ७० ॥ अनुयातिनमत्तरमिति शीलं पाति
ते जरया नाम राक्षस्या वाय थे तिदृष्टांतलेनवास्य्येयं स भर्तृकारणा पतिव्रता नाधर्मानुलोक ... उपकृते ॥ ७० ॥

२४ म०

(१३)

भावे सहृत्त इत्यर्थः ॥ ७१ ॥ तद्देगुण्याघी छवैगुण्यात्पार्थवैगुण्याद्धा ॥ तथा चोक्तं ॥ पतत्यर्द्धशरीरेण यस्य भार्या सुरीपि वे दिलिन स्याः पित्रा
दयोपि तथैव पतंती त्याहतस्याइति ॥ ७२ ॥ भर्तृविहिनायाः पतिव्रतायाः अ॰नि ऋषि लोककष्टशंकां शातयति ॥ पत्या विति ॥ ७३ ॥ विध्वेति
विधवायाः यः कबरीवंधः कबरीकेशवेशाः कबरीकेशवेशा इत्यमरः ॥ तस्याः बंधो व्यसनं बंधकं व्यसनमित्यमरः ॥ स एव भर्तृबंधाय एव स्वर्ग्य
सनाय नरकाय जायत इत्यर्थः ॥ ७४ ॥ चांद्रायणमथापि वेति चांद्रायणपराककृच्छ्रतप्तकृच्छ्राणां स्वरूपपरासरसंहितायामुक्तं ॥ एकैकं व

पत्यौ मृते च या योषिद्वैधव्यं पालयेत्तथा कचित् ॥ सा पुनः प्राप्य भर्तारं स्वर्गभोगान्समश्नुते ॥ ७३ ॥ विधवाकबरी
बंधो भर्तृबंधाय जायते ॥ शिरसो वपनं तस्मात्कार्यं विधवया सदा ॥ ७४ ॥ एकाहारः सदा कार्यो नि द्वितीयः क
दाचन ॥ त्रिरात्रं पंचरात्रं वा पक्षं व्रतमथापि मा ॥ ७५ ॥ मासोपवासं वा कुर्याच्चांद्रायणमथापि वा ॥ कृच्छ्रं पराकं वा
कुर्यात्तप्तकृच्छ्रमथापि वा ॥ ७६ ॥

द्धयेत्तथा संस्कृत्ये कृच्छ्रे तु ह्रासयेत् ॥ ॥ अमावास्यां न भुंजीत एष चांद्रायणो विधिरिति ॥ कुक्कुटस्यांडमानं तु ग्रासं हि परिकल्पयेत् ॥ अन्यथा भावदोषेण
न धर्मो न च शुध्यती नियतात्मनो प्रमत्तैर्द्वादशाहमभोजनं पराको नाम कृच्छ्रः पंसर्वपापप्रणोदन इति ॥ त्र्यहमुष्णं पिबेदापः त्र्यहमुष्णं पयः पिबेत् ॥ त्र्यहमु
ऽ स्प॰ ष्णं पयः पीत्वा वायुभक्षो दिनत्रयं ॥ षट्पलं तु पिबेदापः त्रिपलं तु पयः पिबेत् ॥ पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७७॥ अत्रापिवक्ष्यति।पर्यंकशायिनीरवन्नारायिनीतावीत्यप्रयोगात्तदा स्विरकर्थं विद्धयनेदोषोनास्तीति ध्वनितं॥७८॥७९॥

शाकाहारैः १ यवान्नैर्वा फलाहारैः पयोव्रतैः॥प्राणयात्राप्रकुर्वीत यावत्प्राणाःस्वयंव्रजेत्॥७७॥ पर्यंकशायिनीनारीविधवापा

१८ ॥५४॥ १८ तयेत्पतिं॥तस्माद्भूशयनंकार्यंपतिसौख्यसमीहया॥७८॥नैवांगोद्वर्त्तनंकार्यंस्त्रियाविधवयाक्वचित्॥गं ॥ ५

धद्रव्यस्यसंयोगोनैवकार्यस्तयापुनः॥७९॥ तर्प्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः॥तत्पितुस्तत्पितु

श्चापिनामगोत्रादिपूर्वकं॥८०॥ विष्णोस्तुपूजनंकार्यंपतिबुध्यावनान्यथा॥पतिमेवसदाध्यायेद्विष्णु

रूपधरंहरिं॥८१॥ यद्यदिष्टतमंलोकेयच्चपत्युःसमीहितं॥तत्तद्गुणवतेदेयंपतिप्रीणनकाम्यया॥८२॥

वैशाखेकार्तिकेमाघेविशेषनियमांश्चरेत्॥स्नानंदानंतीर्थयात्रांविष्णोर्नामग्रहंमुहुः॥८३॥ वैशाखेज

लकुंभाश्चकार्तिकेघृतदीपकाः॥माघेधान्यतिलोत्सर्गःस्वर्गलोकेविशिष्यते॥८४॥ प्रपाकार्याचवैशाखेदे

व्य वेदेयागलंतिका॥उपानद्व्यजनंछत्रंसूक्ष्मवासांसिचंदनं॥८५॥सकर्पूरंचताम्बूलंपुष्पदानंतथैवच॥जलपात्रा

एयनेकानितथापुष्पगृहाणिच॥८६॥

॥८०॥८१॥८२॥८३॥८४॥प्रपाजलशाला॥प्रपापानीयशालिकेत्यमरः॥गलंतिकादेवोपरिदीयमानकुंभस्थजलधारा॥८५॥अन्यच्चसकर्पूरमितिस्पष्टार्थं॥८६॥ कर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

105

द्राक्षा मद्वीका ऊर्जे कार्त्तिके वृंताकं प्रसिद्धं स्मरणमर्षघ्नं शुकशिंबिं शुकनासा का... रशिंबिं तां निष्पावमिति यावत् शुकशिंबीतिपा
ठे दीर्घाकारां मृदुं शिंबीमित्यर्थः ॥ ८८ ॥ वापि शब्दो समुच्चय वाचिनौ ॥ संधितं संधानं चिन्चामलकादीनां ॥ चुकुसंधितमिति पाठे चुक्रं

॥ पानानि च विचित्राणि द्राक्षारसादिकानि च ॥ देयानि द्विजमुख्येभ्यः पतिर्मे प्रीयतामिति ॥ ८७ ॥
॥ ऊर्जे यवान्नमश्नीयादेकान्नमथ वा पुनः ॥ वृंताकं स्मरणं चैव शुकशिंबिं च वर्जयेत् ॥ ८८ ॥ ॥
॥ कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु ॥ कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके वापि संधितं ॥ ८९ ॥ ७ ॥
॥ कार्त्तिके मौननियमे घंटां चारु प्रदापयेत् ॥ पत्रभोजी कांस्यपात्रं घृतपूर्णं प्रयच्छति ॥ ८० ॥ ७ ७ ॥
॥ भूमिशय्याव्रते देया शय्या श्लक्ष्णा सतूलिका ॥ फलत्यागे फलं देयं रसस्यागे च तद्रसः ॥ ... ॥ ८१
॥ धान्यत्यागे च तद्धान्यमथ वा शालयः स्मृताः ॥ धेनुं दद्यात्प्रयत्नेन सालंकारां सकांचनाः ॥ ८२
॥ एकान्ते सर्वदानानि दीपदानं तथैकतः ॥ कार्त्तिके दीपदानस्य कलां नार्हंति षोडशीं ॥ ८३ ॥ ७ ॥
॥ किंचिदभ्युदिते सूर्ये माघस्नानं समाचरेत् ॥ यथाशक्त्या च नियमान्माघः स्नायी समाचरेत् ॥
॥ ८४ ॥ पक्वान्नैर्भोजयेद्विप्रान्सपत्नीनोपितपरिवेषः ॥ लडुकैः फेनिका... मिश्र वटकैंडीरिकादिभिः ॥ ८५

संधितं च चुक्रेणाम्लवृक्षाम्लेन अम्लेन वा ... चुक्रं वृक्षाम्ले चांगेर्यां स्त्रीपुंस्य म्लेऽम्लवेतसद्रुतिमेदिनी कारः ॥ ८९ ॥ प्रयच्छति प्रयच्छेत् ॥ ८०
॥ ८१ ॥ ८२ ॥ ८३ ॥ किंचिदभ्युदिते अरुणोदये इत्यर्थः ॥ यथाशक्त्या यथाशक्ति ॥ ८४ ॥ वटके तिइंडरिकेंइंडरीतिपुरुषोत्तमे ... प्रसिद्ध
आदिशब्देन पुरीकचुरीमंडकादयोग्राह्याः ॥ ८५ ॥ श्रीकृष्णायनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०८

-२०४

गर्भेशर्करया पूर्णैरितियथासंख्यं बोद्धव्यं ॥९६॥ कंचुकशब्देनात्र पुरुषपरिधेयं शीतत्राणं वस्त्रं गृह्यते न स्तपवीतिकां स्त्रीणां स्तनप्रावरणं
॥९७॥ मंजिष्ठारक्तवासांसि मंजिष्ठयारक्तवस्त्राणि ॥९८॥ ९९॥ घृतकंबलरूजासिर्द्धतनिर्मि[illegible]तं कंबलरूजासिर्वदारिकास्त्रमेश्रीना
प संलेप्रसिद्धाः ॥ कर्मधारयो द्वंद्वो वा गर्भागारे अगारस्य गर्भे ग[illegible]र्भागारं तस्मिन् देवाळयमध्य इत्यर्थः ॥१००॥१०१॥ अनड्वाहं बलीवर्दं

॥ घृतं पञ्चैः समरिचैः शुचिकर्पूरवासितैः ॥ गर्भेशर्करया पूर्णैर्नेत्रानंदैः सुगंधिभिः ॥९६॥ घृतांस्तु कंचना
५५ ॥ नां भासां श्रद्धया शीतापनुत्तये ॥ कंचुकं तूलपूर्णं गर्भे च तूलिकां स्तपवीतिकां ॥९७॥ मंजिष्ठारक्त ॥ ५५
॥ वासांसि तथा तूलवर्ती पटी ॥ जातीफळलवंगैश्च तांबूलानि बहून्यपि ॥९८॥ कंबला
वि४ ॥ नि चित्राणि निर्वातानि गृहाणि च ॥ मृदुलाः पादरक्षाश्च सुगंधघृतवर्तनानि च ॥९९॥ घृत द
॥ कंबलरूजासिं महास्तान्पुरःसरं ॥ कृष्णागरुप्रभृतिभिर्गर्भागारे प्रधूपनैः ॥१००॥
॥ स्थूलवर्तिप्रदीपैश्च नैवेद्यैर्विविधैस्तथा ॥ सर्वस्वरूपोपभोगावानुप्रियतामिति चोच्चरेत्
॥१०१॥ एवंविधैश्चाविधवा विविधैर्नियमैर्व्रतैः ॥ वेश्यास्वानुकारिकानुमाधानेवमेवाति वाह
॥ येत् ॥१०२॥ नाधिरोहेदनड्वाहं प्राणैः कंठगतैरपि ॥ कंचुकं न परीदध्यात् दासो न विकृतं वसेत्
छा० ॥१०३॥ अपृष्ट्वा तु सुतान्नूकिंचिन्न कुर्याद्भर्तृतत्परा ॥ एवं चर्या पराणि संविध वापि श्रुतामता ॥१०४॥

विकृतं विशेषेण कृतं चित्रमित्यर्थः ॥ न्यसेत्स्थापयेदित्यर्थः ॥ वसेदिति सेव पाठः ॥१००॥३॥ उपसंहरति एवं चर्येति ॥१०४॥१०५॥१०६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

107

लोपामुद्रां स्तौतीति॥ गंगेति॥ तव दर्शनं यज्ञातं एतद्गंगास्नानफलजातमिति संबंधः॥ तु शब्दोऽवधारणार्थे जातमेवेत्यर्थः॥१०७॥ प्रणतिपूर्वकं सभार्यमगस्त्यं स्तौतीति॥ प्रणम्येति॥ काकाक्षिन्यायेन प्रणम्येत्यस्योभयत्र संबं

एवंधर्मसमायुक्ता विधवापि पतिव्रता॥ पतिलोकानवाप्नोति न भवेत्क्वापि दुःखभाक्॥१०५॥
न गंगया तया भेदो या नारी पतिदेवता॥ उमाशिवसमा साक्षात्तस्मात्तां पूजयेद्बुधः॥१०६॥ बृहतिस्य
स्व॰वाच॥ गंगास्नानफलं त्वेतद्यज्ञातं तव दर्शनं॥ लोपामुद्रे महामातर्भर्तृपादांबुजेक्षणे॥१०७॥
इति स्तुत्वा महाभागां राजपुत्रीं पतिव्रतां॥ प्रणम्य चाऽगुरुः प्राह मुनिं सर्वार्थकोविदः॥१०८॥ प्रणव
स्त्वं श्रुतिरियं क्षमैषा त्वं स्वयं तपः॥ सत्क्रियेयं फलं त्वं हि धन्योसीति महामुने॥१०९॥ इदं पाति
व्रतं तेजो ब्रह्मतेजो भवान्परं॥ तत्राप्येतत्तपस्तेजः किमसाध्यतमं तव॥११०॥ तवनाविदितं
किंचित्तथापि च वदाम्यहं॥ यदर्थमागता देवास्तन्मुने त्वं निशामय॥१११॥

धः॥ चकारः समुच्चये संप्रत्येमेवा॥१०८॥ कार्यं विज्ञापयितुं तस्य किमप्यसाध्यं नास्तीत्याह॥ इदमिति॥ तेजो
विशेषणस्याद्यत्वं द्रष्टव्यमिति वा पाठः॥ पातिव्रतायाः इदं पातिव्रतं॥११०॥ कार्यं निवेदयितुं परीपाटिं रचयतीति तवेति

टिकातिवा ॥७९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

104

॥ ५६ ॥

केतेदेवा इति एषच्छायां प्राधान्येना ष्टलोकपालान्निर्दिशति अयमित्यादिना अयमिति धृ चालनेन निर्दिश
ति त्वत्प्रसादं नेत्रावलोकप्रसादं प्रतीक्षते तवेति शेषः ॥११२॥ कामधेनुव्रजः कामधेनुसमूहः ॥११३॥ चिं

अयं शतमखः श्रीमान्वृत्रहा कुलिशायुधः ॥ सिद्धसृष्टकंहि प द्वारि त्वत्प्रसादं प्रतीक्षते ॥११२॥
यस्य पुर्य्याः पारिसरे कामधेनुव्रजश्चरेत ॥ पत्सौराः कल्पवृक्षाणां निसंघ्छायासु शेरते ॥११३॥
यद्रथ्यासु च तिष्ठंति ते चिंतामणिकर्करः ॥ अयमग्निर्जगद्योनिर्धर्मराजस्त्वयं पुनः ॥११४॥
निर्ऋतिर्वरुणो वायुः श्रीदरुद्रादयस्त्वमी ॥ आराध्यंते च [illegible] सर्वकामार्थसंभवाः ॥११५॥
समस्त्यर्थ इतारोमी वैपाच्यस्तु जगत्कृते ॥ वाडमो त्रैनसाध्यंते तत्त्वविस्वोपकारक ॥११६॥
कश्चिच्छैलो विंध्यनामा भानुमार्गविरोधकः ॥ वर्द्धितस्पर्द्धया मेरोस्तद्वृद्धिस्त्वंनिवारय ॥११७॥
९ येचस्वभाकाठि नायेच मार्गनिरोधका ॥ संस्पर्द्धया वर्द्धितं तस्त वृद्धिर्वर्द्धिता ऽशुभा ॥११८॥

तामणि कर्कराः ॥ चिंतामणय एव अतिसुलभत्वेन कर्कराः क्षुद्रपाषाणाः ॥११४॥ श्रीदो धनेशः रुद्र ईशाए
तो आदी येषां ते तथा ॥ अमी इसंगुल्या निर्दिशति ॥११५॥ तु शब्दः स्मरणार्थः या व्यस्ते तो स्तीति शेषः ॥ न चेत
यां वा स्मरणं त वा सा ध्यामि सा ह ॥ वाङ्मात्रेणेति ॥११६॥ एवं परिपाटी कृत्वा साक्षादेव कार्यं निर्दिशति ॥ कश्चिदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लो

४ श्रीवेदव्यास उवाच॥ इमं पतिव्रताध्यायं श्रुत्वा स्त्री पुरुषोऽपि वा॥ पापकंचुकमुत्सृज्य शक्रशोकं चय
इति॥१२॥

इ तीति॥ गुरोर्बृहस्पतेः॥ अथेति तदृष्टिनिवारणं कर्तव्यमिसेवं रूपं प्रत्युत्तरं दत्तवानित्यर्थः॥ तत्रातीति पाठे तद्वचः प्रति प्रत्युत्तरं दत्तवा
न्॥११९॥ किं तत्प्रत्युत्तरं तदाह॥ साधयिष्यामीति॥ अन्यस्मिन्नूप्रक्षविस्त्येति पृथग्वाक्यं॥१२०॥ एतदध्यायश्रवणं
फलमाह॥ इम मिति पापकं पापमेव कंचुको निर्मोकस्तं। समोकंचुकनिर्मोका विषमरः॥ अयं भावः॥ यथा सर्पो जीर्णं कंचु

इति श्रुत्वा गुरोर्वाक्यमविचार्य महामुनिः॥ क्षणं मुनिः समाधायतथेति प्रत्युवाच ह॥११९॥ साधयिष्या
मि वः कार्यं विसर्ज्येति दिवौकसः॥ पुनश्चिंताप रोऽभूत्वा ऽगस्तिर्ध्यानपरोऽभवत्॥१२०॥४॥ ॥ ॥
इति श्रीस्कंदपुराणे काशीखंडे लोपामुद्रोपाख्यानं नाम चतुर्थोऽध्यायः॥४॥ ॥पाराशर उवा
च॥ ॥ततो ध्यानेन विश्वेशमालोक्य स मुनीश्वरः॥ स्मृतप्रोवाच तां पुण्यां लोपामुद्रामिदं वचः॥१॥
अयि पश्य वरारोहे किमेतत्समुपस्थितं॥ क्व तत्कार्यं क्व च वयं मुनिमार्गानुसारिणः॥२॥ ॥

चं मुंचति एवं पुण्यजरजीर्णपापकंचुकं त्यक्त्वेति॥१२०॥ ॥इति श्रीरमानंदकृतायां काशीखंडटीकायां लोपामुद्रोपाख्यानं ना
म चतुर्थोऽध्यायः॥४॥ पंचमे वर्ण्यते देवैरिंद्राद्यैः स्वार्थसाधकैः॥ अगस्त्यस्य सभार्यस्य प्रस्थानं सविमुक्तितः॥१॥ अगस्तिर्ध्यान
परो भवदित्युक्तं ततः परं किं जातमित्याकांक्षायामाह॥ तत इति सूत लोमहर्षण॥१॥ अयीति संबोधने वरारोहे श्रेष्ठजघने अयीति कोमलः॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११०

गोत्रभिदाहं इति विपक्षा निगतपत्त्राः ॥ गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहमित्यमरः ॥३॥ कुक्षिर्वा वज्रं ह्रादिनी वज्रमस्त्री स्यात्कुलिशं
भिदुरं पविरित्यमरः ॥ सिद्ध्यष्टकमणिमादिकं पद्मादिकं वा ॥४॥ दावाग्निना वह्निना वा प्रळयवह्निना वा व्याकुल्यो क्रियंत एव दावाग्नि
नापीत्यपि राष्ट्रार्थः येषौ लाद्दस्यन्वयः ॥ तद्धद्भिस्तंभने तेषां द्रोणानां वृद्धिनिवारणे। आशुशुक्षणिर्वह्निः ॥५॥ दंडधरो यमः ॥ आव

११ ॥५७॥ ११

येन गोत्रभिदा गोत्रा विपक्षा हेळया कृताः ॥ भवेत्कुंठितसामर्थ्यः स कथं गिरिमात्रके ॥३॥ कल्पवृक्षोंगणे
यस्य कुक्षिशं यस्य चायुधं ॥ सिद्ध्यष्टकं च यद्वारि स सिध्येत्प्रार्थये कथं ॥४॥ क्रियंते व्याकुलाः शोका यदहो
दावाग्निनापि ये ॥ तद्धद्भिस्तंभने शक्तिः कृशानोराशुशुक्षणेः ॥५॥ भियं नासर्व भूतानां यो सौ दंडध
रः प्रभुः ॥ स किं दंडयितुं नाळमेकं तं ग्रावमात्रकं ॥६॥ आदित्या वसवो रुद्रास्तुषिताः समरुद्गणाः ॥ विश्वेदे
वास्तथा दस्रौ ये चान्येपि दिवौकसः ॥७॥ एषां दृक्पातमात्रेण ^ ते किं समर्था नो कांते नगवृद्धिनिषेधने ॥८॥

मात्रके पर्वते कस्मात्रके अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाइत्यमरः ॥ मात्रं कार्त्स्न्येवधारणे इति च ॥६॥ आदित्या विष्णुरक्राद्या
द्वादश वसवश्राप ध्रुवा द्याः अष्टौ रुद्राः अजैकपाद्याः एकादश तुषिताः षट्त्रिंशत् मरुतः पूतास प्रमुखाः एकोनपंचाशत् वि
श्वेदेवा विष्कंभप्रमुखास्त्रयोदश दस्रौ अश्विनीसुतौ ॥८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वार

११ ॥५

^पतिंति
वनान्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१११

समर्थैरपि देवैर्विघ्ननिवारणोऽस्मिन्न्प्रार्थिते हेतुनिर्द्वारमन्तिर्च्यज्ञातमिति॥ आङितिस्मृतिद्योतकमव्ययं॥ स्मृतमनुवदति॥ यद्वा आ इति सांतःपीडायां खेदइतियावत्॥ आस्कंसोल्कोपपीडयोरित्यमरः॥१॥ वाक्यमेव निर्दिशति॥ अविमुक्तमिति॥ सततमित्यनेन श्रेयांसि बहुविघ्नानि भवंति महतामपीति न्यायस्तत्त्वेन पूर्वकमसतां विघ्नान भवीष्यंतीति ध्वनितं॥ तत्र कस्मान्नेषामीश्वरेण घोनिनीषितत्वा

आज्ञातं कारणं तत्र स्मृतं वाक्यं सुभाषितं॥ काशीमुद्दिश्य यन्नीतं मुनिभिस्तत्त्वदर्शिभिः॥९॥
अविमुक्तं न मोक्तव्यं सर्वथैव मुमुक्षुभिः॥ किंतु विघ्नाः स्पृशंति काश्यां निवसतां सतां॥१०॥

त्वागतमासाद्य कुकर्मकारयन्निति मघोनिनीषतीति श्रुतं॥ अशनं वसनं वासः काश्यां येषां समागतः॥ कैकटेन समा काशी सत्यं सत्यं खगेश्वरेति आदि गरुडपुराणादिवचनदर्शनाच्च॥ ॥१०॥ ॥छ॥ ॥छ॥ छ॥ छ॥ ॥छ॥ ॥छ॥ श्रीरस्तु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवांतरेति॥ अस्यायमर्थः॥ नवांतरायसंसारांतरायावृर्जितोद्यासमंताद्वर्जितोहृरीकृतः श्रीमहेशेन अर्पितः पुण्यराशिः पुण्यपुंजोर्थात्कर्तृक्षि
र्यस्यांसातथातस्यां यस्यांक्रियमाणः पुण्यवंसंचयोयोजन्मांतरायनश्यवतीत्यर्थः॥ वक्ष्यति॥ ईश्वरः सर्वपुण्यां वाराणसीपुरीतियद्वाभ
वांतरेभवस्वरूपेविश्वनाथइत्यर्थः॥ अंतरशब्दस्यस्वरूपवाचित्वं॥ रात्रौस्वप्नांतरेब्रह्मनूमयाहृष्टोहरायुतावित्यादिहरिवंशादौप्रसिद्धं॥

॥५८॥ आवर्जितः अर्जितः अर्पितः पुण्यानांराशिर्यस्यांसातथातांपत्रलेऽर्जनैः पुण्यराशिरपिविश्वेश्वरे अर्पितेक्षुद्रफलत्वाद्यातदनुष्ठानात्न

भवांतरावर्जितपुण्यराशिक्षेत्रैर्महीद्भिर्विनिमय्यकाशी॥ प्राप्यापिकिंमूढधियोन्यतोवैयियासवोदुर्गतिर्मुखियासवः॥ २१॥ द्वि ॥५

सागन्अहूरतइतिभावः॥ यद्वाभवांतरेसर्व अंतरशब्दस्यरूपवाचित्वात्॥ रातिददातीतिभवांतराअविघातयावर्जिताः पुण्यराशयः पुण्यपुंजा
पुण्यानांराशियैषांतितथासुकृतिनइतिवायस्यांसातथोक्तानां अवीघाविनाशेंबाजेषामितिस्या वः यद्वाभवांतरेषु आवर्जितानिसं
संपादितानियानिपुण्यानितेषांराशिरराशिभूताअनेकजन्मांतरार्जितसुकृतैकपुण्यामित्यर्थः एवंभूताकाशीविप्रसिद्धाशास्त्रवि
दज्जनमुखादवगम्यज्ञात्वापश्चान्महद्भिः क्षेत्रैः वेत्समश्रमहेशोल्लिकतस्करजनितविविधदुःखैः प्राप्यापिमूढधियो॥ श्रीरस्तु॥ छ

CC-0. In Public Domain,Kavikulguru Kalidas Sanskrit University Ramtek Collection

113

दि
सुप्तविवेकाः संतोऽदुर्गतिमुक्तियासवोदुःखं प्राप्तुमिच्छवोऽन्यत्र क्रियियासवो गंतुमिच्छवः स्युः॥ अपितु नस्युरेवेत्यर्थः॥ हृच्छैर्महद्भिर्विनिर्यम्यकाशीमितिपाठेऽच्छै सु २
ःकष्टसाध्यैःमहद्भिःपुण्यैर्विर्यैर्निर्म्यपरिवर्तप्राप्याप्यापीतिवाख्येयं॥११॥ क्वकाशिकेति॥ अस्यायमर्थः॥ काशिकाक्वकुत्र॥ काशिकात्वमेवकुत्यादयति॥ विश्वपदप्रको
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ससद्रुदां शीलतटादयोर्मिगात्॥ तत्राभिषेकं कुरुषां उपुत्रनवारिणाशुद्ध्यति चांतरात्मा॥ इति भगवच्छंकराचार्यस्य चायमभिसंधे
दाब्देवाश्रुपवित्रं रसस्त्रमेकतां॥ व्रजेत्तन्मानसं तीर्थं यस्मिन्स्नात्वा च तन्नो भवेदिति॥ एकवचनमनेकजीवाभिप्रायं स्व
जात्यभिप्रायं वा॥४१॥४२॥ उद्देशाः उत्सृष्टा देशा अवयवाः॥४३॥ मानसेषु चेति॥ चकारात्तस्यादिषु च॥ उभयेष्वपीति॥
अपिशब्दात्तेष्वपि॥४४॥ यस्येति॥ यस्य हस्तादिसुसंयुतं स्नानमिति॥४५॥ अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य

एतत्ते कथितं देवि मानसं तीर्थलक्षणं॥ भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु॥४२॥
यथा शरीरस्योद्देशाः केचिन्मध्यतमाः स्मृताः॥ तथा पृथिव्यामुद्देशाः केचित्पुण्यतमाः
स्मृताः॥४३॥ प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसा॥ परिग्रहान्मुनीनां च तीर्था
नां पुण्यता स्मृता॥४४॥ तस्माद्भौमेषु तीर्थेषु मानसेषु च नित्यशः॥ उभयेष्वपि यः
स्नाति स याति परमां गतिं॥४५॥ अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च॥ अदत्वा कां

चनं गां च दरिद्रो नाम जायते॥४६॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः॥ न तत्फलमवाप्नोति तीर्थाभिग
मनेन यत्॥४७॥ यस्य हस्तौ च पादौ च मनश्चैव सुसंयुतं॥ विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते॥४८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्या० सतीर्थफलमश्नुते इत्यन्वयः तत्र हस्तसंयमः प्रतिग्रहपरपीडनादिनिवृत्तिः पादसंयमः दृष्टिपूतेन देशे पा
दप्रक्षेपादिः मनः संयमो निषिद्धचिंतनाभावः विद्या मंत्रोपासनादिलक्षणा तपः स्वधर्मादच्युतिः की
पर्व० र्तिः साधुतया विर्ष्यातंवर्णनं एतत्रितयं च यस्य स्यादिति ॥४८॥ अदंभक इति धर्मो दंभो धर्मध्वजित्वं नविद्यतेदं

८८

॥ ८० ॥

८८

प्रतिग्रहादुपावृत्तः संतुष्टो येनकेनचित् ॥ अहंकारविमुक्तश्च स तीर्थफलमश्नुते ॥४९॥
अदंभको निरारंभो लघ्वाहारो जितेंद्रियः ॥ विमुक्तः सर्वसंगैर्यः स तीर्थफलमश्नुते ॥५०॥
अकोपनोऽमलमतिः सत्यवादी दृढव्रतः ॥ आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥५१॥
तीर्थान्यनुसरन्धीरः श्रद्दधानः समाहितः ॥ कृतपापो विशुद्ध्येत किंपुनः शुद्धक
र्मकृत् ॥५२॥ तिर्यग्योनिं न वै गच्छेत् कुदेशे नैव जायते ॥ न दुःखी स्यात्स्वर्गभाक्च नो
क्षोपायं च विंदति ॥५३॥

योपस्य स तथा स्वार्थकः आदांभिक इत्यर्थः इति धाचिस्पाठः ॥ तीर्थान्यनुसरन्धीर इति धीरः धर्माधर्मे
विद्वान् ॥ तिर्यग्योनिं नैव गच्छेत् तीर्थान्यनुसरन् निसेव ॥५४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

157

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(158)

अश्रद्दधानः अशुभमकुर्वाणः॥ पापात्मा बैडालव्रतिकः॥ नास्तिकः पाखंडः॥ [illegible] अछिन्नसंशयः॥ नछिन्नो न नष्टः सं
शयो यस्य सतथा॥ संशयात्मेत्यर्थः॥ हेतुनिष्ठो हेतुकः॥ तदुक्तं गीतायां॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीति
नायं लोकोस्ति न परो न सुखं संशयात्मनः॥ इति वेदोक्तं च॥ पाखंडिनो विकर्मस्थान् बैडालव्रतिकान् शठान् हैतुकान्

अश्रद्दधानः पापात्मा नास्तिकोछिन्नसंशयः॥ हेतुनिष्ठश्च पंचैते न तीर्थफलभागिनः॥५४॥
तीर्थानि च यथोक्तेन विधिना संचरंति ये॥ सर्वद्वंद्वसहा धीरास्ते नराः स्वर्गगामिनः॥५५॥ तीर्थ
यात्रां चिकीर्षुः प्राक् विधायोपोषणं गृहे॥ गणेशं च पितॄन् विप्रान् साधून् शक्त्या प्रपूजयेच॥५६॥
कृतपारणको हृष्टो गच्छेन्नियमधृक् पुनः॥ आगत्याभ्यर्च्य च पितॄन् यथोक्तफलभाग् भवेत्॥५७॥
न परीक्ष्यो द्विजस्तीर्थे तीर्थार्थी भोज्य एव च॥ सक्तुभिः पिंडदानं च चरुणा पायसेन च॥५८॥

बकवत् तीर्थवासमात्रेणापि नार्चयेदिति॥ बैडालव्रतिकादीनां चेदं लक्षणं॥ यस्य धर्मध्वजो नित्यं सुरध्वज इवो
च्छ्रितः॥ प्रछिन्नानि च पापानि बैडालं नाम तद्व्रतं॥ भ्रष्टः स्वधर्मात् पाखंडो विकर्मस्थो निषिद्धकृत्॥ संदेहकृ
द्धेतुभिर्यः सत्कर्मसु स हैतुक इति॥ मंडरहितं भक्तं चरुः॥५८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का० पृ० ४०

॥ ८९ ॥

पिण्याकमत्रतिलपिष्टंप्रसंगेनकार्यांतराण्युद्दिश्येत्यर्थः ॥ कुशप्रतिकृति [illegible]निति ॥ जीवतांदूरदेशस्थानां
कर्तव्यमृषिभिर्दृष्टंपिण्याकेनगुडेनच ॥ श्राद्धंतत्रप्रकर्तव्यमर्घावाहनवर्जितं ॥ ५९ ॥
अकालेप्यथवाकालेतीर्थेश्राद्धंचतर्पणं ॥ अविलंबेनकर्तव्यंनैवविघ्नंसमाचरेत् ॥ ६० ॥
तीर्थंप्राप्यप्रसंगेनस्नानंतीर्थेसमाचरेत् ॥ स्नानजंफलमाप्नोतितीर्थयात्राश्रितंनहि ॥ ६१ ॥
नृणांपापकृतांतीर्थेपापस्यशमनंभवेत् ॥ यथोक्तफलदंतीर्थंभवेच्छुद्धात्मनांनृणां ॥ ६२ ॥
शोडशांशंस्वचलभतेपः परार्थेनचागच्छति ॥ अर्द्धंतीर्थफलंतस्ययःप्रसंगेनगच्छति ॥ ६३ ॥ कुशप्र
तिकृतिंकृत्वातीर्थवारिणिमज्जयेत् ॥ मज्जयेच्चयमुद्दिश्यसोष्टभागंलभेतवै ॥ ६४ ॥ तीर्थोप
वासःकर्तव्यःशिरसोमुंडनंतथा ॥ शिरोगतानिपापानियांतिमुंडनतोयतः ॥ ६५ ॥ यदहिस्तीर्थप्रा
प्तिस्यात्तदहःपूर्ववासरे ॥ उपवासस्तुकर्तव्यःप्राप्ताह्निश्राद्धदोभवेत् ॥ ६६ ॥ तीर्थप्रसंगात्तीर्थंगम
पुत्रंत्वसुरोमया ॥ स्वर्गसाधनमेवैतन्मोक्षोपायश्चवैभवेत् ॥ ६७ ॥ काशीकांतीचनामाख्याख्यो
ध्याद्वारवत्यपि ॥ मथुरावंतिकाचैताःसप्तपुर्योऽत्रमोक्षदाः ॥ ६८ ॥ ६९ ॥ तुतर्पणादिनाकृतार्थत्वात् ॥
श्राद्धदइति ॥ श्राद्धादिकंव्यापारंकुर्यादित्यर्थः ॥ ६९ ॥ श्रीशंकरायनमः श्रीगुरुस्समर्थ ॥ श्री ॥ श्री ॥

८९

॥ ८९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वश्चतुराशीतियोजनपरिमितः॥प्राप्यापिविमुच्येत॥अपिरेवार्थेमुच्यतैवेसर्थः॥मुच्यतेवैसर्थः॥

श्रीशैलोमोक्षदःसर्वःकेदारोपिततोधिकः॥श्रीशैलाच्चापिकेदारास्त्रयागंमोक्षदंपरं॥६९॥
प्रयागादपितीर्थाग्र्यादविमुक्तंविशिष्यते॥यथाविमुक्तेनिर्वाणंनतथाक्वाप्यसंशयं॥७०॥
अन्यानिमुक्तिक्षेत्राणिकाशीप्राप्तिकराणिच॥काशींप्राप्यविमुच्येतनतथाकल्पकोटि
भिः॥७१॥अत्रार्थेकथयिष्यहमितिहासंपुरातनं॥यथाविष्णुगणैरुक्तोद्विजःशिवशर्मणे॥७२॥
तीर्थाध्यायमिमंश्रुत्वानरोनियतमानसः॥श्रावयित्वाद्विजांश्चापिश्रद्धाभक्तिसमन्वितान्॥७३॥
क्षत्रियान्धर्मनिरतान्वैश्यान्सन्मार्गवर्तिनः॥शूद्रान्द्विजेषुभक्तांश्चनिःपापोजायतेद्विजः
॥७४॥ ॥ इतिश्रीस्कंदपुराणेकाशीखंडेतीर्थाध्यायोनामषष्टोध्यायः॥६॥६॥श्री॥

विमुच्येतेतेतिवापाठः॥गणेरितिद्विवचनस्थानेबहुवचनंछांदसंपूजार्थंवा॥७४॥ ॥इतिश्रीरामानं
दकृतायांकाशीखंडटीकायांषष्ठोध्यायः॥६॥ ॥६॥ ६॥ ६॥ ६॥ ६॥ ६॥ ६॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०५०स०

काश्यपोध्या द्वारका च माया कांसा व वंतिका ॥ मथुरा च प्रशस्यं ते पुरः सप्तात्र सत्तमे ॥ अत्रार्थे कथयिष्ये ह मितिहासं पुरातनं ॥ इत्युक्त ॥ तमेवेतिहासं दर्शयति मथुरायामिति ॥ अधीसवेदानिसादीनां द्वितीयांतानां पदानां चिंतामवाप महतीं शिवशर्मा द्विजोत्तम इति षष्ठेनान्वय अर्थवेदानामिति शेषः ॥ अंगानि शीक्षाकल्पव्याकरणनिरुक्तं छंदोज्योतिष तर्कः न्यायादीन ॥ मिमांसा द्वैपधर्मब्रह्मलक्षणं ॥ नायुर्वेदाधर्ववेद ॥

॥ ७९ ॥

अगस्तिरुवाच ॥ मथुरायां द्विजः कश्चिदभूद्देवसत्तम ॥ तस्य पुत्रो महातेजाः शिवशर्मेति विश्रुतः ॥ १ ॥
अधीसवेदान् विधिवदर्थविज्ञाय तत्त्वतः ॥ पठित्वा धर्मशास्त्राणि पुराणान्यधिगम्य च ॥ २ ॥
अंगान्यभ्यस्य तर्कश्च पीत्वा अप्यसनंततः ॥ मिमांसाद्वयमालोक्य धनुर्वेदं विगाह्य च ॥ ३ ॥ आयु
र्वेदं विना र्यापि नाट्यवेदे कृतश्रमः ॥ अर्थशास्त्राण्यनेकानि प्राप्याश्वगजचेष्टितं ॥ ४ ॥ कलास्तु च कृता
भ्यासो मंत्रशास्त्रविचक्षणः ॥ भाषाश्च नानादेशानां लिपीर्ज्ञात्वा विदेशजाः ॥ ५ ॥ अर्थानुपार्ज्य धर्मे
ण भुक्त्वा भोगान्यदृच्छया ॥ उत्पाद्य पुत्रान्सगुणान्तेभ्यो दत्वा विभज्य च ॥ ६ ॥ यौवनं गत्वरं ज्ञात्वा ज
रां दृष्ट्वाश्रितां श्रुतिं ॥ चिंतामवाप महतीं शिवशर्मा द्विजोत्तम ॥ ७ ॥ ॥ ८० ॥ भरतादिमुनिप्रणीतं

तमस्तोमहरोऽज्ञानप्रगहरो अंधकारसमूहहरो वा भवबंधहृत् संसारबंधनहन्त्री भवबंधकृत् इतिपाठे अभक्तानां संसा
रबंधनकर्त्री चोलैः कूर्पासिकैः कंचुकैः रितियावत् ॥ ऊनवाषिगृहे स्थिता सयोवना सुवासिन्यः चिरं यद्युतियावत् चिर
दीनसुवासिनीसमरः सुवासिन्या चिरंटीस्या द्वितीयवयसि स्त्रिया मिति चरुद्रः । उर्वरा सर्वसस्याढ्या भूमिरिशेष ।
पठतो तेगतः कालस्तथोपार्ज्यतो धनं ॥ नाराधितो महेशानः कर्मनिर्मूलनक्षमः ॥ ९ ॥ न मयाऽतोषितो विष्णुः
सर्वपापहरो हरिः ॥ सर्वकामप्रदो ब्रह्मणां गणेशो नार्चितो मया ॥ १० ॥ तमस्तोमहरः सूर्यो नार्चितो वै मया क्वचित् ॥
महामाया जगद्धात्री न ध्याता सर्वबंधहृत् ॥ १०॥ नप्रीणिता मया देवाय ज्ञैस्सर्वसमृद्धिदाः ॥ तुलसीवनमुत्सृष्टान
कृता पापशांतये ॥ ११ ॥ न मया तर्पिता विप्रा भिष्टान्नैर्मधुरैरसैः ॥ इहापि च परत्रापि विपदामनुतारकाः ॥ १२ ॥
बहुपुष्पफलोपेताः सुछायाः स्निग्धपल्लवाः ॥ पथि नारोपिता वृक्षा इहामुत्रफलप्रदाः ॥ १३ ॥ दुकूलैः स्वानुकूलैश्च
चोलैश्च सगाभूषणैः ॥ नालंकृताः सुवासिन्य इहामुत्र सुखप्रदाः ॥ १४ ॥ द्विजायनोर्वरा दत्ता यमलोकनिवारिणी ॥ सु
वर्णनार्घ्यवर्णाय दत्तं दुरितहृत्परं ॥ १५ ॥ नालंकृता सवत्सा गौः पात्राय प्रतिपादिता ॥ इहपातकहन्त्र्याशु सप्तजन्मसुखा
वहा ॥ १६ ॥ कृपणापि न तत्पेमातुः कारितो न जलाशयः ॥ नातिथिस्तोषितस्तद्वापि स्वर्गमार्गप्रदर्शकः ॥ १७ ॥ छत्रोपानत्कुंडिका
स्वन्ना ध्वगाय समर्पिता ॥ यास्यतः संपामन्यां हि स्वर्गमार्गसुखप्रदाः ॥ १८ ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
उर्वरा सर्वसस्याढ्ये समरः ॥ जलाशयः जलान्याशेरतेऽस्मिन्निति जलाशयो वापीकूपतडागादिः ॥ कुंडिका कुंडिकमण्डलु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५० स०

॥ ९३ ॥

श्रीसूक्तं हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजामित्यादि पावमानी स्वादिष्ठया पवस्व सोमधारयेत्यादि ब्राह्मणो ब्राह्मणं
न च कन्याविवाहार्थं वसु कापि समर्पितं ॥ इह सौख्यसमृध्यर्थं द्विजकन्यार्पकं दिवि ॥१९॥ न वा जपेयावत्पश्येत्स्वा
तालोभवशादहं ॥ इह जन्मनि चान्यस्मिन्बहुमिष्टान्नपानदं ॥२०॥ न मया स्थापितं लिंगं कृत्वा देवालयं शुभं ॥
यस्मिन्संस्थापिते लिंगे विश्वं संस्थापितं भवेत् ॥२१॥ न गौरी न महालक्ष्मीस्त्विष्ट्रैपिपीलेखिते ॥ यत्निनाकृ
रणे तेषां न कुरूपा न दुर्भगः ॥२२॥ सूक्ष्माणि चाविचित्राणि नोज्ज्वलान्यंबराणि च ॥ समर्पितानि विप्रेभ्यो द्विग्यां
बरसमृद्धये ॥२३॥ विष्णोर्यत्नं नैव कृतं सर्वसमृद्धिदं ॥ न च सर्वगणेशानां प्रतिमा कारिता मया ॥२४॥
न तिलाश्च घृतेनाक्ताः सुसमिद्धहुताशने ॥ कृतावेमं जप्तताश्च सर्वपापापनुत्तये ॥२५॥ श्रीसूक्तं पावमानीं च ब्राह्मणो मं
डलानि च ॥ ओतं पूरुषसूक्तं न पापाद्विशातरुद्रियं ॥२६॥ अभ्वस्य सेवा न कृता सत्कार्चार्कं त्रयोदशी ॥ सद्यःपाप
हरा साहि न रात्रौ न भक्तो दिने ॥२७॥ शयनीयं न चोत्सृष्टं मृदुला च तूलिका ॥ दीपी दर्पणसंयुक्तं सर्वभोग
समृद्धिदं ॥२८॥ अजाश्च महिषी मेषी दासी कृष्णाजिनं तिलाः ॥ सकरं भास्ता यकुंभा नासनं मृदुपादुके ॥२९॥ श्रीः ॥
अग्निर्वै देवानामवमो विष्णुः परम इत्यादि मंडलानि पदे तन्मंडलं तपातितन्महइत्यादि ऋग्वेदे प्रसिद्धानि दश मंड
लानि इति वा ॥ पुरुषसूक्तं सहस्रशीर्षेत्यादि शातरुद्रियं अथातः शातरुद्रियं जुहोति अत्रैव सर्वाणि संस्कृतानि इति
आदिपर्णी ति सर्वेषां

ष२

८६

१६४

विशेषणं॥ आर्के अर्कदिने॥ गोर्दिने शुक्रवासरे प्रवृत्तिकाप्रकृष्टात्तृत्तिकावकु मूत्स्येसर्थः॥ कीदृशी दीपी दीप्ता उज्वले सर्थश्च दर्प्पणेतिश
यनीयविशेषणं॥ दीपी दर्प्पणसंयुक्ते इतिकश्चित्पाठे पितथा॥ सकरंभाद ध्युपसिक्तसक्तु सहिता॥ करंभाद ध्यिसक्तव इ समर॥ मृदुपाडु
के इति॥ श्रीपानदिसत्रनाध्वगायसमर्प्पिता इसकेद्र हेतुसाधारणेत्यद्सुपौनरुक्त्यं॥ २१॥ ॥ वस्त्रतांबूलमिस्रेकवेङ्गावः तत्रवस्त्र

पादास्यंगंदीपदानंप्रपादानंविशेषतः॥ व्यजनं वस्त्रतांबूलं तथान्यमुखवासकृत्॥ २०॥ ७॥
नित्यंश्राद्धंनृतवर्छितथातिथिसमर्चनं॥ विशस्तन्यानिदत्वाचप्रशस्यानियमस्रये॥ २१॥ ७॥
नयमंयमदूतांश्चनयामीरपियातनाः॥ पश्यंतितपुण्यस्तानेनतत्रापिहृतंमया॥ २२॥ ७॥

का नाँ

साधारणंअ न्यथानरुस्सूक्ष्माणीस्तनेनपौनरुक्तं॥ तांबूलंगुवाकादित्रयं॥ पादास्यंगंधान्नणीमितिशेषः॥ अन्यस्रलवंगादि॥ इसंतानांनचोत्कृष्टमि
तिपूर्वक्रियमैवसंबंधः॥ नित्यश्राद्धमिति नित्यश्राद्धादिस्रुत्वा अन्यानिचप्रशस्यानिद्रव्याणिदत्वायमादीनूनपश्यंतियमाध्येपिनविशंतीत्य
र्थः कुतोयतस्तेपुण्यभाज इतियद्वानित्यश्राद्धादीन्यन्यानिचद्रव्याणिचदत्वायमाध्येप्रशस्यानिसप्तानिविशंतियमंकोधाविष्टमित्यादिपूर्ववत्
यामार्यमसंबंधिनीः॥ २२॥ फलितमाहनैतदिति॥ २३॥ ॥ ॥ ॥ ॥ ॥ श्रीशंकारायनमः॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो० पू० स०

कृच्छ्रेति॥ लघ्वचांद्रायणं चते आदीयेषां ते अभितिकृच्छ्रपराकादीनां तानि तथा कृच्छ्रातिकृच्छ्रस्वरूपं चोक्तं पराशरसंहितायां॥ नवाह्यदि
कृच्छ्रः स्यात्सान्तपनं ... त्रिरात्रमुपवासः स्यादतिकृच्छ्रं तदुच्यते॥२४॥ गवाह्निकंभक्तिअह्निदेयमाह्निकं गवाह्निकं प्रतिदिवसं देयं

लघ्वचांद्रायणादीनि तथा न कृतानि च॥ शारीरशुद्धिकारीणि न कृतानि कचिन्मया॥२३॥
गवाह्निकं च नो दत्तं कंडूतिर्न च वै कृता॥ नोद्धृता पंकमग्ना गौर्गोलोकसुखदायिनी॥२४॥
॥९४॥ नार्थिनः प्रार्थितैरर्थैः कृतार्था हि मया कृताः॥ देहि देहीति जल्पाको भविष्याम्यन्यजन्मनि॥२५॥
नवेदा न च शास्त्राणि नार्थो दारा न चौरसुताः॥ नक्षेत्रं न च हर्म्यादि मायांतमनुयास्यति॥२६॥
शिवशर्मेति संचिंत्य स्वबुद्ध्या संध्यार्थ्य सर्वतः॥ निश्चिकाय मनस्येवं च क्षेमतरं मम॥२७॥

गोग्रासमित्यर्थः॥ पगवानीकामिति पाठे गोसमूहमित्यर्थः॥ प्रार्थितैर्याचितैः प्राप्तैरिति पाठे साचारैरित्यर्थः॥ देहिदेहीति जल्पाकः देहिदेहि
प्रयत्नप्रयुक्तेति सार्थनाशीकः॥ शिवशर्मेति॥ एवं प्रकारेण मम क्षेमतरं कल्याणतरं भवेत्स्यादिति निश्चिकाय निश्चितवानित्यर्थः॥ क्षेमक
रमिति पाठे क्षेमकरं कर्मेत्यर्थः॥२७॥ ॥ ॥ ॥ ॥ ॥ श्रीरामायनमः॥ श्रीशंकरायनमः॥ श्रीकाशीविश्वेश्वरायनमः॥

165

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६६

तमेव निश्चयं दत्त्वा पतिया वदिति॥ एवमेवं विचारयन्नित्यर्थः॥ पंचषाणि पंचवा षड्वा सराणी त्यर्थः॥ लग्न बलेन इत्यर्थः॥ स्वार्थेव
कूच् प्रत्ययः॥ इति निश्चित्य तिइति तीर्थ पर्यटनमेव सर्व जंतूनां निर्वाणपद दानिःश्रेणिकां केवल्यपद सोपान परंपरां उत्क्रष्टां श्र

रू

यावत्स्वस्थोऽस्ति मे देहो यावन्नेंद्रियविक्लवः॥ तावत्स्वश्रेयसां हेतुं तीर्थयात्रां करोम्यहं॥ ३८॥ दिनानि पंच षा
ण्येव मतिवाह्य गृहे द्विजः॥ शुभे तिथौ शुभे वारे शुभे लग्न बले द्विजः॥ ३९॥ उपोष्य रजनीमेकां प्रातः
श्राद्धं विधाय च॥ गणेशान् ब्राह्मणान्नत्वा स प्रस्थितवान् द्विजः॥ ४०॥ इति निश्चित्य निर्वा
णपद निःश्रेणिकां परां॥ सर्वेषामेव जंतूनां तत्र संस्थितिकारिणां॥ ४१॥ अथ पंथानमाक्रम्य
कियंतमपि स द्विजः॥ मुहूर्त्तं पथि विश्रम्याचिंतयत्प्राक्कृतं कथा म्यहं॥ ४२॥ ॥ ॥ ॥ ॥ ॥

स्याव धार्य्य प्रस्थितवानिति पूर्वक्रियेणान्वयः॥ कथंभूतानां तत्र संस्थितिकारिणां तत्र निर्वाणपदे तीर्थ पर्यटनमेव सम्यक् स्थितिं
कर्त्तुं शीलं येषां ते तथा तेषां अचिंतयदालोचितवान् चिंतयदिति कचित्पाठः स्तत्राड् भाव आर्षः॥ ४२॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

167

॥०पु०स०

स्तुवीति॥ ततस्तस्मात्सप्तपुरीस्वयोध्या द्यामोक्षदात्वेन प्रसिद्धात्युक्तं॥ अयुध्यामथुरामायाकाशीकांतीअवंतिका॥ पुरीद्वारावतीचैवसप्तैतामोक्षदायकाइति॥ यायांगद्वेयं॥ आदाविति शेषः॥ यद्यतस्तत्र तासु सर्वतीर्थानीति॥ अयोध्यामिति॥ इतिनिश्चित्यसम्प्रः॥ पुराअयोध्यांगत्वाप्रयागमगाम दितिद्वितीयश्लोकान्वयः॥ मथुरानामध्येप्रयागमगाम दितिद्वितीयश्लोकेना

॥ ९५ ॥ पुरीतीर्थान्यनेकानिलोलमायुश्चलंमनः॥ ततःसप्तपुरीयायांसर्वतीर्थानितत्रसन्ति॥ ४३॥ अयुध्यांचपुरीं गत्वासरयूमवगाह्यच॥ ततस्तीर्थेषुसंतर्प्यपितृन्पिंडप्रदानतः॥ ४४॥ पंचरात्रमुषित्वाच्च ब्राह्मणान्परिभोज्यच॥ प्रयागमगमद्विप्रस्तीर्थराजंसुदुर्लभं॥ ४५॥ सितासितेसरिच्छ्रेष्ठयत्रास्नानंसुरदुर्लभं॥ यत्रप्लुतोनरःपापःपरंब्रह्माधिगच्छति॥ ४६॥ क्षेत्रंप्रजापतेःपुण्यंसर्वेषामेवदुर्लभं॥ लभ्यतेपुण्यसंभारैर्नान्यथार्थस्यराशिभिः॥ ४७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

न्वयः॥ मथुरानामध्येचप्रयागमुक्तंध्यायोध्यायांगमनंमार्गशीर्षेनिर्गतस्यप्रयागेमाघस्नानानुरोधेनेतिज्ञातव्यं तथाचाप्येवक्ष्यति॥ तत्रमाघमुषित्वेतिप्रयागंविशिनष्टि॥ सितासितेत्यादिकाशीस्पतः आकृतेनेन प्रथेनसितासितेगंगायमुनेस्नानंभवतःसुरदुर्लभंदेवानामपिदुःप्रापनदुक्तं॥ प्रयागंतीर्थराजानंगच्छन्ममसौतसाः॥ भवांभोजभवांभोजनयनानांसुदुर्लभमिति॥ ४७॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमयंतीदमयंतीप्रयागाद्देवपर्णगांप्रयागेऽर्थाद्दिग्वीअन्येनाद्देवपर्णशरीरं येषांते तथा तेषां॥ तत्रात् तत्राक्षयवटइति॥ यमारुह्यति
कल्पभेदाभिप्रायं यद्वायमारहेति भगवदुदरास्थितस्य वटस्थेन भगवता सहन टस्यासेदवि वक्षयात तेयुक्तंपरं पदं केव

दमयंतीकल्किंकाकलंकक्लिंदतनयां शुभां॥ आगत्यमिलिताय त्रपुण्यास्वर्गीतरंगिणी॥४८॥ प्रकृष्टं सर्वया
गेभ्यः प्रयागमिति धीयते॥ यत्र नांपुनरावृत्तिर्न प्रयागाद्देवपर्णगां॥४९॥ यत्रः स्थितः स्वयं साक्षा
च्छूलटंको महेश्वरः॥ तत्राप्लुतानां जंतूनां मोक्षवर्त्मप्रदेशतः॥५०॥ तत्राक्षयवटोप्यस्ति सप्तपाताळमूल
वान्॥ प्रळयेपियमारुह्यमृकुंडतनयोवसत्॥५१॥ हिरण्यगर्भो विज्ञेयः ससाक्षाद्वटरूपधृक्॥
तत्समीपे द्विजान् भक्त्या संभोज्याक्षयपुण्यभाक्॥५२॥ यत्रलक्ष्मीपतिः साक्षाद्वैकुंठादेत्यमानवा
न्॥ श्रीमाधवस्वरूपेण तद्विष्णोः परमं पदं॥५३॥ श्रुतिभिःप्रथितंयत्रै सितासितसरिद्वरे॥ तत्राप्लुतांगा
ह्यमृतं भवंतीति विनिश्चितं॥५४॥ शिवलोकाद्ब्रह्मलोकादुमालोकाद्वरात्पुनः॥ कुमारलोकाद्वैकुंठात्सत्यलोकात्समं ततः॥५५॥

त्यं॥ तत्र प्रमाणमाह॥ श्रुतिभिरिति॥ तथा च श्रुतयः॥ सितासिते सरिते यत्र संगते तत्राप्लुतासोदिवमुत्पतंति त्या घाः॥५८॥
वरात्श्रेष्ठात्॥ यत्प्रयागान्निर्गान पियथाचा सो प्रयागश्चेतियत्प्रयागः तस्यदर्शनो यस्य प्रयागस्य संबंधिनो वामू ७

(168)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू० स०

नपीत्यर्थः॥ किमिति प्रार्थयंति तत्राह॥ ते पुनः॥ स्वयमेव तत्र किमिति न यांति न तत्राह॥ किं कुर्म इत्याह॥ मज्जागतानि। अस्थिस्नायवो रंतर्वर्त्तिस्वघं अघं मज्जा ऽथवास्थ्यंतर्गतो धातुर्मज्जा तत्कृतानीत्यर्थः॥ ६०॥ कामिकं काम्यायहितं गाईति स्वस्य फलदेयपर

सू ९६ ॥

तपोजन महर्लोकश्च सर्वे स्वर्लोकवासिनः॥ भुवो लोका ब्रह्मलोका नागलोकास्तथाखिलात्॥ ५६॥ अचला
हिमवन्मुख्याः कल्पवृक्षादयो नगाः॥ स्नातुं माघे समायांति प्रयागमरुणोदये॥ ५७॥ दिगंगनाः प्रार्थयं
ति यत्प्रयागानिबानपि॥ तेपि नः पावयिष्यंति किं कुर्मः पंगवो वयं॥ ५८॥ अश्वमेधादियागाश्च प्रया
गस्वरजः पुनः॥ तुलितं ब्रह्मणा पूर्वं न तेन द्रजसा समाः॥ ५९॥ मज्जागतानि पापानि बहुजन्मार्जिता
न्यपि॥ प्रयाग नाम श्रवणात् क्षीयंते नीवविद्रुवत्॥ ६०॥ धर्मतीर्थमिदं सत्यमर्थतीर्थमिदं परं॥ कामिकं ती
र्थमेतच्च मोक्षतीर्थमिदं ध्रुवं॥ ६१॥ ब्रह्महत्यादिपापानि तावद्गर्जंति देहिषु॥ यावन्न मज्जंति नो माघे प्रया
गे पापहारिणि॥ ६२॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः॥ एतद्यत्सभ्यंते वेदे तत्प्रयागं पुनः पुनः॥ ६३॥ ॥

स्परंक ब्रह्मायते धार्यते तीर्थं इति क्वचित्पाठः॥ स चिंत्यः। मज्जंति देहिन इति शेषः॥ तद्विष्णोरिति विष्णोः सर्वत्र परमं पदं सच्चिदानंदल
क्षणं सदा सूरयो विद्वांसः पश्यंति लोके ये नानुभवंति एतद्य पुनः पुनर्वेदे पठ्यते कथ्यते पठ्यत इति क्वचित्पाठः तत्प्रयागं तत्राप्युपायत्वादि
ति॥ ६३॥

॥ सू ९६ ॥

169

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरस्वतीति॥ रजोरूपा रजोगुणोपाधिहिरण्यगर्भरूपा तमोरूपा तमोगुणोपाधिरुद्ररूपा॥ सत्वरूपा सत्व
गुणोपाधिविष्णुरूपेत्यर्थः। वेणीति गंगायमुनयोः संभेदः। निःश्रेणी सोपानपरंपरेत्यर्थः॥ श्रद्धाश्रद्धाप्लुतस्यासितक्य
बुद्ध्यानास्तिक्यबुद्ध्यावास्था। तस्य स्वकारात् बलात्त्वनापि तस्यापि तस्यापीत्यर्थः॥५५॥ इदानीं प्रयाग

सरस्वती रजोरूपा तमोरूपा कलिंदजा॥ सत्वरूपा च गंगात्र नयंति ब्रह्म निर्गुणं॥५४॥
इयं वेणी हि निःश्रेणी ब्रह्मणो वर्त्मयास्यतः॥ जंतोर्विशुद्धदेहस्य श्रद्धा श्रद्धाप्लुतस्य वै॥५५॥
काशीति काचिदबला भुवनेषु रूढा लोलार्ककेशवविलोलविलोचना च॥ तद्दोर्युगं च वरणासिरियं
तदीया वेणीति यात्र गदिताक्षयरामभूमिः॥५६॥

मारभ्य काश्याः सीमानं वदन् स्त्रीरूपालंकारेण काशीं निरूपयति॥ काशीति॥ काशीति काचिदबलास्तीति
शेषः। काचिदनिर्वचनीयगुणागुणेत्यर्थः॥ इयं यत्र च त्रयागे गदिता कथिता वेणीति शेषः। सा तदीया काशी
संबंधिनी वेणी अत्र वेणी प्रोषितभर्तृकादिभिर्या निबध्यते सेत्यर्थः॥ वेणिः प्रवेणिः शीर्षण्य सिरस्यो विश्र

(170)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०सव

देवचेस्मरः॥कथंभूता॥भुवनेषुरुद्याख्याता॥लोलार्ककेशवादेवविलोलेविलोचनेविशिष्टेलोचनेयस्याःसातथातस्याः
हस्तयुगुलंचवरणानदीआसिश्चअक्षयतरार्मीहानिःअक्षयंयसुखंब्रह्मानंदेकलक्षणंतस्याःसंनिराधिष्टानंतथा
चवामनपुराणे॥महेश्वरंप्रतिहरेर्वचनं॥महेश्वरश्रुणुदेवेनांमम्वाचंकलस्वनां॥असिहसासयनारीशुभदा
पुण्यवर्द्धिनी॥योसौप्राउनंतउलपुण्यमदंशप्रभवोव्ययः॥प्रयागवसतेनित्संयोगशायीतिविश्रुतः॥चरणा
७॥ आस्तुरवाचैसुधीर्मणिगुणास्तस्यकोत्रवर्णयितुंक्षमः॥तीर्थराजप्रयागस्यतीर्थैःसंसेवितस्यच॥९७॥ ॥ ९७॥

१८
दक्षिणात्तस्याविनिर्याताभरीरद्भरा॥विश्रुतावरणेत्सेवसर्वपापहराशुभा॥सव्यादन्याद्वितीयाचआसीत्सेव
विश्रुता॥तेउभेसरितांश्रेष्ठेलोकपूज्येबभुवतुः॥तयोर्मध्येतुयोदेशस्तत्क्षेत्रंयोगशायिनः॥त्रैलोक्यप्र
वरंतीर्थंसर्वपापप्रमोचनं॥नताद्दशोस्तिगगनेनभूम्यांनचरसातले॥तत्रास्तिनगरीपुण्याख्याता
वाराणसीशुभा॥यस्यांहियोगिनोनानाशेप्रयांतिभवतोलयं॥९९॥प्रयागमाहात्म्यमुपसंहर
ति॥सुधर्मिणीतिद्वयेनशोभनधर्मापापातिप्रसादिलक्षणायस्याःसा॥सुधर्मिणीतिकाचिद्रस्याः॥९८॥

१००

(172)

तच्छुत्वैतेषांपापानांशुद्धेनाशायअहोहेकांतेप्रवेशेतिसोत्रेशासन्मयखसाशिवशर्मादेहलिविनायकंवीक्ष्यसंप्र
मतःमंचमोदकान्निवेद्यततःपश्चात्साऽप्यसिंदूरकर्दमैःघृताक्तैःसिंदूरपंकैरन्वालिप्तवानितिद्वयोरन्व
यः।।कथंभूतंविनायकंमहोपसर्गवर्गेभ्योमहाविघ्नसमूहेभ्योनिजजनमंतंवंचयंतंगोपायंतमित्यर्थः

पापिन्योयानिपापानित्रसत्यक्षालितान्यहो।।तच्छुद्ध्यैसेव्यतेतीर्थंप्रयागमधिकंततः।।६८।।प्रयाग
स्यगुणानज्ञात्वाशिवशर्माद्विजःसुधीः।।तत्रमाघमुषित्वाथप्रापवाराणसींपुरीं।।६९।।तत्रैवएव
संवीक्ष्यसदेहलिविनायकं।।अभ्यलिंपत्ततोभक्त्यासाज्यसिंदूरकर्दमैः।।७०।।नैवेद्यमोदकांस्यंप
चवंचयंतंनिजंजनं।।महोपसर्गवर्गेभ्यस्ततोन्सुसैत्रमाविशत्।।७१।।आगत्यतस्यांमणि
कर्णिकायामुदग्वहांस्वर्गतरंगिणींसः।।सक्षीणपुण्येतरपुण्यकर्मणांनृणांगणैःस्थाणुगणैरिवा
वृतां।।७२।।

आगतेतितस्यशिवशर्मणिमणिकर्णिकायां नागमत्उदग्वहांउत्तरवाहिनींदृष्ट्वाविस्मितोबभूवेतिशेषःइतितति
यश्लोकेनान्वयःकुमाकारोविस्मयस्तदाह।।मयाऽद्यमावमुक्तमालोकिदृष्टेनवेतिकथंभूतांखुर्नदींसःक्षीणानिपु
नि ण्येतराणिपापानिपुण्यानिचकर्माणियेषांतेषांनृणांगणैरावृतांकैरिवस्थाणुगणैरिवस्थाणोःश्रीरुद्रस्यप्रगणाः
रुद्ररूपाकागणास्तैरिवेति।।७२।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ ॥ र्दी॥ १८ साहिति

पुनः किं कृत्वा सचेलं आप्लुत्य सवस्त्रं निमज्ज्य कुत्र जले कथंभूते अमले। न विद्यते अविद्याकृतकार्यलक्षणो मलो यस्मात्तस्मिन् माणिकर्णिके इत्यर्थः॥ तदुक्तं। यस्यामघौघजनमज्जनतः स्वयं सैव पस्यं कलपो विमलत्वमुपैति॥ यद्वा। संसारतरोः प्रत्यासेन नमोऽस्तु तस्यै माणिकर्णिकायै॥ इति हे अमले मुद्धातः करणे अमल इति पाठे निष्पाप इत्यर्थः॥ अविलंबितं यथास्यात्तथा। भालं बिभ्रत् शुद्धबुद्धिः॥ भालं बिभ्रत् शुद्धा बुद्धिर्यस्य स तथा। पुनः किं कृत्वा। संतर्प्य कान् देवान् ब्रह्मादीन्। ऋषयश्च मरीच्यादयः। मनुष्याः सनकादयः। दिव्यपितरश्च कव्यवाडादयः। तान् सर्वानपि तृप्त्यर्थं वेद

सचेलमाप्लुत्य जलेऽमलेऽमले विलंबमानं बिभ्रत् शुद्धबुद्धिः॥ संतर्प्य देवर्षिमनुष्यदिव्यपितॄन् स पायं स्वान् सुखाहि
कर्मकांडवित्॥७३॥ विधाय चंद्रार्कसहे पंचतीर्थिकां विश्वेशमाराध्य ततोऽयमादरात्॥ पुनः पुनर्वीक्ष्य पुरं मुरा
रेरिदं मयालोकि न वेति विस्मितः॥७४॥

ज्ञानकादीन् सर्वान् कर्मानुष्ठाने तस्य क्रियाकांडवेत्तृत्वं हेतुमाह॥ सहीति हि यस्मात् दाक्षिणात्य तिप्रागितिघाच स्पातः पुनः किं कृत्वा पंचतीर्थिकां वरणासिसंभेदपंचनददमणिकर्णिकादशाश्वमेधात्मिकां विधाय एतेषु पंचसु स्नानादिकं कृत्वेत्यर्थः। आदिसरूपाधायथास्वं स्वधनमतिस्वल्प्या वित्तशाठ्यमकृत्वेति यावत्॥ विस्मयप्रकारमाह इदं मयालोकि न वेति इदमावयोः तुरं वा न वा॥७४॥ ॥ श्रीरामायनमः॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

174

पश्चादवलोकितामितिनिर्द्धार्य्य काव्यं वर्णयति॥ नसापुरीसष्टभिः॥ नसापुरीति॥ सा स्वःपुरी अमरावती तु निश्चितं अनया काश्याः पु
राहृर्यासिमंसार्द्धसमं जसाधिसम्यक्तत्वदर्शाविचारेणाधिप्रातिसाम्यं समस्या॥ नः साम्यं प्रतिसाम्यं न आवहेत न साम्रुपादि
सन्वम्मः॥ उभयदृशाविचारेसाम्याभावदर्शनार्थं वीप्सांतर्गर्भतः प्रतिसाम्यप्रयोगः॥ उभयदृशाविचारेणसाम्याभावाय
तंत्रेणउभयनिष्ठहेतुमाह प्रबंधभेदादिति प्रबंधः प्रबंधनं रचनापरिपाटी तस्य भेदादमरावती हि ब्रह्मणः प्रतिदिनं रच्यते

नसापुरी स्वस्त्वनया पुरासमंसमंजसापि प्रतिसाम्यमावहेत्॥ प्रबंधभेदाद्व्यतिरिक्तपुस्तकप्रतीर्यथासलिपिकां गमेर्दृशां॥ तं॰ ९

इयं स कृदेवेति तत्रापि सा ब्रह्मणा रच्यते इयं तु स्वयमीश्वरेण सा च सुदर्शनेन च यत्र रचिता अलोहेधा च इयं चानर्घ्यर
त्नप्रचयनिर्मिता गगनोहेधा च अथवा प्रबंधभेदात् प्रबंधयोर्भेदात्॥ स्वः पूर्व्यां स्थितानामपि हि प्रकृष्टोबंधः प्रबंधः पु
नपुनर्जन्ममरणादिरूपः संसारस्यात् काश्यां स्थितानां तु प्रगतोबंधः प्रबंधोभवेदित्येवं प्रबंधयोर्भेदादित्यर्थः॥ अ
थवा प्रकृष्टोबंधः प्रबंधस्तस्य भेदाद्वा तुल्यादमरावतीस्थितानां प्रकृष्टो बंधः प्रबंधस्तस्य भेदाद्विदारणात् का
शीस्थितानामित्यर्थः॥ अमरावतीकाश्याः साम्यं नावहेदत्र दृष्टांतमाह॥ व्यतीति॥ लिखितपुस्तकेति अयमर्थः॥ सर्वस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा० पू० स०

॥ ९८ ॥
१८

दविद्याकार्यादितिरिक्त्यतरसातिरिक्तं ब्रह्मविगतं अतिरिक्तं अनात्मतत्त्वशास्त्रं तं छ्वतपुस्तकं वेति व्यतिरिक्तपुस्तकं तेन
सहयाप्रतिः पुस्तकप्रतिः वा हस्तयन्त्रादिप्रणीतायाः उपजीव्यकामादिशास्त्रं प्रवर्तयत्किंचिदनास्मृता
स्वजातमित्यर्थः॥ माययासद्धूम। ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति स्मृतेः तस्यालिपिस्तास्ये
तिपादकालिपिर्यत्र सहालिपिः अध्यात्मशास्त्रं तच्छात द्विधत इति भेदो नाप्रकारस्य तस्याभंगतः भंगोऽखंडे
नभागेनेतियावत्॥ साम्यं नावेला दूदिति सल्लिपिभिर्भिभेदत इति पाठसतीसद्विषया चासौ सल्लिपिस्तास्य
भेदो नानात्वं तस्य भंगो भागो एव देश इति यावत्॥ सवर्त्तते यस्य तेन शास्त्रेणेति व्याख्येयं॥ उभयपक्षेपित
तियांतास्तासिल् अथवा सल्लिपिभेदभंगत इति तंत्रेणोच्चारितत्वात् काशीतादूतियहेतुपरतया।
व्याकर्तव्यं सती लिपिः सल्लिपिर्विधात्रा ललाटे लिखितेति यावत्॥ तदुक्तं ललाटे लिखितं यत्र षष्ठी
जागरवासरे॥ नोहारिः शंकरो ब्रह्मनाप्यन्यथा कर्तुमर्हतीति। चित्रगुप्तलिखितं वा॥ तस्माभे
दभंगातो विशेषभंजनात् सारख्यातिरिक्ता या लिपिर्नाशकत्वादित्यर्थः॥ ॥ ॥ ॥ श्रीः ॥

॥ ९८
१०२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

176

सन्योलिपिभेदस्तस्य भंगत इति वा पाठांतरे ष्यर्यमेवार्थः स्वस्त्ययने तिक्वचित्पाठः स्वर्गं गये तिक्वचित्सचिंसः। प्राङ्कतंव्याख्यानं
स्पष्टं ॥७५॥ पयोपीति यत्रत्यं यत्र कार्यां भवं यत्रत्यं कारी सङ्घमित्यर्थः ॥ पयोप्यचिंत्यवैभवं अपि समुच्चये गर्हा समुच्चय
प्रश्नः शंकासंभावनास्वपीत्यमरः॥ नकेवलं संघत्वं अचिंत्यवैभवं जन्मपीत्यर्थः॥ न चिंत्यं तर्कयितुमयोग्यं वैभवं कैवल्यदा
नसामर्थ्यं यस्य तत्तथा॥ तथाचोक्तं। गंगायां च जले मोक्षं वाराणस्यां जले स्थले इति। अनोदिवि स्थितायाः सुधा अमृतं सा सा

पयोपि यत्रत्यमचिंत्यवैभवं दिविस्थितासा धुसुधाप्यते मुदा॥ तथा प्रसूते स्तनपयो धरे पयो न पीयते पीतमिदं यदि क्वचित्॥७६॥

धुयथा स्यात्तथा सुधाप्यर्थं आप्यते प्राप्यत इत्यर्थः॥ दिविस्थितैरिति पाठे आप्यते पीयत इत्यर्थः उभयत्र हेतुमाह॥ इदं पयो यदि
कचित्कदाचित्पीतं स्यात्तदा प्रसूते जननया यत्स्तन्यं तथा न पीयते तु राशिष्ट यथाश इ श्रुत्थीर्थपीता म तेः पाना नंतरं जन्मलब्धे
यथा पीयते तथा नेत्यर्थः प्रसूतेऽपयो धर इति क्वचित्पाठः तथा प्रवृद्धिर्लास इति प्रसूतामा तेति व्याख्येय उत्तपयोधर इत्यने
नोच्चस्तनस्य कठिनत्वात्पाने दुःखाधिक्यमिति सूचितं॥७६॥ श्री ह्यलायनमः॥ श्री शिवाय नमः॥ श्री गणेशाय नमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री०पु०स०

॥ १० ॥

अनामया इतियत्रकारयां जनालोकानयेशितुर्नीतिशास्त्रोपदेष्टुर्नाथनेशापतेसर्वोर्थोअनेनेतिनयोवेदस्तस्येशितुस्तत्त्ववर्त्ते
कस्यशास्त्रयोनेरितिभाचिंतनयाश्रुध्यानुध्यानेनानामयास्त्रिविधतापरहिताःसत्कर्मकृतःसत्कर्मकुर्वाणाएवपि
नाकिनाविनाविश्वेश्वरंविनाकर्ममनागल्पमपिनकुर्वतेकिंतुविश्वनाथार्पणेनैवकुर्वतीत्यर्थः॥अतएवसर्वतःसर्वप्र

अनामयाश्चिंतनयानयेशितुर्जनामनागप्यत्रविनापिनाकिना॥नकर्म
सत्कर्मकृतोपिकुर्वतेऽनुकुर्वतेशार्वगणांश्चसर्वशः॥७७॥ ॥ ॥ ॥

कारेणशार्वगणाननुशार्वस्येश्वरस्यगणाननंदिभृंगिप्रमुखानन्अनुकुर्वतेअनुकुर्वंतितैस्तुल्याभवंतीत्यर्थः॥सर्वग
णांश्चेतिपाठेपिसएवार्थः॥सर्वेचतेगणाश्चेतिअर्थादीश्वरस्येतिन्यकुर्वतइतिक्वचित्पाठःतत्रतेषांगणानांस्व
कर्मभावात्सत्कृतनिषिद्धाचरणाच्चन्यकुर्वतेतिरस्कुर्वतइवेतिव्याख्येयं॥७७॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवर्ण्यत इति इयं काशिका किलेति प्रसिद्धौ कैर्न वर्ण्यते स्तूयते अपि तु सर्वैरपीति सर्थः तत्र हेतुमाह ॥ यतो यस्या
दंतकाले प्रचलितैः फलदानोन्मुखैः प्राक्तनपुण्यसंभारैः प्राचीनपुण्यनिचयैः हेतुभिरत्रास्थितस्य जंतोः प्रा
णिमात्रस्य इंदुमौलिश्चंद्रशेखरः ॐकारं प्रणवं ॐकारस्य प्रतिस्वीकारं कर्णप्रति उपदिशतीत्यर्थः ॥ मणिकर्णिका
नामव्युत्पादयन्नस्याः अतिश्रेष्ठतामाह ॥ संसारचिंतेति ॥ तत्तस्मादसौ मणिकर्णिकेति गीयत इत्यन्वयः
नवर्ण्यते कैः किल काशिकेयं जंतोः स्थितस्यात्र यतोंतकाले ॥ प्रचलितैः प्राक्तनपुण्यसारैरोंकारमोंकारयतींदु
मौलिः ॥ ७८ ॥ संसारचिंतामणिरत्र यस्मात्तत्तारकं सज्जनकर्णिकायां ॥ शिवोभिधत्ते सहसांतकाले त
त्तीयते सोमणिकर्णिकेति ॥ ७९ ॥ ॥ ॥ ॥ तस्मात् कस्मात् यस्मात् संसारिणां प्राणिनां
चिंतामणिः स्वचिंतामणिः ॥ विश्वनाथः सर्वपुरुषार्थप्रदत्वाच्छिवः कल्याणरूपस्तारकं प्रासड्ढोंकारप
उक्षरं राममंत्रराजं वा अंतकाले सज्जनकर्णिकायां अत्र निर्यमाणस्य दक्षिणकर्णे अभिधत्ते कथयतीत्यर्थः ॥ अ
त्र आह तिस्मैव संसारचिंतामणिरिति क्वचित्पाठः तदा सम्यक्सारः सरणं येषां ते संसारिणस्तेषामित्यर्थः ॥ जीवानां सं
सारचिंतामणिरित्यर्थो वा ॥ ७९ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ६६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

179

सा

प्रकारांतरेण मणिकर्णिकाशब्दस्य व्युत्पत्तिमाह ॥ मुक्तिलक्ष्मीति ॥ ततो जनायां मणिकर्णिकां प्राहुः। सा औ विसध्याहृ
स्ययोजना ॥ ततः कृतः यतो मुक्तिलक्ष्मी मोक्षलक्ष्मीर्यतः तस्याः महापीठं महासिंहासनं महत्स्थानं वा तद्रूपो यं मणिः
सर्वोत्कृष्टत्वान्मणिरिव मणिः यद्वा मुक्तिलक्ष्म्याः महापीठानि महास्थानान्यन्यान्यप्याद्विनी मणिकर्णिकास्थले वि
हाय्यकाश्यंतानि तत्र मणिरिव मणिः सर्वोत्कृष्टा इयंस्थली सा पुंसां मुक्तिर्मणिकर्णिकायामिसुते: सा च तस्यां मु

॥ ९१ ॥ मुक्तिलक्ष्मीमहापीठमणिस्तच्चरणाब्जयोः ॥ [illegible] कर्णिकेयं ततः प्राहुर्यां जना मणिकर्णिकां ॥ ८० ॥ ॥ ९१ ॥
जरायुजांडजोद्भिदाः स्वेदजाद्यत्र वासिनः ॥ न समा मोक्षभाजस्ते त्रिदशैर्मुक्तिदुर्लभैः ॥ ८१ ॥

क्तिलक्ष्मीः महापीठमणेः काश्यां वा तच्चरणाब्जयोः तस्याः मोक्षलक्ष्म्याः चरणाब्जयोः पादपद्मयोः कर्णि
का चेयं तेन मणिकर्णिकां प्राहुरित्यर्थः किंवदंतिमपक्षे अध्याहृत्य योजना सा ज्ञेया ॥ ८० ॥ जरायुजा मनुष्यादयः
अंडजाः पक्ष्यादयः उद्भिजास्तरवः स्वेदजा मत्कुणादयो अत्र वासिनो यत्र एते त्रिजिदशैर्देवैः समाना भवंति किं
तु तेभ्योधिका इत्यर्थः अत्र हेतुमाह मोक्षभाजस्त इति। देवैः कीदृशैर्मुक्तिदुर्लभैः मुक्तिरेव दुर्लभा दुःप्रापा येषां
ते तथा तैः ॥ ८१ ॥ ॥ श्रीकृष्ण ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १०८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काशीदृष्टा एतान्कालो मम वृथा यातः सन्तुतपति ॥ मम जन्मेति ॥ यावन्मया काशिका नेक्षिता न दृष्टा । तियावत्
तावन्मम जन्म वृथा जातमित्यन्वयः ॥ कथंभूतस्य दुर्वृत्तस्य दुश्चेष्टितस्य जडात्मनो ऽज्ञस्य काशिका कथंभूता
मुक्तिकाशिका कैवल्यप्रकाशिका पुनः पुनरीतिव्यासोक्तिः अतिथीवृसावेषमीवृसहस्त्रिमलं मुंडिकाशीप्रा
प्यापि भवसायाम्स्वतस्तोद्रष्टुं विमशाति । सप्तानां चेति द्वयेन पुरीणां श्रेष्ठामवयामि जानामि सुनिर्वाणवि
मम जन्म वृथा जातं दुर्वृत्तस्य जडात्मनः ॥ नाद्य यावन्मयैक्षिष्ठ काशिका मुक्तिकाशिका ~~नु मुक्तिकाशिका~~ ॥ ८२ ॥
पुनः पुनश्च तहेत्रमतिथीकृसनेत्रयोः ॥ विचित्रं च पवित्रं च तीर्थं नाधिजगाम ह ॥ ८३ ॥ सप्तानां
च पुरीणां च धुरीणामवयाम्यहं ॥ वाराणसीं सुनिर्वाणविश्राणनविचक्षणां ॥ ८४ ॥ तथापि न च तद्योग्यां
मयादृशो चरीकृताः ॥ तासां प्रभावं विज्ञायाप्यागमिष्याम्यहं पुनः ॥ ८५ ॥ तीर्थयात्रां प्रतिदिनं कुर्वन्नु
नं संवत्सरं ॥ न प्राप सर्वतीर्थानि तीर्थं कार्यं तिले तिले ॥ ८६ ॥ त्री ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्राणनं णा विचक्षणां सुष्ठु निर्वाणं सुनिर्वाणं सायुज्यं कैवल्यमित्यर्थः ॥ तस्य दि(प्र)श्राणने वितरणे समर्था जिवानां
तत्र विचक्षणां निपुणामित्यर्थः समर्था एवं चेत्सर्वलमन्यत्र गमनेनेति स्वयमाशंक्याह तथापीति तिले तिले तिलप
रिमिते प्रदेशे तीर्थं पततीस्तीति शेषः ॥ ८६ ॥

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

181

शू०स०

॥९२॥

जानन्नपिति सशिवशर्मा नानाश्रमाणे सेवत्रस्यागुणान्ज्ञानन्नपि निरगात् निर्गतः काश्या इत्यर्थः ॥ आमाणे काश्या
गुणज्ञाने हेतुमाह श्रवण इति अंतर्निष्ठ इत्यर्थः । तत्र भावितव्यरूपां मायां हेतु करोति ॥ किं कुर्वंति हि नितिहीति नि
श्चयेसं क्षुभितः चित्तस्यापि तत्र कारणत्वमाह कः समुच्चालितमिति कः पुरुषः ओ ज्ञस्यान स्थितं उत्कृष्टस्य
न स्थितमपि चित्तं न प्रतीपयेत् न प्रतिकूलयेत् न निवर्तयेदित्यर्थः ॥ तत्र दृष्टांतमाह तोयं चेति वेसुपमायां निवर्त्ति

अगस्तिरुवाच । जानन्नपि गुणान्देवि क्षेत्रस्यास्य परान् द्विजः ॥ नानाश्रमाणे श्रवणो निरगाहतथाप्यहो ॥ ८७ ॥
किं कुर्वंति हि शास्त्राणि प्रमाणानि सुंदरि ॥ महामायां भविव्रीं तां को निवारयितुं क्षमः ॥ ८८ ॥ कः समुच्चालितं
चेतो स्तोयं वा संप्रतीपयेत् । ओ ज्ञस्य न स्थितमपि स्वभावोयं चलस्तयोः ॥ ८९ ॥ शिवशर्मा द्विजन्सो
ध्वदेशाद्दूरांतरं क्रमात् ॥ महाकालपुरीं प्राप कालिकालविवर्जितां ॥ ९० ॥ कल्पे कल्पे खिलं विश्वं कलये
यः स्वलीलया ॥ तं कालं कलयित्वायो महाकालो भवत्किल ॥ ९१ ॥

नाभावे हेतुमाह । स्वभावोयं चलस्तयो इति ॥ यद्यतश्चलचंचलः स्वभावोवेति पाठे यत इत्यर्थे वा शब्दः । महा
कालपुरीं महाकालस्य पुरीं कालिकालविवर्जितां कालिकालाभ्यां न स्पृष्टां महाकाल नाम निर्वक्ति कल्पे कल्पे इति
लोकेन कलयेत् कालायत्वा भक्षयित्वा स कालः कालः ईश्वरो ग्रसत इति श्रुतेः । कालस्य भक्षक इति श्रुतेश्च तस्य

पुराणम् । का०खं० ९२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

182

॥ ९० स०

दृष्ट दृष्ट्वाःस्पृष्ट्वा निस्पृष्ट्वा नियेषां तेतथा स्पृष्ट्वाःपृष्टेति क्वचित्पाठः ॥ कषाघातं अश्वनोदिन्याः ताडनजं दुःखं विश्रमयंतिमहाकालप्रासाद्यातांकाष्ठायायां क्षणं विश्रम्य नाशयंतीत्यर्थः ॥ एतेनप्रासादस्या

महाकालपताका ग्रैःस्पृष्ट्वाःपृष्टेतुरंगमाः ॥ अरुणस्यकषाघातं क्षणं विश्रमयंतिखे ॥ ९९ ॥
महाकालमहाकालमहाकालेतिसंततं ॥ स्मरतः स्मरतो नित्यं स्मरकर्तृस्मरांतको ॥ ९९ ॥ एव
माराध्य भक्तेशं महाकालं ततो द्विजः ॥ जगाम नगरीं कांतीं कांतां त्रिभुवनादपि ॥ १०० ॥
लक्ष्मीकांतः स्वयं साक्षाज्जातं स्तत्र निवासिनः ॥ श्रीकांता नरकुरुते परश्रेहच निश्चितं ॥ १०१ ॥
इक्ष्वाकांतिमतींकांतींकांति मद्भिर्निषेवितां ॥ कांतिमान भवत्सोपि नाकांतिस्तत्रकस्यचित् ॥ १०२ ॥

पुण्हितत्वं घ्यनितं स्मरतश्चिंतयंतोध्यायतो भक्त्या नितियावत् स्मरतः करुणाईयाद्दृशा पश्यत इत्यर्थः ॥ स्मरकर्तृस्मरांतको ॥
श्रीकृष्णमहेशो ॥ निवासिन इति तन्नगरवासिनामुपलक्षणं ॥ कांतीनाम्ना कांतीनाम निर्वर्त्ति ॥ कांतिमतीमिति कांचीमिति
क्वचित्पाठः ॥ श्रीकांतान् लक्ष्मीपतीन् ॥ १०२ ॥ ॥ ९२ ॥ श्रीभवानीशंकराभ्यां नमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ ९३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

183

९२ ९३

तस्या एव नामांतरं निवेक्षि पापादिति। साकळपुरी कूळोतस्या नामांतर माह युगे युग इति उज्जयनीति प्राक् कल्पे सुवर्णे
शृंगा द्वितीये कुशस्थळी।। तृतीये वंतिनाम्नोक्ता चतुर्थे चामरावती।। पंचमे चूडामणिः प्रोक्ता षष्ठे पद्मावती स्मृ
ता।। सप्तमे चोज्जयनी पुरी तिं न समुद्धृयतां उद्धृ नतां णछ्ती सर्गः।। परः कोटीनि कोटिन्य: पराणि असंख्याता
नी त्यर्थः।। एकं लिंग मिति एकं ज्योति ज्योतिर्मये लिंग मिसत्रि मेलासंबं धः।। सिद्धवटे ज्योतिरिति।। इहावंत्यां

पायादवंती सा विश्वमवंतीति निगद्यते।। युगे युगे न्यनाम्नी साकळा वुज्जयनीति च।। ९२।। विपन्नो यत्र वै जं
तुः प्राप्या पिरावतां स्फुटं।। न प्रतिगंध माप्नोति न समुद्धृयति क्वचित्।। ९३।। यम दूता न यस्यां हि न वि
शंति कदाचन।। परः कोटीनि लिंगानि तस्यां संति पदे पदे।। ९४।। हाटके श्रो महाकाल स्तारके ना सोथि
वच।। एकं लिंगं त्रिधा भर्त्ता त्रिलोकी व्याप्य संस्थितं।। ९५।। ज्योतिः सिद्धवटे ज्योति स्तो पश्यंतीह ये द्वि
जाः।। अथ नाम्नी महाकाळ द्रष्टारः पुण्यराशयः।। ९६।। महाकाळस्य तल्लिंगं ये दृष्टं क दृष्टिभिः क्वचित्।।
न स्पृष्टास्ते महापापे न दृष्टा स्तेयमो द्भटैः।। ९७।। ।। ।। ।। ।। ।। ।। ।। ।। ।। ।। ।। ।। ।।

द्विजा स्त्रिवर्णा स्ते सिद्धवटे ज्योति ज्योतिर्लिंगं पश्यंति सिद्धवटे ज्योति स्त ज्योतिः पश्यंति इति वा स्थितः इति क्वचित्पाठः अथ येति श्री महाकाळ
स्य द्रष्टारः अत एव पुण्यराशयस्ते सर्वेपि न ज्योतिर्लिंगं पश्यंती सच्चयः क दृष्टिभिः कष्टबुद्धिः संसारांगार पच्यमाने रित्यर्थः
दृष्टिभिरिति क्वचित्पाठः।। ९७।। ।। ।। ।। ।। ।। ।। ।। ।। ।। ।। ९४ ।। ।। ।। ।। ।। ।। ।। ।। ।। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(184)

य॰ १०३

तत्रेति॥ तत्र पत्तु सं कर्त्तव्यं तत्त्वसं रु खोतिसंबंधः यत्त्व संनैसकं तन्नकां सा॰ चैत्र्हरां तसर्वकल्वेति वाँ द्वारवती नामाभि वर्त्ति चतुर्णामिति वर्गाणां धर्मार्थकाममोक्षाणां वर्गाणामिति पाठे अपि शब्दोस्य पेषामपि ॥१०४॥ अस्थीनीति॥ अहो आश्चर्यं यत्र द्वारकायां जंतूनां प्राणिमात्राणां अस्थीन्यपि चक्रांकितानि भवंसपि तत्र तस्यां शंखचक्रांकितेः शंखच

तत्र रूसंचयपत्रसंत त्वखा सर्व कुसीवत॥ सपरात्रमुषिखातुपयो द्वारवतीपुरी॥१०३॥ चतुर्णामपि वर्गाणां यत्र द्वाराणि सर्वतः॥ अतो द्वारवती सुक्ता विद्वद्भिस्तत्त्ववेदिभिः॥१०४॥ अस्थीन्यपि च जंतूनां यत्र चक्रांकितान्यहो॥ किं चित्रं तत्र पत्रस्यु शंखचक्रांकितेकरेः॥१०५॥ अंतकः शिक्षयत्येवं निजदूतान्मुहुर्मुहुः॥ तेसाज्यं द्वारवत्या ये नीमापिपापा गम्यते॥१०६॥ श्रीखंडकसआमोदः स्वर्णवर्णः चतादृशः॥ तस्याविस्त्वं धावेतीर्थे तद्गोपीचंदनेयथा॥१०७॥ ५९ ॥ ५९ ॥ ५९ ॥

त्वा धुपलक्षितैः वोरेजं तत्र रुतिशेषः ॥ सुर्भवेषु रतीकिं चित्रं नृकिं चित्पत्र सा: सर्वप्राणिनो भगवत्सारूप्य भाज इत्यर्थः तदुक्तं॥ संवत्सरं चतुर्मासं मासं मासार्द्धमेव च॥ द्वारकावासिनः सर्वे नरा

नार्यश्चतुर्भुजाः स्मृताः॥ पितामहकृतद्वारकामाहात्म्ये
द्वारकामाहात्म्यः॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०पु०स०

१८
॥ ९४ ॥
१८

ये

ज्वलदिंगलवत्प्रदीप्ताग्निवत् ॥ ज्वलदंगारवदिति वा ॥ कश्चित्स्यात्ठः ॥ प्रसंगात्तुलस्या माहात्म्यमाह ॥ तुलसीति ॥ तु
षन् अपहरन् ॥ अथ सा शिवशर्मा निभृतं द्रुतोनलसः ॥११२॥ मायापुरी नाम निर्वर्त्ति ॥ यत्रसति मायापाशे रहंका
रममकार रज्जुभिः न पाशैर्नबध्नाति प्राणिन इति शेषः प्रसंगाद्गंगाया माहात्म्यं वदन् कारीतरा भ्यः
हृताः स्त्रणुपेत ह्यात्मगोपीचंदनेनालांछितं ॥ ज्वलदिंगलवत्सोपि दुरंसाउपः प्रपन्नतः ॥१०८॥ तुलस्यलंरे
तायैये तुलसी नाम जापकाः ॥ तुलसीवनमालायै तेस्याऽभाद्दूरतोभटाः ॥१०९॥ मुनेस्सुद्वारवसार
लोनिपारितामुषन् ॥ अब्धिरत्नाकरोद्याऽपिलोकेषु पारगीयते ॥११०॥ द्वारवसांत्रिपंतये जंतवः काल
नोदिताः ॥ चतुर्भुजास्युर्वैकुंठे तेपीतांवरधारिणः ॥१११॥ तत्रापिसंतर्प्य पितॄन्ससदेवर्षिमानवान् ॥ त
त्रैतेषु चार्तिर्मेषुसस्त्रोस्त्वेवष्वतद्दित ॥११२॥ ततोमायापुरं प्राप्तो दुःप्रापं पापकारिभिः ॥ यत्र सा वैकुंठीमा
यामायापाशैर्नपाशयेत् ॥११३॥ केचिद्वदंति हरिद्वारं मोक्षद्वारं ततः परं ॥ गंगाद्वारं च केप्याहुः केचिन्मा
यापुरीं पुनः ॥११४॥ यतो विनिर्गता गंगा ख्याता भागीरथी भुवि ॥ यत्रानामोच्चारणात्सुसं पापं यातिसहस्रधा ॥११
पुरीभ्यः तस्याः श्रेष्ठतामाह यत इति द्वयेन ॥ यद्वागंगाद्वारं मोक्षद्वारं हरिद्वारमिति नामत्रयं निर्वक्ति यतइति ॥११५॥१६

॥१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

186

वैकुंठस्यैकसोपानमित्यनेनमोक्षद्वारनाम्नोपिनिर्वचनं॥अत्राप्लुताइत्यनेनवायन्नामेत्यत्रयत्नदृष्टोगंगाविषमः तर्यानूतपर्यणाकानूसायांत्रिकःपोत
वणिकृत्रिनपोतोभग्ननौकः॥मरणकालीनमोहोस्यचिंतामाह॥कलत्रमितिसार्द्धद्वयेनपुस्तकंसंभृतिःपुस्तकंभारः॥पुस्तकसमूहइतियावत्॥

पद्दं ये२ सं स

॥वैकुंठस्यैकसोपानंहरिद्वारंजगुर्बुधाः॥अत्राप्लुतानरायांतितद्विष्णोःपरमं॥११६॥तीर्थोपवासकंलत्वानिशाजा॥
च२ ॥गएतंतथा॥प्रातःस्नात्वोगंगायांतर्पयन्सततर्षसर्वतः॥११७॥यावत्सपारणंकर्तुमिच्छेद्द्विजसत्तमः॥यावद्वीतज्व॥
॥राक्रांतस्वपेकंसर्थमातुरः॥११८॥वैदेशिकस्तथैकाकीतथातिज्वरपीडितः॥चिंतामवापमहतींकिमेतत्समुपस्थितं॥
॥११९॥चिर्णवेनिमग्नापित्यक्तासोज्ञीवितेधने॥सांयात्रिकइवागाधेभिन्नपोतोमहार्णवे॥१२०॥कलत्रंकलत्रं॥ एःप्राप्तःक
ता २ ॥मेकपुत्राःकचतद्वसु॥कृतद्विचित्रवैदर्भ्यंकचापुस्तकसंभृतिः॥१२१॥अद्यापिनायुःपर्याप्तंपलितंनेथामयि॥कःस्वोयंदास लश्चाति
न एः१२ः

पलितंजराशौक्ल्यंपलितंजरसाशौक्ल्यमित्यमरः॥कालभयसंज्ञानाज्जीतिकालयंतःमृत्युःकःकालश्चेतिवापाठः॥१२२॥छ॥काशीवासिनेपरमात्मनेनमोनमः॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीर्थाटनेनशुद्धान्तःकरणस्याविवेकनाशकं विवेकमाह॥ अग्नावित्येकेन कूपं तु पुनः खनयेत्॥ काक्षान खनये दित्यर्थः॥ कः खनयेदिति वा पाठः॥ तस्माद्दैवक
रिष्यामीत्याह॥ चिंतया मी [illegible] मुक्त्युपायस्य साधितत्वादिति चिंता व्यर्थेत्याह॥ अथवेति द्वयेन॥ एको मुख्यः सदनुष्ठितः॥ संस्थासावनुष्ठितश्चेति तथा॥

॥मृत्युर्मूर्ध्नि स्थिता नाशो वासो ऽदूरे व्यवस्थितः॥ अग्नौ गृहोपरि ज्वलिते कूपं कः खनयेदिह॥११३॥ किमेस्थिश्चिंतनैर्व्यर्थैरतिपापकरैर्मम॥
॥चिंतयामि हृषीकेशं शिवदं शिवमेव च॥११४॥ अथवा मुक्त्युपायो वै मयैकः सदनुष्ठितः॥ मुक्तिः पुण्यैस्तु संप्रेता स्वनेत्र वि॥
॥षयीकृता॥११५॥ स्वर्गापवर्गयोरेकः साध्यो हि द्विविधा ध्रुवौ॥ तयोरसाधने पश्चात्संतापेन च तप्यते॥११६॥ अथवा॥
॥चिंतया किं मे तेन याऽडुरनुस्थया॥ रवेवाम [illegible] रणं श्रेयस्तीर्थवान्न यथा मम॥११७॥ किमहं संदृभागीव रथ्या क्वापि॥
॥म्रियेधुना॥ भागीरथ्यां म्रियेचाद्यका चिंता मम मूढवत्॥११८॥ चर्मास्थिसंचये नाहमनेन वपुषा ध्रुवं॥ प्राप्स्यामि निधनादत्र सि॥

सद्यथा भवति तथा अनुष्ठित इति वा संतापेन मनोदुःखेन वाचका राजरोगादिना च॥ पश्चात्तापेनेति पाठे तिमकालीनतापेनेत्यर्थः॥ तयोर्मया साधितत्वान्न ता
पो युक्त इति भावः॥ मुक्त्युपायमनुष्ठितत्वमंगीकृत्याह॥ अथवेति दुःखस्थि [illegible] तया अनवस्थितया रथ्या मितिकालाध्वनोरत्यंतसंयोगे द्वितीया रथ्यां यामि इत्यर्थः॥

॥ ९५॥ १८

दैनैश्रेय

चकार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृश्चिकः सविषकीटविशेषः॥ सप्तसप्तचतुर्दशादिनानि स्थित्वा यावन्मरणं प्राप्तस्तावदित्यदन्वयः॥ सप्तपंचेति क्वचित्पाठः॥ किंकिणीजालमालितं स्फुरत्

गएवंचिंतयतस्तस्य पीडासीदतिदारुणा॥ कोटिवृश्चिकदष्टस्य यावस्थातामवाप सः॥१२७॥ छ॥ छ॥ छ॥
कं.खं.को.हं.२ गास्मर्तव्यं विस्मृतं सर्वं निर्वर्तितं च॥ दिनानि सप्तसप्तेति स्थित्वा पंचत्वमागतः॥१२८॥ छ॥ छ॥ छ॥ छ॥
॥ तावद्वैकुंठभुवनाद्विमानं समुपस्थितं॥ तार्क्ष्योपलक्षितो यत्र ध्वजश्चातिसमुद्धृतः॥१२९॥ छ॥ छ॥ छ॥
॥ अधिष्ठितं सुकन्यानां स्वर्णकौशेयवाससां॥ चामरव्यग्रहस्तानां सहस्रेणातिविस्मृतं॥ ३०॥ छ॥ छ॥ छ॥
॥ पुण्यशीलसुशीलाभ्यां गणाभ्यां च विराजितं॥ चतुर्भुजाभ्यां स्वास्याभ्यां किंकिणीजालमालितं॥३१॥ छ॥ छ॥
॥ तद्विमानमथारूह्य पीतवासाश्चतुर्भुजः॥ अष्ठं चक्रे नत्वा वत्स सद्विजो दिव्यरूपणः॥१३२॥ छ॥ छ॥ छ॥
॥ इति श्रीस्कंदपुराणे काशीखंडे सप्तपुरीवर्णनं नाम सप्तमोध्यायः॥७॥ ॥ ॥ ॥ ॥ ॥
॥ लोपामुद्रोवाच॥ जीविते नैश कथामेनां पुण्यां पुण्यपुरीश्रितां॥ न तृप्ति मा[illegible]गता मिश्र त्वा[illegible] श्रीमुखेरितां॥१

घंटिकास्मरूहेन जात[illegible]मामाळमित्यर्थः॥ ॥इति श्रीरामानंदकृतायां काशीखंडटीकायां सप्तमोध्यायः॥७॥ पिशाचगुह्यकैं गंधर्वविद्याधर्प्रजाहता॥ आरभ्य
यतेष्टमे पंचश्लोकाः॥ तयस्त्रिनीमुखः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

189

अस्त्यत्र श्री कलैदेतुमा

गणाकुचलुः॥ ॥भगवद्भक्तियुक्तानां किमज्ञातमिति॥ द्वियद्विजः शिवशर्मा कएषइतिक इतिअन्वयः॥

॥भगवद्भक्तियुक्तानां किमज्ञातं भवादृशां॥ एतदेवद्दिनो नामयदुक्तं श्रामतालया॥७॥

गणाकुचलुः॥ ॥भगवद्भक्तियुक्तानां किमज्ञातं भवादृशां॥ एतदेवद्दिनो नामयदुक्तं श्रामतालया॥८॥ इतिस्वासव

यदन्यद पितेखित्ते प्रष्टव्यं नदत्रां कितं॥ संप्टच्छस्वमहाप्राज्ञप्रात्यानघ क्षुवामहे॥९॥ द्विव्यद्विजउवाच॥ कोएष

चनंभगवद्गुणभावित॥ अतिप्रीतिकरंहृद्यं ततसोस्यस्वाचहा॥९॥ कस्मैविकृताकाराकृतमेतन्ममागतः॥१०॥

लोकोल्प श्लोकः स्वल्पपुण्यजनोह्यतिः॥ दत्वानुतापभाजोयनानो

गणाकुचलुः॥ अयंपिशाचलोकोत्र वसंतिपिशाचाः॥ अल्पपुण्याल्पलक्ष्मी

हत्वाददस्यपि॥११॥ त्रिंवप्रसंगतोप्यर्च्यसहलक्ष्मुचिचलसः॥ काःपिशाचास्तइमेचते॥१२॥

स्वल्पपुण्य

हा॥ अल्पपुण्यजनाहृतिः॥ अपुण्यजनानांपुण्यजनानामाहृतयः शरीराणियस्यसतथा॥ स्वल्पपुण्य

जनाहृतिरिति॥ विस्मारः॥१०॥ अयमितिपिशाचादयश्चत्वारोदेवयोनिविशेषाः॥ विद्याधरेस्यमरः॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० पु० अ० १०

रू

पूर्वाध्यायांते तद्विमानमथारुह्येसनेनाशिवशर्मणः सायुज्यमुक्तिरुक्ता साप्यपर्यटमानेन तद्धिकायामाख्यापिकायामासन्नस्तस्य लावमार्वेदयतीत
तत्कारणं छतिजीवितेशोतिद्वयेन ॥ मोक्षं सायुज्यं ॥२॥ मोक्षः कैवल्यरूपः अमुमेवार्थं मायापुर्यादिषु साक्षात्सायुज्यं नास्त्येतेष्वेवं लक्षणं इति हाइति
हे सव्ययं उपदेशपारं पर्याभिध्यायितस्यासौ वरुणानमत्रेतीतिहासः पुरावृत्तं आर्षः पूर्ववृत्तांताश्रया इतिहासाद् इति देवब्रह्मस्मरणात् ॥ धर्मार्थकाम

१८
॥ ९६ ॥
१८

॥ मायापुर्यां मुक्तिपुर्यां शिवशर्मा द्विजोत्तमः ॥ मृतोपि मोक्षं नैवाप ब्रूहि तत्कारणं विभो ॥२॥
॥ अगस्तिरुवाच ॥ ॥ साक्षान्मोक्षो न चैतासु पुरीषु प्रियसत्तम भाविनि ॥ पुरोद्दिश्यामुमेवार्थमितिहा
॥ सोमयाश्रुतः ॥३॥ ॥ शृणु कांत विचित्रार्थां कथां पापप्रणाशिनीं ॥ पुण्यश्रीकसुशीलाख्यां कथितां शि ॥ ९
॥ वशर्मणे ॥४॥ शिवशर्मोवाच ॥ ॥ अयि विष्णुगणौ पुण्यौ पुंडरीकदलेक्षणौ ॥ किंचिद्विज्ञप्तुका
॥ मोहं प्रबद्धकरसंपुटः ॥५॥ न नाम युवयोर्वापि वेद्म्यौ लसा च किंचन ॥ पुण्यश्रीकसुशीलाख्यौ
युवां प्रवित्तुमर्हथः ॥६॥

थः

मोक्षाणामुपदेशसमन्वितं ॥ पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते इति ॥ आकल्पा आकारेण शोभनयेति यावत् ॥ चकारात् त्वमव द्रष्ट्या यात तथा च वक्ष्यति ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(191)

॥ १७ ॥

तनइति॥ ततस्तदनंतरं गच्छन्नूलोकं ददर्शेत्यन्वयः॥ कथंभूतं लोकं उल्लुकैरध्युषितं अधिष्ठितं कथंभूतैः पिचंडिलैः पिचंडउद

ततो गच्छन्ददर्शाग्रे हृष्टपुष्ट अनावृतं॥ पिचिंडिलैः स्थूलवक्त्रैर्मेघगंभीरनिस्वनैः॥१३॥
लोकेरध्युषितं लोकं श्यामकांगैः श्वलोमशैः॥ गणो कथ्यतं केनो कोलोकः पुण्यतः कुतः॥१४॥
गणगद चलुः॥ ॥उल्लुकानामयं लोकस्ते वैउल्लुकाः स्मृताः॥ न्यायेनोपार्ज्य वित्तानि गृह
यंति च ये भुवि॥१५॥ स्वमार्गगो पवाद्याश्च श्रद्धप्रायाः कुटुंविनः॥ संविभज्य च भोक्ता
रः को धास्त्या विवर्जिताः॥१६॥ न तिथिर्नैव वारं च संक्रांत्यादि न पर्व च॥ नाधर्मं च न धर्मं च विदंत्ये
ते सदा सुखाः॥१७॥ एकमेव हि जानंति कुवपुन्योहि योद्विजः॥ तस्मै ग्रासंप्रयच्छंति मन्यंते तद्ध्रुवः स्फुटं॥
१८॥ सन्त द्विजो ततोप्यत्रापि तेन पुण्येन उल्लुकाः॥ भुंजते स्वर्गसौख्यानि देववच्चाकुतोभयाः॥१९॥

शापिचिंडकुक्षी जठरोदरं त्वित्यमरः॥ सवत्ततेयेषां ते पिचिंडिला तुंडादिभ्य इलच्चेति इलच्प्रत्ययः तैः स्थूलोदरैरित्यर्थः॥
गृह्यंति गर्त्तं कृत्वा स्थापयंतीत्यर्थः॥ [illegible] तिपात स एवार्थः॥१९॥ श्री भवानीशंकराभ्यां नमः॥ श्रीराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुतौ गांधर्ववेदस्य सर्वथा॥ स्कतौ इतिक्काचित्॥ नाम्ना राजस्य क्षत्रस्मात्स नाम्ना राजस्येषु क्रतवः अस्मोयैस्ते तथा॥ तेन पुण्येनेति॥ गी

ततो विलोकयामास लोकं लोचनराम दं॥ केमीजना स्तु सोल्लोकः किंनामा वद तां गणो॥ गणोगणबू
यतु॥ गांधर्वस्त्वेषल्लोकोस्मीगंधर्वाश्चस्तु भवन्ति॥ देवानां गायना ह्येते चारणा स्तुतिपाठकः॥ २१॥
गीतज्ञाअतिगीतेन तोषयंति नराधिपान्॥ स्तुवंति च धनाढ्यांश्च धनलोभेन मोहिताः॥ २२॥
राज्ञा प्रसादत त्व ब्धानि स्तुवासांसि धनान्यपि॥ उव्याध्यापि सुगंधीनि कर्पूरादीन्यनेकराः
॥ २३॥ ब्राह्मणे भ्यः प्रयच्छंति गीतं गायं सहर्निशं॥ श्रुता वेव मेन स्तोषी नाम राजस्य क्रतुश्रमः॥
॥ २४॥ तेन पुण्येन गांधर्वो लोकस्तेषां विशिष्यते॥ ब्राह्मणा स्तोषिता स्तायद्धैगीतवा
द्यार्जितैर्धनैः॥ २५॥

तवाद्यार्जितैर्धनैर्ब्राह्मणा स्तोषिता इति॥ पल्लवै प्रसिद्धे पुण्यास्मिन्न शेषः॥ तेन पुण्येनेति योजना॥ गीतविद्याभ्यासेन॥ २५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गीतविद्याभ्यासेन महत्वप्राप्ता तु दावंहरणमाहतुः ॥ गीतविद्येति ॥ यद्वा गीतविद्यायाः फलं प्रसिद्धमेवेत्याह ॥ गीतविद्येति ॥
तुंबरुरसदंतो पिहिता ॥ कचित्या अतिदुर्लभौ अतिमान्यौ ॥ तत्र गीतविद्यायाः शिवः रूपं वदन् हेतुमाह ॥ नादरूपीति ॥ ॥

गीतज्ञाश्चातिगीतज्ञेन तोषयंति नराधिपान्यासक्तावंति च घना धांन्यघनलोभेन मोहिताः ॥
गीतविद्याप्रभावेन देवर्षिर्नारदो महान् ॥ मान्यो वैष्णवलोके वै श्रीशस्या-
तिवल्लभः ॥२६॥ तुंबुरुर्नारदश्चोभौ देवानामतिदुर्लभौ ॥ नादरूपी शिवः सा-
क्षान्नादतत्त्वविदो हि ते ॥२७॥ यदि गीतं करोत्येवै ते श्रीमद्धरिहरांतिके ॥ मो-
क्षासक्ता तत्फलं प्राकुः सान्निध्यमथवा तयोः ॥२८॥ गीतज्ञो यदि गीतेन प्राप्नोति
परमं पदं ॥ रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥२९॥ ॥ ॥ ॥

नादरूपी गीतरूपी षड्जादिस्वररूपीत्यर्थः ॥ गीतविद्यायाः निःकामसकामभेदेन फलद्वयमाह ॥ ॥
यदि गीतमिति ॥ द्वितीयपक्षं स्पष्टयति गीतज्ञ इति रुद्रस्येति विष्णोरप्युपलक्षणं ॥ ॥२९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

194

सदाकालं सर्वकालं सदा लोकमिति पाठे आ लोकं सृष्टेर्यथा स्यादित्यर्थः॥ एषा यदि गीत मित्यादि लक्षणा फलितमाह तदिति॥ तत्र स्मार्गीत

अस्मिन्नल्लोके सदा काले स्मृतिरेषा प्रगीयते॥ तन्नीतमाळया पूज्योदेवो हरिहरौ सदा॥ ३०॥ इति श्रीकृष्णवनपूरणा स्वाय
पुनरन्यन्मनोहरं॥ शिवशर्मा द्विजः प्रख्यो द्वारकी संज्ञं नगरं विदं॥ ३१॥ गणावु ... ॥ असौ वैद्याधरो लोको नानाविद्यावि
शारदः॥ एते विद्यार्थिनामन्नं कृपानवत्सर्कवर्क॥ ३२॥ औषधान्यपि यच्छंति नत्पीडाशमनानि हि॥ नानाकलाः शि
क्षयंति विद्यागर्वविवर्जिताः॥ ३३॥ शिष्यं पुत्रेण पश्यंति वस्त्रतांबूलभोजनैः॥ अलंकृताश्च सत्कन्या धर्मादुद्वाहयंति च॥ ३४॥

माळया गीत निकरेण॥ अथवा स्मृतिरेषेत्यनेन नत ... माळयेत्याद्येवोच्यते॥ तदा तच्छब्दः प्रसिद्धार्थः॥ तत्पीडाशमना निविद्यार्थिरोगना
शकानि अन्यदपि यावदपेक्षितमिति हि शब्दार्थः॥ धर्माद्धर्म निमित्तात् धर्ममुद्दिश्य पेत्यर्थः॥ छ॥ ॥ शिवाय नमः॥ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

195

ध०पु० अ०

अभिलाषधियाकामवांछयावलुरैर्द्दक्षैः सेवाकर्मस्तुस्तुष्टुवलुरैरित्येकं पदं वा ॥ आद्दतः आदरणीयः प्रतिष्ठितं शोधितं कोविदो पीत्यपिशब्दः समुच्चयेकोविदो

अभिलाषधियानित्यं पूजयंतीष्टदेवताः ॥ एतैनेंपुण्येर्वैसं तोहिविद्याधरवरांइमे ॥ २५ ॥ यावृदित्यं कथांवक्तुमावर्त्तेपमिनीपति ॥ पा ॥

धर्मराजोभिसं प्राप्तोदेवदुंदुभिनिस्वनैः ॥ २६ ॥ सौम्यमूर्त्तिर्विमानस्थोधर्मज्ञैः परिवारितः ॥ सेवाकर्मस्तुवलुरैर्भृत्यैस्त्रिनलुरैर्स

॥ १९ ॥ ह ॥ २७ ॥ धर्मराजउवाच ॥ ॥ साधुसाधु महाबुद्धे शिवशर्मन्द्विजोत्तम ॥ कुतोवित ब्राह्मणानां भवता प्रतिष्ठितं ॥ २८ ॥ छ

वेदाभ्यासः कृतः पूर्वंगुरवश्चाप्युतोषिताः ॥ धर्मशास्त्रपुराणेषु दृष्टोधर्मस्य याहृतः ॥ २९ ॥ प्रतिष्ठितं मुक्तिपुर्यद्विराम्पुगैतृश

तीररक्षं ॥ कोविदोसि कृत्वा नेवजीविनेजीविनेतरे ॥ ७०कळेवरस्थितिगंधिसदेवास्तु विभाजनं ॥ म्रुतीर्थेपुण्यपण्येनसम्यग्विनिर्मितत्वया ॥ ४१

स्तीतिकविसाठेजीविते नरेमरणेकळेवरमितिस्तुतीर्थेपुण्यमेवपण्यं विक्रेयं द्रव्यंतेन सम्यग्विनिर्मितं परिवर्त्तितं ॥ एतद्दुर्लभवतिमुतीर्थगतप्राप्य

मादायशरीरगतंशरीरलक्षणंवापापंत्यक्तमित्यर्थः ॥ श्रीरामायनमः ॥ श्रीशंकरायनमः ॥ श्रीश्री ॥ छ ॥ श्रीरुक्माणीशंकरस्वामीनमः ॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

196

अतइति॥ पांडित्यंसदसद्विवेकबुद्धिमत्वंविचक्षणत्वं॥ विद्वांसस्त्वाकेते हि ते पुरूपाये क्षिलक्षणमेकंक्षणमात्रंयथास्यात्तथा॥ अहःक्षेपंदिनव्यर्थतां नक्षिपंतिनन
यंतीत्यर्थः॥ अहःक्षयमिति क्वचित्पाठः॥ अहःक्षयं॥ क्षिपंतिक्षणमेकंहि ते मुधेति॥ निम्नितरयेएवंविधा बुधा इति वा॥ निमेषानिति॥ पंच वा षड्वा नि

अतएव हि पांडित्यं समाश्रियंते विचक्षणाः॥ अहःक्षयं न क्षिपंति क्षणमेकं हि ते मुधा॥ पाठांतरं॥
निमेषान्पंचषान्संप्राणंति प्राणिनो ध्रुवं॥ तत्रापि न प्रवर्तंते पुरुषकर्माणि गर्हिते॥४२॥ ७॥

निमेषान्पक्ष्मोन्मेषोपलक्षितान्कालांश्च यत्र मरणधर्मके शरीरे प्राणिनो जंतवः प्राणंति प्राणनव्यापारं कुर्वंति चेदंतदइत्यर्थः॥ अतस्तत्रा
पि पंचषेषु निमेषेषु पर्यंते कर्म्मणि पापकर्म्मणि अतएवानिंदिते गर्हिते निंदिते अथ कर्म्मणीति वा क्वचित्पाठः न प्रवर्त्तंते पुरुषः प्रवर्त्तितुं न कु
र्युरित्यर्थः॥ तत्रापि चेति पाठे निपातपरत्वेन व्याख्यातव्यं॥४२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०अ०

197

स्थिरापायइति॥ स्थिरः अपायो नाशो यस्य स कायः स्थिरापायः सदाकार्य्यइतिवापाठः॥ तत्तस्मात्प्रौढकार्य्ये महत्कार्य्ये नोऽस्मै कः प्रयोजनमिति
अर्थः॥ सदिति सत्कर्मणो यं विपाकः फलं किं तद्घदेतो भवतः॥ सखित्वं गतावि सन्वयः॥ किं चास्माभिः कर्त्तव्यं अस्मत्कर्त्तव्यस्य स्थैर्य च

व३

स्थिरापायः सदाकायो न च्यवनं निच्यनेवति॥ तन्नः प्रौढकार्ये किं न यतेत तत्त्वानिव॥४४॥छ॥छ॥
१८ सत्त्वरं गत्वरं चायुर्लोकः शोकसमाकुलः॥ तस्माद्धर्मे मतिः कार्य्या भवतेव सुधार्मिकैः॥४५॥छ॥
॥१००॥ सत्कर्मणो विपाकोऽयं तव वं ध्योम मामप्यहो॥ यदेतौ नगं इकौ सखित्वं भवंतो गतौ॥४६॥छ॥ छ॥
१८ मया त्वदीयतां तात साहाय्यं करवाणि किं॥ यत्कर्त्तव्यं मादृशैस्तत्तत्कृतं भवतैव हि॥४७॥छ॥
अद्यचन्यतरोऽस्मीहय इष्टो भगवतो रणे॥ सेवा सदैव मे त्वा प्राप्य श्रीमच्चरण सन्निधौ॥४८॥छ॥
ततः प्रस्थापितस्ताभ्यां प्राविशत्स्वपुरीयमः॥ अप्राक्षीच्च ततः ततोविप्रस्तो गणो प्रस्थितेयमे॥४९॥छ॥ ॥ १

कृतत्वादिस्माहाय कर्त्तव्यमितित्स गवतः लयोर्दृशीसावास्व स्यापिकृतार्थतामाह॥ अद्यचन्यतर इति श्रीमच्चरणसंन्निधौ वैकुंठना
थसन्निध्यौ अतिरम्यतरं यमपुरं चालक्ष्यातिविस्मयेन पृच्छति॥४९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पमं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

198

साक्षादिति॥अतिसौम्यतराकृतिः अतिशयेन शांतस्वभाव इत्यर्थः॥ विस्मयमेवस्मारयति॥आकर्ण्येति। विध्यतिभीताभवंति॥अन्यथायंमयादृष्टइत्यत्रइयं

३ था

॥शिवशर्मोवाच॥साक्षादयंधर्मराजोनतुसौम्यतराकृतिः॥धर्मीएयेवैचांस्यस्यमनःप्रीतिकराणिच॥५०॥पुरीसं॥
॥यमिनीसेयमतीवशुभलक्षणा॥आकर्णयस्यानामापिपापिनोतीवबिभ्यति॥५१॥यमरूपंवर्णयंतिमर्त्यलो॥
॥केन्यथाजनाः॥अन्ययंमयादृष्टोद्भुतंतत्कारणंगणौ॥५२॥केनुपश्यंतिमुंलोकंनिवसंतियथात्रके॥इद॥
॥मेवास्यकिंरूपंकिंवान्यत्रनिवेद्यतां॥५३॥गणावूचतुः॥शृणुसौम्यसुसौम्योसौदृश्यतेत्रभवादृशैः॥धर्म॥
॥मूर्तिःप्रशस्त्यैवनिःशंकैःपुण्यराशिभिः॥५४॥ छ॥काशी॥पुरेवसतियोखिलभूतवोतस्मैनतयसं॥

चान्यथादृष्टेतिवोद्धव्यं॥अन्यदपिप्रश्नत्रयमाहाकेनेति।प्रथमप्रश्नोत्तरंवदंतौचरमप्रश्नोत्तरमाहतुः॥शृणुसौम्येत्यादिना।अयमेवहियमइत्यादि२सज्जनैर्दृष्टैर्दूरतः॥श्रूयतेदृश्यतेचेतिपंचत्रिंशश्लोकेनान्वयः
यमंविशिनष्टि ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

199

।।०पू०अ०

यमंविशिनष्टि।।पिंगाक्ष इत्यादि।पिंगाक्षः पिंगलनेत्रः।क्रोधरक्तांतलोचनः क्रोधेनरक्तांतेलोचनेरक्तेप्रांतेरक्तमध्येवा।।यस्यसः।।विद्युल्ललनभीषणः।।विद्युदि
वयल्ललनंरसनंजिह्वातयाभीषणः।।जिह्वालिललनभीषणइतिपाठेजिह्वायाःयल्ललनंविस्तारस्तेनभीषणइत्यर्थः।।भ्रूकुटीकुटिलाननः।।भ्रकु

।।१९१।।

।।अयमेवहिपिंगाक्षः क्रोधरक्तांतलोचनः।।दंष्ट्राकरालवदनोविद्युल्ललनभीषणः।।५५।।ऊर्ध्वकेशोतिलंबांगः प्रलयांबुदनिःस्वनः।।
।।कालदंष्ट्रोद्यतकरोभ्रूकुटीकुटिलाननः।।५६।।आनयैनंपातयैनंबध्नानामुंचदुर्दमं।।घातयेनंसुदुर्वृत्तंमूर्ध्नितीव्रम।
।।योघनैः।।५७।।आताडयैनंदुर्वृत्तंधृत्वापादौशिलातले।।उत्पाटयास्यनेत्रेत्वंनिधायचरणंगले।।५८।।एतस्य।।।
।।।गल्लावुत्कृत्तौक्षुरेणाऽऽस्यविपाटय।।पाशेनकंठंबध्वास्यसमुल्लंबयभूरुहे।।५९।।छ।।छ।।छ।।

व्यावक्रभ्रुवाकुटिलमाननंयस्यसः।।जल्पलमाहतुरानयेत्यादिनावधायपाशायतीबंयस्यादयोधनैः लौहमुद्गरैः।।घनोमुद्गरघनाविस्मरः।।
गल्लौकपोलौधोगोगंडाविति यावत्।।समुल्लंबयभूमिस्पर्शोयथानभवति तथाअमुंपाशयेत्यर्थः।। ।।५९।।सदाशिवायनमः।।सांबशिवायनमः।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२००

करपत्रेण क्रकचेन क्रकचोऽस्त्री करपत्रमित्यमरः ॥ पार्ष्णिघातैर्गुल्फाधस्ताडनैः ॥ तद्ग्रंथी घुटिके गुल्फौ पुमान् पार्ष्णिस्तयोरधः इत्यमरः ॥
त्रैलोक्यं व्याप्तुं शीलं यस्याः सा त्रैलोक्यव्यापिनी त्रैलोक्यव्यापिकेत्यर्थः। तप्तिस्तप्तिस्वरूपात् तृप्तिसुखं करोतीति त्रैलोक्यतृप्तिलक्षणात् तत्स्वरूपिणी चतुर्विंशतितत्त्वस्व-
पिणी परमार्थरूपिणीति वा। त्रैलोक्यसुंदरं सौंदर्यं यस्याः सा त्रैलोक्यसुंदरी त्रैलोक्ये मनोहरेति वा तुर्यावस्थात्रयातीता। तदुक्तं। अहं भावान् अहं नाबौ सं तेस दसत।
३ति३ तुर्या। यद सत्तं समं स्वस्थं स्व चेतत्तुर्यमुच्यते॥ तुर्यस्यापि प्रतियोग्यधीनरूपत्वेन कल्पितत्वात्तदतीतं प्रतिक्रांतं यत्पदं परं ब्रह्म तत्प्रददातीति तुर्यातीतफलप्रदा।
त्रैलोक्यलक्ष्मीः त्रैलोक्यस्य लक्ष्मीर्यस्याः सकाशादिति वा त्रीणि पदानि यस्याः इति वा त्रिपदी त्रीणि पदा विचक्रमे इति श्रुतेः। त्रिषु लोकेषु पदं स्थानमस्या इति वा। त-
थ्याकालत्रयाबाध्या। सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः। तीर्थेषु साध्वी तीर्थ्याइति वा पाठः। तिमिरमंधकारं तत्र चंद्रिका कौमुदी वो ज्वला तिमिरमज्ञानं तस्य चंद्रिका नाशिके-
त्यर्थः इति वा॥७५॥ ईश्वरस्य तेजो वीर्यमग्निर्नीलत्वं गर्भे यस्याः सा तेजोगर्भा। तपसां सारो बलं यस्याः सा तपःसारा तपसां सारभूतेति वा। त्रिपुरशिरोगृहं यस्याः

॥ त्रैलोक्यव्यापिनी तप्तिस्तप्तिस्तत्त्वरूपिणी॥७४॥ त्रैलोक्यसुंदरी तुर्या तुर्यातीतफलप्रदा॥ त्रैलोक्यलक्ष्मीस्त्रिपदी तथ्या तिमिरचंद्रिका॥७५॥
॥ तेजोगर्भा तपःसारा त्रिपुरारिशिरोगृहा॥ त्रयीस्वरूपिणी तन्वी तपनांगजभीतिनुत्॥७६॥ तरिस्तरणिजामित्रं तर्पिताशेषपूर्वजा॥
॥ तुल्याविरहिता तीव्रपापतूलतनूनपात्॥७७॥ दारिद्र्यदमनी दक्षा दुःप्रेक्षा दिव्यमंडला॥ दीक्षावती दुरवाप्या द्राक्षामधुरवारिभृत्॥७८॥

सा त्रिपुरशिरोगृहा त्रयीस्वरूपिणी वेदत्रयरूपा तनोति प्रपंचजातमिति तन्वी उकारः छांदसः। सुंदरीति वा। गंगा नाम सहस्रेस्मिन् चतुर्थे विद्यते शाते॥ यद्द
ष्टमस्मात्तत्र तद्विदेशे समर्पितं॥१॥ तपनांगजस्य यमस्य भीत्रं तदधिकारखंडनात्। तरणिजायाः यमुनायाः ...मित्रमिति वा। तर्पितास्तृप्तिं प्रापिताः अ-
शेषाः भगीरथस्य पूर्वजाः प्रपितामहाः अशेषाणां वा जननानां पितृपितामहाद्याययेति वा सा तर्पिताशेषपूर्वजा तुल्या विरहितेत्यर्थः। परिमाणरहितेत्यर्थः। तीव्रपा-
पान्येव तूलानि येषु तन् नपात् वह्निस्तद्वाहिकेत्यर्थः। दारिद्र्यदमनी दोर्गत्यद्वेत्री दक्षा भुक्तिमुक्तिप्रदाने ... चतुरा दक्षभार्या प्रसूतिरूपा वा। प्रसूती मानवी दक्ष-
उपयेमे स्वनात्मज इति भागवतोक्तेः। दीक्षेति दुर्निरीक्षा दुःप्रेक्ष्या भक्तिमंतरेण द्रष्टुमशक्या दिव्यमलौकिकं मंडलं यस्याः सा दिव्यमंडला॥ वैदिकी तांत्रिकी च दीक्षावत्ती
ते यस्याः सा दीक्षावती दुरवाप्या ज्ञानमंतरेण प्राप्तुमशक्या। तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेयनायेति श्रुतेः। द्राक्षामद्वीकातद्वन्मधुरं वारि बिभर्तीति

॥ त्रिपुरसुंदरीस्तो ॥ ७८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

489

दर्शितं प्रकाशितं मायाविनेव गंधर्वेन नगरादिकमनेकं नानाविधं कुतुकं कौतुकं जगल्लक्षणमाश्चर्यं यया सा दर्शितानेककुतुका। दुःष्टानि यानि दुर्जय दुःखानि यानि तानि हरतीति वा तथा। दुष्टदुर्जयदुःखहृदिति पाठे। दुष्टानां दुर्जयदुःखहृत् तद्वत्यर्थः। दैन्यं कार्पण्यं हरतीति दैन्यहृत्। दैत्यहृदिति पाठे दैत्यान् हरति नाशयती त्यर्थः। दुरितानि हंतीति दुरितघ्नी च। दानेन रपत्यानि दानवास्तेषामरे विष्णोः पादपद्माज्जाता दानवारिपदांबुजजा। विष्णुपादाब्जसंभूते तिस्मृतेः। दंदशूकाः सर्पास्तेषां विषं हंतीति दंदशूकविषघ्नी च। दारिता विदारिता अघौघसंततिः पापसमूहपरंपरा यया सा दारिताघौघसंततिः॥२॥ द्रवतीति द्रुता वेगगामिनीति यावत्। मंदाररूपारिजातसंतानकल्पवृक्षहरिचंदनैर्व्याप्ता देवद्रुमपरिच्छिन्ना दुर्वाराणि प्रायश्चित्तादिभिरच्छेत्तुमशक्यानि अघानि पापानि विघातयितुं शीलं यस्याः सा दुर्वाराघविनाशिनी। उक्तं च। प्रायश्चित्तं यदि स्यात्तव जलकणिका ब्रह्महत्यादिपापे कस्त्वां स्तोतुं समर्थस्त्रिजगदघहरे देवि गंगे न मस्ते इति। दमयाद्यास्त्रदमादिना साधनचतुष्टयेन सा प्राप्या। तथा

॥दर्शितानेककुतुका दुष्टदुर्जयदुःखहृत्। दैत्यहृद्दुरितघ्नी च दानवारिपदांबुजा॥ दंदशूकविषघ्नी च दारिताघौघसंततिः॥
॥द्रुता देवद्रुमच्छिन्ना दुर्वाराघविघातिनी॥८०॥ दमग्राह्या देवमाता देवलोकप्रदर्शिनी॥ देवदेवप्रिया देवी दिक्पालपददायिनी॥८१॥
॥दीर्घायुःकारिणी दीर्घा दोग्ध्री दूषणवर्जिता॥ दुग्धांबुवाहिनी दोह्या दिव्या दिव्यगतिप्रदा॥८२॥ द्युनदी दीनशरणं देहिदेहनिवारिणी॥

चक्षुरादीनि त्वगंतो दांतउपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति। देवमाता अदिति स्वरूपा देवलोकादिप्रापयित्री देवाः स्वप्रकाशाः सर्व लोक्यंत इति लोकः तत्प्रदर्शिनीति वा॥८०॥ देवदेवप्रिया विश्वेश्वरवल्लभा देवी द्योतमाना स्वप्रकाशेत्यर्थः। दिक्पालपददायिनी इंद्रादिपददायिनीत्यर्थः। दीर्घमायुः कर्तुं शीलं यस्याः सा दीर्घायुःकारिणी॥ दीर्घा नवच्छिन्ना दोग्ध्री धर्मार्थकाममोक्षप्रसवा। दूषणवर्जिता अविघातकार्यरहितेत्यर्थः। दुग्धमेवांबु वहितुं शीलं यस्याः सा गोरूपधरा। पृथ्वीरूपेत्यर्थः। सा हि दुग्धांबुना चतुःसमुद्रं पूरितवती। अतो पि कोद्धितसोपिब्रवंति स्म। पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीमिति धर्मार्थकाममोक्षाख्यदुग्धत इति दोह्या। धर्मार्थकाममोक्षा यस्याः प्राप्यत इत्यर्थः। दिविभवा दिव्या अलौकिकेत्यर्थः। दिव्यगतिप्रदा अलौकिकगतिप्रदेत्यर्थः। दिवो नदी द्युनदी स्वर्गंगेत्यर्थः। दीनशरणं दीनानां महापातकिनामपि शरणं रक्षित्री। तदुक्तं। माता पि संत्यजेत् पुत्रं ब्रह्महत्यादिकारिणं। त्वं पुनर्गंगे हितं मत्वा पु

॥ २५१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोनत्रि ॥ देदानवासन्नावस्थितो हि देहवान्विनाशिकाभिरन्नसेयोपाधि ॥ ॥ भूतस्य वदयविनाशितात्यर्थः ॥८२॥ ४॥ २

द्राघीयसी दीर्घा महत्तरेति यावत्। महांतं विभुमात्मानं प्रकृतो महीयांसमिति श्रुतेः। द्राघहंत्री संतापच्छेत्री खंडितापापसंततिः पुरंपरायया सा दलितपापतत्र संततिः। दूर देशांतरे चरितुं शीलं यस्याः सा दूरदेशांतरचरी दूरदेशास्थितापि स्मर्तॄणां सर्वपापनाशिनीत्यर्थः। अज्ञा भक्तिध्यानयमाद्यैर्विना न गम्यतः इति। तदुक्तं। अज्ञा भक्तिध्यानयमाद्यैर्यतमानैर्गंतुं शक्यो देव इहैवाम्युयरूशः। दुर्गमेयो जन्मशतैश्चापि वितानैस्तं संसारध्वांतविनाशं हरमीडे इति। देवानामभीष्टा देववल्लभा देवः श्री विष्णुः शिवो वा वल्लभो यस्याः सा तथेति वा। दुर्वृत्तान् दुष्टान् पाप्मनो वा हंतीति दुर्वृत्तघ्नी दुर्विगाहा अनुग्रहमंतरेण। अमनुमशक्या दुर्विगाहेति पाठे स एवार्थः॥ दयाधारा दयाधारा अपाधिकरणं दयावती कृपायुक्ता। दुःखेन आसादनं ज्ञानं प्राप्तिर्वा यस्याः सा दुरासदा दाने पुरुषार्थचतुष्टयप्रदाने शीलं स्वभावो यस्याः सा दानशीला द्रवितुं निरंतरं गंतुं पापसंचयान् द्रावयितुं शीलं स्वभावो यस्याः सा द्राविणी। द्रुहिणेन ब्रह्मणा स्तुता द्रुहिणस्तुता दैत्यदानवयोः संशुद्धिं सत्त्वशु

॥ द्राघीयसी द्राघहंत्री दलितपातकसंततिः॥ दूरदेशांतरचरी दुर्गमा देववल्लभा॥ दुर्वृत्तघ्नी दुर्विगाहा दयाधारा दयावती॥ ८४॥ दुरासदा दानशीला॥
॥ द्राविणी द्रुहिणस्तुता॥ दैत्यदानवसंशुद्धिकर्त्री दुर्बुद्धिहारिणी॥ ८५॥ दानसारा दयासारा द्यावाभूमिविगाहिनी॥ दृष्टादृष्टफलप्राप्तिर्देवतावृं॥
॥ दवंदिता॥ ८५॥ दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा॥ दंडयित्री दुष्टनीतिर्दुष्टदंडधरार्चिता॥ ८६॥ दुरोदरघ्नी दावार्चिर्द्रवद्द्रव्यैकशेवधिः॥

द्धिर्यस्याः सा तथेति। दुष्टा बुद्धिर्दुर्बुद्धिः तां हर्तुं शीलं यस्याः सा तथेति संसरणं संसारः॥ ८५॥ दानेन सारो ज्ञानं यस्याः सा। एतमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः। दयासारो ज्ञानं यस्याः सा दयासारा द्यां दिवं भूमिं च विगाहितुं शीलं यस्याः सा द्यावाभूमिविगाहिनी। दृष्टफलं ऐहिकसुखादि अदृष्टफलं पारलौकिकं स्वर्गमोक्षादि तयोः प्राप्तिर्यस्याः सा दृष्टादृष्टफलप्राप्तिः देवसमूहैः रविवादिता स्तुता वा देवतावृंदवंदिता सर्वदेवनमस्कृतेति वा राहो केः॥ ८६॥ दीर्घं महद्व्रतं संकल्पः दर्शनादिलक्षणो यस्याः सा दीर्घव्रता। दीर्घा दृष्टिर्यस्याः सा दीर्घदृष्टिः अपरिच्छिन्नज्ञानस्वरूपा वा दीप्तं शोरवकुंदेंदुवज्ज्वलं तोयं यस्याः दीप्ततोया। तदुक्तं वाराहे। ... शांखकुंदेंदुधवले ति। दुःखेनालभनं प्राप्तिर्यस्याः सा दुरालभा। दंडयित्री दंडकर्त्री कारयित्री वा दंडनीतिरर्थशास्त्ररूपा वा दुष्टे पापेषु दंडं धारयंतीति ये ते दुष्टदंडधरा राजादयः तैरर्चिता दुरोदरं द्यूतादि दुर्व्यसनं तद्धंतुं शीलं यस्याः सा दुरोदरघ्नी दावो वनाग्निस्तद्वदर्चिर्दीप्तिर्यस्याः सा दावार्चिः॥ ८७॥ द्रवतीति द्रवत् स्वकार्यव्यापनुवत्परिपूर्णमित्यर्थः। द्रव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

491

दीनानां संसारांगारेपच्यमानां संतापानां ध्यात्मिकाधिदैविकाधिभौतिकाख्यानूत्रामयितुं शीलं यस्याः सा दीनसंतापत्रामनी दीनसंतापत्रामनीति पाठे स एवार्थः॥ धात्री
पुरुषार्थचतुष्टयदात्री दवथुवैरिणी संसारजन्यभयकंपनाशिनी। दरीविदारणेपरं तात्पर्यं यस्याः सा दरीविदारणपरा। तदुक्तं वाराहे॥ विंध्यपाषाणभेदिन्नी तिदांतावज्री
श्रुतेंद्रिया दांतजनानां प्रिया वा यस्याः सा दांतजनप्रिया दारितमृदितटं ययासा दारिताडितटा दुर्गनाम्नानंदैत्यं हतवतीति दुर्गा गोगीत थाचात्रैवदेवीवाक्यं अग्र घप्रभ
तिमेनाम दुर्गेति ख्यातिमेष्यति॥ दुर्गो दैत्यस्य समरे घातनाद्दति दुर्गमादिति। तद्रूपा वा। गंगा गोयत्तु रंयच्च यो ऽस्ते मूढधीस्तु सः। इति भविष्यद्वचनात्॥ दुर्गारण्ये दु
र्गमेवने दुर्गासुरएवचारण्यं अभयत्रं हंतुं शीलं यस्याः सा दुर्गारण्यप्रचारिणी। धर्मरूपो ऽश्वो यस्याः सा धर्मद्रवरूपा वा। तथा च वाराहे॥ धर्मस्तु द्रवरूपेण ब्रह्मणा निर्मितः पुरा॥
तद्देगंगेति विख्याते तिस्मृतेः। धर्मधुराधर्मश्रेष्ठा सर्वोत्कृष्ट धर्मस्वरूपे त्यर्थः। अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति याज्ञवल्क्योक्तेः। धेनुः कामधेनुस्वरूपा। धेनुना

॥दीनसंतापत्रामनी दात्री दवथुवैरिणी॥ दरीविदारणपरा दांता दांतजनप्रिया॥ दारिताडितटा दुर्गो दुर्गारण्यप्रचारिणी॥ धर्मद्रवा धर्मधुरा धेनुर्धीरा धृतिर्ध्रुवा॥
॥धेनुदानफलस्पर्शा धर्मकामार्थमोक्षदा॥ ८९॥ धर्मोर्मिवाहिनी धुर्या धात्री धात्रीविभूषणा। धर्मिणी धर्मरूपा च धन्विकोटिकृतावना॥ ९०॥ ध्यातपापहरा ध्येया

प्रास्मि कामधुगिति भगवतोक्तेः। धीरा विदुषी यद्वा धियं अद्वैतबुद्धिं रातिददाति धीरा। उक्तं च ईश्वरानुग्रहादेव पुंसामद्वैतवासनेति। धृतिः धारिका स सेतुः विधृतिर्लोकानाम
संभवायेति श्रुतेः। ध्रुवा नित्या नित्यश्च नाकावारतद्भ्रमेयं ध्रुवमिति श्रुतेः कूटस्थमचलं ध्रुवमिति स्मृतेश्च॥ ८९॥ धेनुदानस्य फलं यस्मात्ताद्वशः स्पर्शो धेनुदानस्य यत्फलं
पुण्यं तेन स्पर्शो यस्याः सा धेनुदानफलस्पर्शा। धेनुदानस्पर्शिति क्वचित्पाठः। धर्मकामार्थमोक्षदा पुरुषार्थचतुष्टयदात्री धर्मरूपा एवोर्मयस्ता वाहिनी॥ ९०॥ धुर्या श्रेष्ठा
धात्री जनयित्री पोष्ट्री दधातीति वा। पद्मा अलंकरणं धात्री विभूषणं धात्री विभूषणेति क्वचित्पाठः। धर्मिणी जगदुत्पत्त्यादिधर्मवती पुण्यवतीति वा। धर्मएव स्त्रीत्वं स्व
भावो यस्याः सा धर्मशीला च धन्विनीं कोटिभिः कृतमवनं यस्याः सा तत्कोटीनां कृतमवनं य या सा धन्विकोटिकृतावना। तथा चोक्तं। धनुषां कोटिभिर्बलं तदर्द्धं आज्ञावी
जलं। तदर्द्धं च हरेः स्थानं दानयोरिति। ध्यातुः पुरुषस्य पापहरा ध्यातपापहरा ध्यातपापहरेति क्वचित्पाठः। ध्येया बुभुक्षुभिर्मुमुक्षुभिश्च चिंत्या धावनी पवित्रकारिणी गमन
न्नमितदर्द्धं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गंगानामसहस्रंतेपंचमेविवृतेगते॥यदष्टमसूक्तंतत्तदिष्वेशोसमर्पितं॥ ॥धर्मरूपाधाराधर्मंप्रियतइतिवाधर्मधर्मिणांमध्येसारश्रेष्ठाधर्मसारा
धनंददातीतिधनदा।धनवर्द्धिनीधनवृद्धिकर्त्री।धृतिवर्द्धिनीतिक्वचित्पाठः।धर्माधर्मलक्षणौयौगुणौतयोःछेत्रीभेत्रीधर्माधर्मगुणछेत्रीधत्तूरकु
सुमानिप्रियाणियस्याःसाधत्तूरकुसुमप्रिया।धर्मेशीतन्नियंत्री।धर्मशास्त्रंजानातीतिधर्मशास्त्रज्ञाधर्मशास्त्राद्वाजानातीतिधर्मशास्त्रज्ञाधर्म
शास्त्राद्वाज्ञाअवबोधनंयस्याःसाधर्मशास्त्रज्ञाधनंचधान्यंचधनधान्येतयोर्वृद्धिकर्त्रीधनधान्यसमृद्धिदाता।धर्मलभ्यायोगैकप्राप्या॥१०॥
[illegible]॥धूनयतिपापानीतिधूः।धूर्जटेरीश्वरस्यजटायांसंस्थासंस्थितिर्यस्याःसाधूर्जटिजटासंस्था।धन्याकृतार्थाधनायहिताध
न्येतिवाधीःसामान्यात्मिकाबुद्धिंधारणावतीतितद्विशेषरूपावा॥१३॥नंदातद्दात्री।तदुक्तं।नंदाबालकनंदावेति।निर्वाणजननीकैवल्यसंपादयित्रीनंद

॥धर्मधाराधर्मसाराधनदाधनवर्द्धिनी॥११॥धर्माधर्मगुणछेत्रीधत्तूरकुसुमप्रिया॥धर्मेशीधर्मशास्त्रज्ञाधनधान्यसमृद्धिदा॥धर्मलभ्याधर्मजलाध
र्मप्रसवधर्मिणी॥ध्यानगम्यस्वरूपाचधरणीधातृपूजिता॥धूर्धूर्जटिजटासंस्थाधन्याधीर्धीरणावती॥नंदानिर्वाणजननीनंदिनीनुन्नपातका॥१४॥निषि
द्धविघ्ननिचयानिजानंदप्रकाशिनी॥नभोंगणचरीनूतिर्नम्यानारायणीनुता॥१५॥निर्मलानिर्मलाख्यानानाशिनीतापसंपदां॥नियतानित्यसुखदा
॥नानाश्चर्यमहानिधिः॥१६॥नदीनदसरोमातानायिकानाकदीर्घिका॥

यितुंशीलंयस्याःसानंदिनीवशिष्ठधेनुरूपावानुन्नानिदूरीकृतानिपातकानिययासानुन्नपातका।निषिद्धउत्सादितःविघ्ननिचयोययासानिषिद्धविघ्न
निचया।निजःस्वात्मानंदंतंप्रकाशयितुंशीलंयस्याःसानिजानंदप्रकाशिनी।नभोंगणचरीआकाशमार्गवहा।नुतिःस्तुतिरूपादीर्घत्वमार्षं।नम्यावंद्यानाना
रायणीनारायणशक्तिः॥[illegible]॥नुताब्रह्मेंद्रादिभिःस्तुता।निर्मलःनिर्गतःसंसाररूपोमलोयस्याःसानिर्मला।निर्मलंसंसारनाशकंआख्यानंकथनंयस्याःसा
निर्मलाख्यानानाशिनीतापसंपदांतापपरंपराणांविघातिनी।नियताएकरूपानितरांयतासंयतेतिवानित्यमनुखंअमलसुखंददातीतिनित्यसुखदानानाश्च
र्यमहानिधिःनानाश्चर्यंजगत्तस्यमहानिधिःपरमेरधिष्ठानमित्यर्थः।नदीसरिद्रूपानदसरोमातानदानांसरसांचजनयित्रीनायिकाश्रेष्ठासर्वनियंत्रीस

३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का०स०जं०ए

कोनत्रिंश

नाः२

नष्टानांसंसारपतितानांउद्धरणेमोचनेदक्षा।नष्टोद्धरणाधीराचनंदयतिसम्यग्ज्ञानंकरोतीतिनंदना।आनंदमानंदंसम्यग्दिंदातुंशीलंयस्याःसानंददायिनी।निर्णि
क्तंपवित्रीकृतंअशेषंभुवनंययासानिर्णिक्ताशेषभुवना।निर्गतःसंगःसंबंधोयस्याःसानिःसंगा।नितःसंगोनहिसंनतइतिश्रुतेः।निर्गतःउपद्रवआध्यात्मिकादिल
क्षणोयस्याःसानिरुपद्रवा।निर्गतआलंबआश्रयोयस्याःसानिरालंबा।स्वमहिम्निप्रतिष्ठितेत्यर्थः।सभगवान्कस्मिन्प्रतिष्ठितःस्वेमहिम्नीइतिश्रुतेः।निःप्रपंचा
प्रपंचातीता।एकमेवाद्वितीयमितिश्रुतेः॥निःशेषेणनाशितंमहामलमज्ञानंययासानिर्णाशितमहामला॥५०॥निर्मलज्ञानजननी।ज्ञानाद्वैतैकल
दानोत्पादिनी।निःशेषाणांप्राणिनांतापःआध्यात्मिकादिलक्षणस्तान्हरतीतिनिःशेषप्राणितापहृत्।नित्यउत्सवोयस्याःसानित्योत्सवा।नित्येनसुखे

१८ ॥२५३॥ १८ नष्टोद्धरणशीलाचनंदनानंददायिनी॥९८॥निर्णिक्ताशेषभुवनानिःसंगानिरुपद्रवा॥निरालंबानिःप्रपंचानिर्णाशितमहामला॥९८॥ १८
निर्मलज्ञानजननीनिःशेषप्राणितापहृत्॥नित्योत्सवानित्यतृप्तानिराकारानिरंजना॥९९॥निरवद्यानिरीहाचनीलकंठोत्सवाम्बुदा॥ ॥ २५
नंदिभृंगिगणस्तुत्यानागानंददानमात्मजा॥१००॥निःप्रस्पृहानाकनदीनिरयार्णवदीर्घनौः॥पुण्यप्रदापुण्यगर्भापुण्यापुण्यतरंगिणी॥ १८
॥१०१॥पृथुःपृथुफलापूर्णाप्रणतार्तिप्रभंजनी॥

न२ नस्वरूपानंदेननित्यंसर्वदावाप्तास्वानित्यतृप्ता।नमस्कार्यानमस्कारविषयाअंतर्मेतानंतरहितानिरंजना।निष्ठाकाष्ठानियमइत्यमरः।इतिपा वत्
तद्वतीनिष्ठावती।निरनिर्गतःआतंकःआशंकायस्याःसानिरातंका।तत्रकोमोहःकःशोकइतिश्रुतेः।निर्गतःपापलेपोयस्याःसानिराल्लेपा।शु
द्धमपापविद्धमितिश्रुतेः।निश्चलःकूटस्थआत्मायस्याःसानिश्चलात्मिका।निःक्रियात्मिकेतिक्वचित्पाठः।निर्गतंअवद्यंदूषणंयस्याःसानिर
वद्या।निरवद्यंनिरंजनमितिश्रुतेः।निरीहाचेष्टारहिताकूटस्थमचलंध्रुवमितिश्रुतेः।...नीलकंठोत्सवाम्बुदा।...।विश्वेश्वरमस्तकगा।नंदि
भृंगिगणस्तुत्या।नंदीचभृंगीचगणश्चतैःस्तावैर्वाग्भिर्नोनाम्भ्यांस्तुत्या।स्तुत्यहानिनागानांनागजानांनंदयंतीतिनागानंदा।...।नगात्मजाहिम
वद्दुहिता।हिमाचलतनयेतिश्रुतेः।निःप्रस्पृहाविघ्नरहिता।निरनिर्गताःप्रत्यूहायस्येतिवानाकनदीस्वर्गनदी।निरयार्णवस्यपापसमुद्रस्यपार
प्रापिकामहतीनौकेत्यर्थः॥७०॥पुण्यप्रदापुण्यंददातीतिपुण्यप्रदा।पुण्यंगर्भेयस्याःसापुण्यगर्भा।पुण्यापुण्यस्वरूपा।तदुक्तंपादेपुण्यपारनरवा
यस्यांसापुण्यनदीतिवापुण्यतरंगिणी।पृथुर्महतीपरिपूर्णेत्यर्थः।...वरूपावाप्रपृथुनिमहांतिफलानियस्याःसापृथुफला।कमनीयांस्वभावात्पृथुफलान्यरार्णसर्वव्यापिकाअनवच्छिन्नप्रवाहस्वरूपावाप्रणतानांभक्ति

ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९९४

प्राणान् प्रददातीति प्राणदा नां प्रकर्षेण खंडयतीति प्राणप्रदा। प्राणजननी जंतूनां स्यादिनी॥८०॥ प्राणेशी प्राणानां नियंत्री प्राणो हिरण्यगर्भः समष्टिरू
पस्तद्रूपं वर्त्तते यस्याः सा प्राणरूपिणी। हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदिति श्रुतेः॥ पद्ममालयं यस्याः सा पद्मालया॥
लक्ष्मीस्वरूपेत्यर्थः। परा शक्तिर्माया स्यान्तद्रूपा परा शक्तिर्विविधैव श्रूयत इति श्रुतेः। पुरं जितं त्रिपुरारेः परमा चासौ प्रिया चासौ प्रियाचेति पुर
जित्परमप्रिया॥ परा सर्वोत्कृष्टा तत्सामर्थ्याच्य धिक स्व [illegible] श्रूयत इति श्रुतेः। परफलस्य कैवल्यस्य प्राप्तिर्यस्याः सा परफलप्राप्तिः॥ समा
पीता पिताम्बर पुरनिवासं वितरसि इत्युक्तेः पावनी सर्वपापशोधनी प्रायश्चित्तं यदिस्यात्तत्र जलं का ब्रह्महत्यादि पापइत्युक्ते श्रवणपयस्विनी प्रश
स्तजननी प्रशस्ता जलवती पुण्यतोयेत्यर्थः परमानंदो यस्याः सा परानंदा स्त्री सर्ग॥९०॥ प्रकृष्टो हर्षो यस्याः सा प्रहृष्टा हर्षो प्रतीति [illegible] स्याम् इति प्रतिष्ठा
पालनी पालनकर्त्री परापरस्वरूपा पूरयतीति वा परा पुराणेषु पठिता पुराणपठिता तत्प्रतिपाद्य पुराणः परमात्मा तद्रूपत्वेन कथिता पठितेत्यर्थः प्राणा

प्राणदा प्राणजननी प्राणेशी प्राणरूपिणी॥ पद्मालया परा शक्तिः पुरजित्परमप्रिया॥ परापरफलप्राप्तिः पावनी च पयस्विनी॥१०३॥ परानंदा प्रकृष्टा
र्था प्रतिष्ठा पालनी परा॥ पुराणपठिता पीता प्रणवाक्षररूपिणी॥१०४॥ पार्वतीप्रेमसंपन्ना पशुपाशविनाशिनी॥ परमात्मस्वरूपा च परब्रह्मप्रकाशि
नी॥१०५॥ परमानंदनिष्पंदा प्रायश्चित्तस्वरूपिणी॥ पानीयरूपनिर्वाणा परित्राणपरायणा॥१०६॥ पापेंधनदवज्वाला पापारिः पापनामनुत्॥
परमैश्वर्यजननी प्रज्ञा प्राज्ञा परा वरा॥१०७॥ प्रत्यक्षलक्ष्मीः पद्माक्षी परव्योमा मतस्त्रवा॥ ॥॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सर्वेषां प्रियतमा सर्वान्प्राणातीति प्रणवाक्षरं ॐकारस्तद्रूपिणी॥१०४॥ पार्वतीप्रेमवानारूपप्रेमसंपन्ना प्रीतिसंयुक्ता। परप्रेमास्पदेत्यर्थः। पशवो जीवानां पाशा
श्चतुर्विंशति तत्त्वानि तेषां मोचनी विपाशिनी निपाठे स एवार्थः॥१००॥ गंगानाम सहस्रेऽप्युक्त्ववेकेनि हन्ते शतेः॥ यदहं मम भक्तानां नहि श्वेशो समर्पितं॥ परमात्मस्व
रूपा च॥ परब्रह्मैकलक्षणा च परब्रह्मप्रकाशिनी परब्रह्मस्फोटिनी॥ परमानंदस्य निष्पंदः [illegible] लुनंत ह्युत्पत्तिर्व्यक्तिः यस्याः सा पुण्यकर्महेतुत्वात् सा परमानंदनि
ष्पंदा॥ प्रायश्चित्तस्वरूपिणी सर्वप्रायश्चित्तरूपा प्रायश्चित्तं नुतं गंगायत्र गंगानार्विघत इति स्मृतेः॥ पानीयरूपनिर्वाणा जलस्वरूपमेव कैवल्या। कैवल्यमेव जलं इति
ख्यातेत्यर्थः। परित्राणपरायणा रक्षणे तत्परा श्रयरूपा पापान्येवेंधनानि तेषु दवज्वालाव नाशिनि निरवा पापारिः पापानां शत्रुः पापानि तन्नाम नुदतीति पापना
मनुत्। परमैश्वर्यजननी अणिमाद्यैश्वर्यदात्री॥१०॥ प्रज्ञा प्रज्ञा स्वप्रकाशज्ञाना अनेकस्वभावा प्राज्ञा ज्ञानविघनेयस्याः सा प्राज्ञी प्रत्यक्षा लक्ष्मी रूपेण स्थानि विवापा
श्चार्यस्याः प्रत्यक्षलक्ष्मीः साक्षाल्लक्ष्मीस्वरूपेति वा पद्मपत्रवदक्षिणी यस्याः सा पद्मा [illegible] क्षी परव्योमपरप्रकाशरूपं आस्तनं परलरिहितं स्वस्वरूपं भक्तेभ्यः
स्रवति प्रयच्छतीति परव्योमामृतस्रवा काशस्थो गंगादित्याभ्यायात्॥१०६॥ श्रीमंगलमूर्त्तये नमः॥ श्रीरामाय नमः॥ श्रीवरदमूर्त्तये नमः॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गं०प्र०अं०९

प्रसन्नममलानं तत्कार्यरूपममलेन संस्पृष्टं रूपं स्वरूपमस्याः सा प्रसन्नरूपा प्रकर्षेण निधीयते कार्यजातं प्रलयकाले स्यामिति प्रणिधिः पुनातीति पूता परमपवित्रस्व
भावा ॥ पवित्राणां पवित्रं य इति स्मृतेः । अत्यक्षदेवता परोक्षप्रत्यक्षं चेतन्यरूपा । यत्ता क्षादपरोक्षाद् ब्रह्मेति श्रुतेः ॥ २० ॥ पिनाकिपरमप्रीता विश्वेश्वरस्या
त्यंतवल्लभा परमेष्ठिनो ब्रह्मणः कमंडलुराश्रयत्वेन यस्याः सा परमेष्ठिकमंडलुः । आदावादिपितामहस्य नियमव्यापाररूपात्रे जलमिति स्मृतेः ॥
पद्मनाभपदार्घ्येण प्रसृता विष्णुपादार्घ्येण संभूता प्रस्नात्वन्नग गायिनो भगवतः पादोदकं पावनमिति विष्णुपादार्घ्य संभूते त्यादि श्रुतेः ॥ प
द्मनाभपदायात प्रसृतेति च पाठः पद्मानां मालाः वर्त्तते यस्यां सा पद्ममालिनी परमर्द्धिं ददातीति परमर्द्धिदा ॥ पुष्टिं करोतीति पुष्टिकरी पथ्या
संसाररोगस्य सा पथ्या स्वरूपा मूर्त्तिः परिपूर्णरूपा उदनादि भरणरूपा वा प्रभावती । प्रकाशवती पुनातीति पुनाना पीता नां पापकर्त्तॄणां पीता
सतीति वा गर्भान् रहंतीति पीतगर्भघ्नी पापान्येव पर्वतास्तान् नाशयितुं यस्याः सा पापपर्वतनाशिनी ॥ ११० ॥ फलं देयत्वेन वर्त्तते यस्यां सा फलिनी ॥

१८ शालं०
२५४॥
१८

प्रसन्नरूपा प्रणिधिः पूता प्रत्यक्षदेवता ॥ पिनाकिपरमप्रीता परमेष्ठिकमंडलुः ॥ पद्मनाभपदार्घ्येण प्रसृता पद्ममालिनी ॥ १०९ ॥ परमर्द्धिदा
पुष्टिकरी पथ्या मूर्त्तिः प्रभावती ॥ पुनाना पीतगर्भघ्नी पापपर्वतनाशिनी ॥ ११० ॥ फलिनी फलहस्ता च फुल्लांबुजविलोचना ॥ फालितैनोमहा ॥२
क्षेत्रा फणिलोकविभूषणं ॥ १११ ॥ फेनच्छलप्रणुन्नैना फुल्लकैरवगंधिनी ॥ फेनिलाच्छांबुधाराभा फुडुच्चाटितपातका ॥ ११२ ॥ फाणित
स्वादुसलिला फांटपथ्यजलाविका ॥ विश्वमाता च विश्वेशी विश्वा विश्वेश्वरप्रिया ॥ ११३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भक्तेभ्यो दातुं फलं हस्ते एव यस्याः सा फलहस्ता फलं मातुलिंगादि फलं हस्ते यस्या इति वा च फुल्लांबुजानीव विकसितानि लोचनानि यस्याः सा फुल्लांबुजविलोच
ना फालितं खंडितमेनसां पापानां महाक्षेत्रं यया सा फालितैनोमहाक्षेत्रा । भोगवतीरूपेण सर्पलोकविभूषणरूपा ॥ फणिलोकविभूषणं ॥ फेनच्छलेन
प्रणुन्नमेनो यया सा फेनच्छलप्रणुन्नैनाः ॥ फुल्लानि विकसितानि यत्कैरवं तद्वद्गंधो विद्यते यस्याः सा फुल्लकैरवगंधिनी ॥ फेनिलेन युक्तं यदंबु तस्य या धारा प्र
वाहस्तेन आभा दीप्तिर्यस्याः सा स्वरूपा वा सा फेनिलाच्छांबुधाराभा ॥ ४० ॥ फुडु इति शब्दानुकरणं फुडु इति शब्देन उच्चाटितं पातकं यया सा फुडुच्चाटितपातका ॥ फा
णितमिव पक्वान्नविशेष इव स्वादु सलिलं यस्याः सा फाणितस्वादुसलिला यदा फांटं तक्रं तद्वत् पथ्यं पक्वान्नं तेनाविका । विश्वेषां माता विश्वमाता
विश्वेशी सर्वेश्वरीत्यर्थः ॥ विश्वा सर्वस्वरूपा विश्वेश्वरस्य प्रिया ॥ विश्वेश्वरो वा प्रियो यस्याः सा विश्वेश्वरप्रिया ॥ ११३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

496

ब्रह्मणेपरमात्मनेहिरण्यगर्भायवेदान्पुरा हिता ब्रह्मण्या हिरण्यगर्भादीन्करोतीतिब्रह्मण्यता ब्रह्मणः शक्तिः ब्राह्मी ब्रह्मणि भवानेकर्म्मल जगत्स्थितिरूपा वा ॥५०॥
ब्रह्मिष्ठात्वमहिमस्थैर्यः ब्राह्मणत्वा ॥ विगतं मलं पापं यस्मात्तथाभूतमुदकं यस्याः सा विमलोदका ॥ विभावरी रात्रिरूपा ॥ अघोरघुघ्न स्य भार्यारूपा
वा तथाश्च पार्श्वे ॥ श्रीरघुनाथो महाराजः मानमंडलपालकः ॥ तस्यासन्शतसाहस्राः सन्ततः कमलेक्षणाः ॥ तासां विभावरी श्रेष्ठा वैष्णवतनुमध्यमेति ॥ चावि
रजा ॥ विगतं रजो यस्याः सा ॥ रजःशुद्धसत्वस्वरूपः ॥ विक्रान्तव्याप्तमनेकं विष्टपं भुवनं यया सा विक्रान्तविष्टपा ॥ विश्वमित्रं जगद्धितैषिणी ॥ विक्रपदा दुर्गा
विष्णुपदी ॥ विष्णो ॥ स्यं वैष्णवी ॥ वैष्णवानां विष्णुभक्तानां प्रिया वैष्णवप्रिया ॥ विरूपाक्षो त्रिनेत्रः प्रियं करोतीति विरूपाक्षप्रियकरी ॥ ८७ ॥ विभूतिरणिमादि ऐ
श्वर्यरूपा ॥ विश्वतः सर्वतो मुखानि यस्याः सा विश्वतोमुखी ॥ सर्वतः पाणिपादान्तं सर्वतोक्षिशिरोमुखमिति स्मृतेः ॥ ११५ ॥ विगतः पाशो बन्धनं यस्याः सा
संसाररूपं बन्धनं यस्याः सा ॥ विपाशा नदीविशेषरूपा वा ॥ तथा चाश्विषपर्वणि । दृषद्वती विपाशां च विपापां स्थूलवालुकामिति ॥ विबुधस्य वस्त्रोः स्वैर्बुधाद

श्रीहिरण्य ब्रह्मस्वरूपा ब्रह्मिष्ठा ॥ विमलोदका ॥ विभावरी चाविरजा विक्रान्तानेकविष्टपा ॥ ११४ ॥ विश्वमित्रा विष्णुपदी वैष्णवी वैष्णव
प्रिया ॥ विरूपाक्षप्रियकरी विभूतिर्विश्वतोमुखी ॥ ११५ ॥ विपाशा वैबुधी वेद्या वेदाक्षररसस्रवा ॥ विद्या वेगवती वंद्या बृंहिणी
ब्रह्मवादिनी ॥ ११६ ॥ वरदा विप्रकृष्टा च वरिष्ठा च विशोधिनी ॥ विद्याधरी विशोका च वयोवृन्दनिषेविता ॥ ११७ ॥ बहूदका बलवती
व्योमस्था विबुधप्रिया ॥ ११८ ॥

॥ ॥ वस्त्रेकभवा वा वेद्या वेत्तुं योग्या वेद्या वेद्येति चान्यत्र वेदाक्षरेभ्यो वेदान्तेभ्यो ब्रह्मानन्दरसं स्रवतीति ब्रह्मानन्दस्य स्रवो
यस्याः सा ब्रह्मानन्दस्रवा ॥ विद्या ब्रह्मविद्यारूपा ॥ वेगवती स्रोतोगा ॥ वन्दनीया वंद्या ॥ [illegible] बृंहिणी देहे [illegible] प्राणानां पित्री ॥ ७७ ॥ ब्रह्म वक्तुं शीलं यस्याः वा६
सा ब्रह्मवादिनी ॥ वरं ददातीति वरदा ॥ विशेषेण प्रकृष्टा विप्रकृष्टा ॥ सर्वोत्तमस्वरूपः ॥ चवरिष्ठा ॥ वौपासिणिहोलेशात इति विशोधनगाडुः शोधकः तोरयातीति धारयति पाप्य
तीति विशोधनी वा धौविकस्तान् ब्रह्मविद्यारूपान नमयति व्याप्यतीति विशोधनी विशेषेण ज्ञो ध्यतिपवित्रयतीति वा ॥ विद्याधरतीति विद्याधरी विद्याधरस्त्री
रूपिणी वा ॥ जानाति कमलो रूपेति विशेषेण ॥ विगतः शोको यस्याः सा विशोका ॥ वयोवृन्दैः पक्षिसमूहैः नितरां सेविता वयोवृन्दनिषेविता बहून्युदकानि यस्यां
सा बहूदका ॥ बलं वर्त्तते यस्याः सा बलवती ॥ ८० ॥ व्योमस्था परमे व्योम्नि तिष्ठतीति व्योमस्था परमे व्योमन्निषण्णा दिस्मृतेः ॥ विबुधानां दे
वानां प्रिया विश्वैश्वर्ये प्रिया वा विबुधप्रिया ॥ ११८ ॥ ५ ॥ श्री ॥ श्री ॥ श्री ॥ ॥ ॥
स्प२

३५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

497

ना॰ स॰ अ॰ एको

न॰ टि॰ १॰

॥२५५॥

वाणीवचनरूपा सरस्वतीरूपा वा वेदप्रतिपादकत्वेन वर्त्ततेयस्याः सा वेदवती मोऽमेणेऽत्तरकांडप्रसिद्धा॥ कृतेयुगेवेदवती त्रेतायां जनकात्मजा॥ द्वापरे द्रौपदी
जातेन कृष्णा निहा॥ पत्नीतिवचनात्॥ विता ज्ञानस्वरूपा॥ ब्रह्मविद्यास्वरूपतरमोऽवि धतेयस्याः सा ब्रह्मविद्यातरंगिणी ब्रह्मविद्यानदीस्वरूपा ब्रह्मांड
कोटिषु तितंब्रह्मांडानि व्याप्तमंबु यस्याः सा ब्रह्मांडकोटिव्याप्तांबुः ब्रह्महत्यापहारिणी ब्राह्मणवधापहरणशीला ब्रह्मेशा विष्णुरूपा हिरण्यगर्भविष्णुना
धनारायणस्वरूपा च बुद्धितः कारणभेदस्तद्रूपा॥ बुद्धिर्बुद्धिमतामस्मीतिभगवद्वचनात्॥ ज्ञानस्वरूपा च॥२०॥ विभावे मैश्वर्ये विभवोयास्मिंस्तत्
भवं वा वर्द्धयितुं शीलं यस्याः सा विभववर्द्धिनी विशेषेण लासं तु शीलं यस्य ताद्दशं सुखं विलासिनां वा सुखं ददातीति विलासिसुखदा वेश्या वेश्यजातिरूपा॥
वश्यपाशीतपाटैश्वर्याभोनेसर्पः॥ तथा च भागवते स्त्रवं तिसरितो भीजाः रतीविम्बाविम्बवाक्याः कृताः शाब्द तो विशेषरूपे सर्थः व्यापिनी व्यापनशीला च
रूपापारीणः धर्मो सत्तित्रूपेसर्थेः वृषांकस्य वृषध्वजस्य मौलिमस्तके निलयमाश्रयोयस्याः सा वृषांकमौलिनिलया॥ विपन्नानां विपद्ग्रस्तानां स्वजने
मतानां वा आर्तिप्रभंजिनी॥१२०॥ विभिः पक्षिभिः व्याप्ता या सीतीयावत्॥ विनयपुक्ता इति वा विनीता विशेषेण नतान् मेसर्थः गरुडप्रस्तत्रूपा वा ब्र

वाणीवेदवती वित्ता ब्रह्मविद्यातरंगिणी॥ ब्रह्मांडकोटिव्याप्तांबु ब्रह्महत्यापहारिणी॥११८॥ ब्रह्मेशा विष्णुरूपा च बुद्धिर्विभववर्द्धिनी॥ विलासि
सुखदा वश्या व्यापिनी च वृषारणिः॥११९॥ वृषांकमौलिनिलया विपन्नार्तिप्रभंजिनी॥१२०॥ विनीता विनता ब्रध्नतनया विनयान्विता॥
विपंची वाद्यकुशला वेणुश्रुतिविचक्षणा॥१२१॥ वर्चस्करी बलकरी बलोन्मूलितकल्मषा॥ विपाका विगतातंका विकल्पपरिवर्जिता॥
॥१२२॥ वृष्टिकर्त्री वृष्टिजला विधिर्विच्छिन्नबंधना॥

ध्नतनया गोस्वरूपा सूर्यतनया हि गा वा इति श्रुतेः यमुनारूपा वा॥७॥ गंगा नाम सहस्रे अस्मिन्विरते सहस्रनेशते॥ यदष्टमस्तत्र तद्विद्वेशो नामीयते॥२॥
विनयेन अन्विता युक्ता विनयान्विता॥ वीणाप्रभृतीनां तु यन्त्रसमुदायेन अन्विता॥ विपंची वीणा तद्रूपा वीणा वेणुनंदा॥ रिवाघतरूपायतेनमद्रसादितत्रैवा
नैः॥ वाद्यकुशला वादनेन त्रकुशला दक्षा॥ वेणुश्रुतेश्च परागाविशेषशाने विचक्षणा निपुणा वर्चस्करी तेजस्करी बलकरी सामर्थ्यकरी बलेन
ज्ञानेन सामर्थ्येन वा उन्मूलितानि कल्मषानि यया सा बलोन्मूलितकल्मषा॥ विगताः पापा यस्याः सा विगतपापा विशेषेण गतआतंको भयं यस्याः
सा विगतातंका विकल्पपरिवर्जिता अरोपभेदरहिता वृष्टिकरी सविताखरूपा आदित्याज्जायते वृष्टिरितिश्रुतेः स्मृतेश्च॥ वृष्टिजला वृष्टेः कारणभूतंगे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

भक्तानां व्रतस्य संकल्पस्यानुसारेण यस्याः सा व्रतरूपा॥ एकादश्यां व्रतस्वरूपा वा॥ बहूनां विघ्नानां विनाशं करोतीति बहुविघ्नविनाशकर्त्री॥ बहुविघ्नविनाशा
त्ह्रदिति केचित् वसुधारा वसोर्धारारूपा वसून् रत्नाष्ठादीन् स्मात्तरूपेण धरतीति वा वसुमती स्वर्णादिमती पृथ्वीरूपा वा॥ विचित्राण्यंगानि यस्याः सा वि-
चित्रांगी २०॥ विश्वावसुः सूर्यस्तद्रूपा वह्निरूपा वा विशेषण जयतीति विजया भवान्याः सखी रूपा वा॥ विश्ववीजं जगदुत्पादनानिमित्तं वामा मनोहरा॥ चंद्रे
वी चेति वामदेवी वामदेवस्य पत्नीति वा॥ वरान् प्रददातीति वरप्रदा॥ मंदाकिनी स्वर्गगंगा॥ महान् आनंदो यस्याः सा महानंदा॥ महाश्चासावानंद
श्चेति वा अस्मिन् पक्षे स्त्रीत्वमार्षं॥ माता प्रमाता सर्वहितेच्छिणीति वा पापानां मुक्त्यै तरंगो यस्याः अस्ति सा मुक्तितरंगिणी कुतो वीची वीचीस्तुल्पपदिग
तालोचनपथ इत्युक्तेः मुक्तिरूपास्तरंगा यस्याः सा॥ तथा महाननुदयो यस्याः सा महोदया महोदयस्वरूपा वा मधुमधु नंजलं यस्या अस्ति सा मधुमती
७ नदीविशेषरूपा वा इरावती मधुमती सत्रैव तेः॥ महत् पुण्यं यया सा महापुण्या स्वरूपा वा मुदाकरा मुदो हर्षस्याकरा आश्रयभूता टाबेत त्वं केचित्॥१२५॥ महापुण्य

व्रतरूपा विघ्नरूपा बहुविघ्नविनाशकृत्॥ वसुधारा वसुमती विचित्रांगी विभावसुः॥ विजया विश्वबीजं च वामदेवी वरप्रदा॥

मु० २ ॥१२४॥ मंदाकिनी महानंदा माता मुक्तितरंगिणी॥ महोदया मधुमती महापुण्या मुदाकरा॥१२५॥ मुनिस्तुता मोहहंत्री
महातीर्था मधुस्रवा॥ माधवी मानिनी मान्या मनोरथपथातिगा॥१२६॥ मोक्षदा मतिदा मुख्या महाभाग्यजना
श्रिता॥ महावेगवती मेध्या महा महीषिदक्षिणा॥१२७॥

मुनिभिः स्तुता मुनिस्तुता मुनिभिः पूजिता सर्वैरिति स्मृतेः॥ ३०॥ मोहहंत्री अज्ञाननाशयित्री महान्ति तीर्थानि यस्यां सा महातीर्था॥ सर्वतीर्थमयी गंगे
त्युक्तेः॥ महातीर्थरूपा वा मधु मधुरमुदकं स्रवतीति मधुस्रवा॥ मा या लक्ष्मीः तपोनिवं त्रीधवरूपा वा माधवी तथाचरिहरिवंशे॥ माया विद्या हरेः प्रो
क्ता तस्या ईशो [illegible] भगवान्॥ तस्या धवः स्वामीति शब्दितः इति॥ माधवस्येयं मधुवंशोद्भवा स तु जरारूपा मधुविद्या वा बोध्या वा मननात्ध्यानयोग
च्च विद्धि भारते माधव इति व्यासवचनात्॥ मानः पूजा वर्त्ततेयस्याः सा मानिनी प्रेमसंरंभो वा मनः शांततनुत्वा मायी घवसद्यां सर्वर्त्तते यस्या इति वा मान्या
पूज्या मनोरथं मनसोऽभ्यगच्छतीति मनोरथपथातिगा॥ सर्वस्यापि वेश्यर्थ॥ मोक्षं ददातीति मोक्षदा ऽभ्यो ऽयमेभ्यः स्वइच्छतीति वा मोक्षदा मुख्या श्रेष्ठा महद्भा
ग्ययेपातैर्जनैः सेवि ता महाभाग्यजनाश्रिता॥ महान् वेगो स्य भावः प्रियो वा यस्याः सा महावेगवती तथा महदृष्टि संसार नाशिनीति [illegible] थाचक्षस्येति॥
वा मनुः शरीर संसारं दधे त्वं पुनर्भवकथां विलुपसि॥ वेपूरीत्यमिह तेषु रापगा येषु तासादतत्व मीहत इति तत्र मतिदा ऐश्वर्यं दात्तनिर्भयं यस्याः
भूतिमैश्वर्यं वा भूषयतीति विभूषणा भूतिदक्षिणेति पाठे भक्तेभ्य ऐश्वर्यदाने समर्थेस्यर्थः॥ भवभूषयतीति केचित्॥१२७॥ ॥ ॥ ॥ ॥ ॥

= एतानि मंदाकिन्यादीनि महाभाग्यजनाश्रितांतानि नामानि त्वावा भावस्वरूपिणी त्येतन्नाम्नः पुरः पठ्यानि = २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिलोचनस्याभिप्रायं जानातीति भाललोचनभावज्ञा तं चक्षव्यं चक्षवच्छक्तं व्यक्तं वंति तेषां प्रभुः ।।७०।। ज्ञानं तिज्ञानप्रशमनी मत्वा ज्ञानेन ना
शानेन व्याप्तिज्ञानोच्छ्री ।।भिन्नो विदारितो ब्रह्मांडमंडपो यया सा भिन्नब्रह्मांडमंडपा ।।भक्तारिदारितीति भक्तैर्भक्तस्यासुखेन लक्ष्यते इति सुलक्षा
भाग्यवद्दृष्टिगोचरी ।।भाग्याद्दृष्टिवतां नेत्रविषयः ।।टाबंतत्वं कचित् ।।भोजितं नाशितं भक्तोल्लवानां उपद्रवाणां कष्टं समूहो यया सा भोजि
तोपल्लवकुला भक्ष्यं पक्वान्नं भोज्यं सिद्धान्नं ताभ्यां सुखप्रददातीति भक्ष्यभोज्यसुखप्रदाति ... भिक्षुणि भिक्षुभिक्षयाच
ली... या भिक्षूणां परमहंसानां माता मोक्षस्तनदात्री भावमयी ति उत्पादयतीति भावा ।।७०।।भावस्वरूपिणी पदार्थस्वरूपिणी सर्वत्र
स्वाइदं सर्वं पदार्थमात्मेति स्मृतेः ।।१२८।। ।।महान् वेगो वर्त्तते यस्याः सा महावेगवती ।।मेध्या पवित्रा पवित्राणां पवित्रं य इति स्मृतेः ।।महा
।६।। उल्लवरूपा ।।महत् उच्छ्रवं इति वचनात् ।।महिमानो भूषणानि यस्याः सा महिम्नो भूषणं ती ...तिमहिमभूषणा ।।महिमजिर्वाणि १८

भाललोचनभावज्ञा भक्तभव्यभवप्रभुः ।।ज्ञानविज्ञानप्रशम... भिन्नब्रह्मांडमंडपा ।।भक्ताक्षरिदा सुलक्ष
ला भाग्यवद्दृष्टिगोचरा ।।भोजितोपल्लवकुला भक्ष्यभोज्यसुखप्रदा ।।१२९।। भिक्षाणी या भिक्षुमाता भावा भा ।। २५६ ।।
वस्वरूपिणी ।।महावेगवती मेध्या महामाया महिमभूषणा ।।महाप्रभावा महती मीनचंचललोचना ।।१३०।।महाका १८
रुण्यसंपूर्णा महर्द्धिश्च महोत्पला ।।मूर्तिमन्मुक्तिरमणी मणिमाणिक्यभूषणा ।।१३१।।मुक्ताकलापनेपथ्या
मनोनयननंदिनी ।।महापातकराशिघ्नी महादेवार्द्धहारिणी ।।१३२।। ।। ।।

ष्यत इति तथा ।।महान् प्रभावो यस्याः सा महाप्रभावा ।।महती अपरिच्छिन्ना ।।मीनेइव चंचलानि लोचनानि यस्याः सा मीनचंचललोचना ।।महत्का
कारुण्येन करुणया ... संपूर्णा महाकारुण्यसंपूर्णा ।।संपन्ना महती ऋद्धिर्यस्याः सा महर्द्धिः ।।७०।। महन्ति उत्पलानि यस्याः सा महोत्पला ...
मतः ।।प्रत्यक्षशरीरवती ।।परंब्रह्मैव तीर्थं भागीरथी प्रत्यक्षा पुरतः स्थिता ... ।।मुक्तिरमणी मुक्तिरूपा रमणी सुंदरी स्त्री मणयो माणिक्या
नि च भूषणानि यस्याः सा मणिमाणिक्यभूषणा ।।मुक्ताकलापः ... नेपथ्यं ... कं यस्याः
यस्याः सा मुक्ताकलापनेपथ्या ।।मनांसि नयनानि च नंदयतीति ... यस्याः सा मनोनयननंदिनी ।।महापातकराशिघ्नी महापातकस्य
समूहानां घ्नी ।।महादेवस्यार्द्धं शरीरं हरति स्वीकरोति यस्याः सा महादेवार्द्धहारिणी गौरीरूपेणेत्यर्थः ।।१३२।। ।। ।। ।। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महत्यऊर्म्मिर्मालाः वर्त्ततेयस्याःसामहोर्म्मिमालिनीमुक्तामुक्तस्वरूपा॥८०॥गंगानामसहस्त्रेस्मिन्नव्रव्ह्मेविवृतेरोते। यदद्दष्टमभरक्तत्र तद्दिष्टेस्तेसमर्पितं॥ महतीचा सौदेवीचमहादेवी॥मनोसिउन्मन्यतेउत्कृष्टज्ञानमुक्तास्निकरोतीतिमनोन्मनी॥सत्वशुद्धिकारिणीत्यर्थः॥संधिरार्षः।महतांपुण्यानांउदयेनपूर्वेन प्राप्यागम्यामहत्पुण्योदयप्राप्यामायेवतिमिरमंधकारस्तस्यचंद्रिकानाशिका।मायातिमिरचंद्रिका।महतीचासौविद्याचेतिमहाविद्याब्रह्मविद्यास्वरूपेत्य र्थः॥महतीचासौमायाचेतिमहामायास्वकार्यव्यापकमेत्यर्थः।स्वकार्यव्यापकत्वंमहत्वंमहतीमेधायस्याःसामहामेधाब्रह्माकारबुद्धिरूपाबा।म हच्चतदौषधंचेतिमहौषधं॥महामोहमहौषधमितिपाठेहृद्ध्मानमोहोयस्याःसामहामोहात्रापिमहत्वंस्वकार्यव्यापकत्वंच सावमहौषधंचेतितथाऽत्रम हत्वंसंसाररोगनिवर्त्तकत्वमेवअस्मिन्पक्षेनामद्वयमिदंमार्त्तंडमंडलजयंतीरूपांधरतीतिमालाधरीमालाकारपलीरूपावामहानुपायःप्राप्तिसाधनःश्रवण मननादिलक्षणउपायोयस्याःसामहोपायाणुरूपाथेचतुष्टयेमहोपायरूपाबा॥१०॥महान्तउरगावासुकिप्रमुखाअनंतयोविस्फुक्तानियस्याःसामहोरगविभूषणा॥

महोर्म्मिर्मालिनीमुक्तामहादेवीमनोन्मनी॥महत्पुण्योदयप्राप्यामायातिमिरचंद्रिका॥१२३॥महाविद्यामहामायामहामेधामहौषधं॥मालाधरीम होपायामहोरगविभूषणा॥१२४॥महामोहप्रशमनीमहामंगलमंगला॥मार्त्तंडमंडलचरीमहालक्ष्मीर्मदोज्झिता॥१२५॥यशस्विनीयशोदाच योग्यायुक्तात्मसेविता॥योगसिद्धिप्रदायाज्यायज्ञेशापरिपूजिता॥१२६॥यज्ञेश्वरीयज्ञफलदायज्ञनीयायज्ञस्करी॥यमिसेव्या

सर्वभूषणेत्यर्थः॥१२४॥महामोहंप्रशमयतीतिमहामोहप्रशमनीमहामंगलानामपिमंगलंमहामंगलमंगलं॥मंगलानांचमंगलमितिस्मृतेः॥सूर्यमंडलेवर्त्ततेइ तिमार्त्तंडमंडलचरीआकाशगंगारूपेणसूर्यमंडलेचरतीतिवामहतीचासौलक्ष्मीश्चेतिमहालक्ष्मीः॥महत्वंनिरतिशयसाम्यत्वंमदउज्झितोययासामदोज्झि तावोज्झितामदोज्झितायशोवर्त्ततेयस्याःसायशस्विनी॥यशोददातीतियशोदा॥नदपत्नीरूपाबा॥चाप्यन्या योग्यायहिता॥योगगम्येतिबा॥युक्तआत्मायेषां तैःसेवितायुक्तात्मसेविता॥२०॥योगानामष्टांगादीनांसिद्धिप्रदा।याज्याप्रयायजेमानस्वरूपानायज्ञेशानपरिपूरिताव्याख्याता अधिष्ठितेतियावत्॥यज्ञेनाप रिपूजितेतिकेचित्पाठः।तत्रयज्ञेशः।पूजितोययासायज्ञेशापरिपूजिता।यद्वायज्ञेशाःश्राद्धकृतेनपरिपूजितेतिव्याख्येयं।तथाचहरिवंशेपार्तिनातहरणे।अथाय योविष्णुपदीस्मृतापिकेनधारितासंपूज्यजातांनतः।कृष्णःसर्वास्त्वामस्मत्याम्यक्षजहरतियज्ञेश्वरीयज्ञाधिष्ठात्रीदेवतास्मृता .... यज्ञफलप्रददातीतियज्ञफलप्रदाभक्ता नांसंउत्पतीतिवायज्ञनीयायज्ञस्करीभुक्तफलनिकरीयमिसेव्याजितेंद्रियैःसेवनीयायोगेनमायासंबंधेनयोनिःकारणंयोगयोनिः।योगस्यषडंगादेयोनिर्हेतुरिति वासाधीजीवात्मनोरैक्यचिंतनंसवर्त्ततेयस्याःसा...योगिनीयोगिनीगणरूपाच॥१०॥युक्ताबुद्धिर्ब्रह्मात्मैकत्वज्ञानंतद्ददातीतियुक्तबुद्धिदा॥युक्तेभ्योजि तेंद्रियेभ्योवाबुद्धिदायुक्तसिद्धिदेतिपाठेजीवन्मुक्तरूपसिद्धिदेत्यर्थः॥१२७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परि५

वि३

K K S U LIBRARY RAMTEK 441 106 M 1353 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Acc. No. ~~४३२~~ M1353
Title ! - काशीखण्ड (स्कंद) (स्कंदपुराण)
Subject :- पुराण -
Author :- वेदव्यास -
पत्रे 501 to 750
~~पेज~~ : ।।२६
(501)
K.K.S.U. LIBRARY RAMTEK 441 106 M1353 Dist Nagpur

याव॰

योगश्च ज्ञानं च योगेन वा ज्ञानं तत्प्रददातीति योगज्ञानप्रदा युक्ता संयता जितेंद्रिया इतिं ता पुंश्चल्यां प्रहतं तेजः कोनिवारयितुं क्षमः गङ्गा आत्मारामेश्वरस्ते भग वंतम मोक्षलक्ष्मि ति वचनात् यमाघघ्नी गयायां युक्ता ति यमाघघ्नी गया योगयुक्ता । यं जितं नियं जिता ॥ अघौघा नां पापसमूहानां संचारो यस्या सा यं त्रिता घौघ संचारा यमलोकं निवारयितुं शीलं यस्याः सा यमलोकनिवारिणी यातायातं मरणजन्मनी प्रशमयतीति या तायातप्रशमनी । यातनानां नाममात्रं निकृंततीति यातनानाम कृंतनी ॥ यातनाम कृंतनी तिपाठे यातनानां मूलपापं यातनानां कृंतनाचेति केचित् । यामिनी राहिमाच्छादा ॥ चंद्ररश्मिवन्निर्मलोदका युगधर्मैर्हिंसान्तादिभिर्विवर्जिता युगधर्मविवर्जिता रेवती ग्रहविशेषो बलदेवकांता वा नक्षत्रविशेषो वा तद्रूपा रेवती रमतिर
एतत्वात् रम्या रमणी यारला निर्गता यस्याः सा रत्नगर्भा । समुद्ररूपा वा रमा लक्ष्मीः तद्रूपा नारीति रमली या कामाग ना वा मदनपत्नी रत्यर्थः ॥१३२॥

योगज्ञानप्रदा युक्ता यमाघघ्नी गया योगयुक्ता ॥ यंत्रिताघौघसंचारा यमलोकनिवारिणी ॥१३७॥ यातायातप्रशमनी यातनानाममर्कृंतनी ॥ यामिनी राहिमाच्छोदा युगधर्मविवर्जिता ॥१३९॥ रेवती रतिकृद्रम्या रत्नगर्भा रमा रतिः ॥ रत्नाकरप्रेमपात्रं रसज्ञा रसरूपिणी ॥१४०॥ रत्नप्रासादगर्भा च रमणीयतरंगिणी ॥ रत्नार्चीरुद्ररमणी रागद्वेषविनाशिनी ॥१४१॥ 〈१८〉〈॥२५१॥〉〈१८〉

रत्नाकरप्रेमपात्रं समुद्रस्यस्नेहाश्रयः कांतेत्यर्थः ॥ रसं ब्रह्म रसं ज्ञानातीति रसज्ञा रसो वै स इति श्रुतेः ॥ षड्रसज्ञा ना रसरूपिणी ब्रह्मर सरूपा वा रत्न निर्मिताः देवालयाः गर्भे यस्याः सा रत्नप्रासादगर्भा प्रासादरत्नैर्विचित्रा श्वेतामलिंगगङ्गा अपि गंगा जलं ॥ स्त्रिष्वं तिकल्मिक ल्मष भीतितइ ति स्मृतेः रत्नप्रसादगर्भेति पाठे उत्कटप्रसादगर्भेत्यर्थः ॥५०॥ च ॥ रमणो यास्तरंगा वर्त स्त्र यस्यां सा रमणीयतरंगिणी ॥ रत्नानाम चिंदीप्तिर्यस्याः सा रत्नार्चिः रुद्रं रमयतीति रुद्ररमणी ॥ रागद्वेषावि नाशिनी ॥ रागद्वेषयोर्हंत्री ॥ श्री ॥५१॥ श्रीभवानीशंकराभ्यां नमः ॥ श्रीगणेशाय नमः ॥ श्रीमंगळमूर्तये नमः ॥

Checked 2017

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

502

रत्न४

रम्यनिनयनमनांसि॥ लिरामा॥ रामाऽत्तमस्त्रीस्वरूपा सांबपत्नी कुष्मांडदुहिता वा॥ तथा च स्मरणयुक्ते हरिवंशे सांबाय दीयतां रामा कुष्मांडदुहिता शुभेति रमयंत्यस्यां योगिन इ
ति वा रामा॥ तदुक्तं॥ रमंते योगिनोऽनंते विदानंदे परात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयत इति॥ रम्यं मनोहरं स्वरूपं यस्याः सा रम्यरूपा॥ रोगजीवातुरूपिणी संसा
ररोगग्रस्तानां जीवनौषधरूपिणी॥ रुविकरोति नितिरुविकर्तारो बयती तिरोषि नी॥ ६०॥ रमा लक्ष्मीस्तस्यै हिता रम्या॥ रुविं रातीति रुविरा मनोहरा। वा रोगं संसाररोगमात्रं वा
यस्याः सा रोगहारिणी॥ राजंते हंसाः यस्यां सा राजहंसा॥ रत्नवती अनेकैः संयुक्ता रववती ति पाठे स्मरणाः संगमेन योरवो ध्वनिः स वर्त्तते यस्यां सा रववतीति व्याख्येयं तथा बा
लकांडे॥ लतारसयूरैरम्या सरितसागरंगमा॥ केका मेव वर्त्तते राममनसा निर्मितं सरः। ब्रह्मणा रघुशार्दूल मानसं नाम तेन तत्॥ तस्मात्सुस्राव सरसः सायोध्यामुपगूहयन्
॥ सरः प्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता॥ शब्दोयं विपुलस्तस्या जाह्नवीमपि वर्त्तते॥ वा रिसंघर्षतो रामप्रणाममप्रयतः कुर्विति॥ राजमानो राजमानानां केल्लोलानां राजिर्यस्याः

रमारामा रम्यरूपा रोगजीवातुरूपिणी॥ रुविकरोवनी रम्या रुविरा रोगहारिणी॥ १५४॥ राजहंसा रववती राजत्कल्लोलराजिका॥ श्रीनाम॥
रामणीयकरेखा वेरुजारी रोगशोषिणी॥ राकारं कान्तिकामनी रम्या रौघ्रुरावणी॥ रागिरंजी नशिवा रूपलावण्यशेवधिः॥ १५५॥ लोकप्रस्त्रैलोकवंद्या लोलल्कं४
जल्कल्लोलराजिका॥ राजत्कल्लोलराजिके ति पाठे स एवार्थः॥ १५२॥ रमणीया एव रामणीयकं रेखा जलधाराः सा मुद्रेका वा यस्याः रामणीकरेखा। रामणीयकवेशावेतिकाविसाठ
वेशः शोभा वा रुजां रोगाणां अरीरुजारिः॥ रोगरोषो वर्त्तते यस्याः सा रोगरोषिणी शोषयत्योषिणी लिकृविस्या ऽः रोगरोषिणी वान्यत्र॥ राका पूर्णचंद्रा पौर्णिमासी स्वरूपा वा॥ ७०॥ रं
कारणां दरिद्राणां आर्त्तिपीडां शमयतीति रंकार्त्तिनाशिनी॥ शामनी॥ रम्या रमणीया॥ रम्यामि रणिथः अः विष्णुः आश्रयत्वेन वर्त्तते यस्याः सा इति वा॥ रोलंबानां भ्रमराणा
रावो यस्यां सा रोलंबरावा विणी सृष्टिस्थितिसंहारेच्छारूपो रागो यस्याः अस्तीति रागिणी शोभागमात्रां श्रयावा॥ रंजितमपि च्युलोकानां शिवं कैवल्यं रंजितो नुरंजितो पि शिव ईश्वरो
यया सा रंजितशिवा रूपलावण्ययोः सौंदर्ययोः शेवधिर्निधिर्याश्रयइस्यर्थः॥ लोकप्रस्त्रैलोका नां जननी लोकवंद्या जनैः स्तुत्या वंद्या वा॥ लोललताका कल्लोलानां माला
वर्त्तते यस्याः सा लोलल्कल्लोलमालिनी॥ लीला सृष्टिस्थितिमहारूपा वर्त्तते यस्याः सा लीलावती दिवोसमहिषी वा एकदा वसनप्राप्य दिवोदासस्य भर्तुः॥ राज्ञी लीला
वती नाम शौरी तं विन्यवेदयादिति लैवोक्तेः॥ ८०॥ लोकभर्त्तुं भुवनानामधिष्ठानलोकलोलवनवं डिका जनमात्रेनत्राणा आह्लादयित्री॥ १५५॥ श्रीरामायनमः॥ श्री॥ छ॥

कमलिनी॥ लीलावतीसौभाग्यकौमुदी कनवांकुरैः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

503

लेखं ज्ञा स्वंसवती स्यादयंती ति लेखस्रवं ती तथा अपारमूर्ध्वस्त्रं शास्त्रवतीं वादिनिदेवनदीविभा लस्यलरकस्प लंपरस्य जनस्येव प्रसादो निर्मय प्रतीतिः॥ अङ्गवल्लभा सती पस्ता
नादोयस्यासा लस्माः लंटभी शिशिपाठे लंपटस्त्री भाये भैर्यं यस्या इति व्याख्येयं सर्वनी प्रत्ययः॥ लघु मंथरो वेगो यस्याः सा लघुवेगा॥ लघुत्व रक्ता नी वित्व
हारिणी लास्यं नो नृ संततरंगाएव हस्ता यस्याः सा लास्यत्तरंगहस्ता॥ ललिता मनोहरा ललिताख्या शैस्थदेवी वा॥ लय प्रगाग मपरिणाधा गच्छति लयपक्षगा॥१०॥
लोकबंधुर्लोकमात्रहितैषिणी॥ लोकधात्री जनमात्रस्य पा श्री लोकोत्तरगुणोर्जिता। लोकातिकांतगुणैरुर्जिता लोकत्रयाणां हितं यया सा लोकत्रयहिता॥
लोक्यते आलोक्यते मुमुक्षुभिरिति लोका लोकरूपा वा लक्ष्मी लक्ष्मीस्वरूपा वा लक्षणैः सत्यज्ञानानंतानंदादिभिर्युक्ता तत्स्वरूपा वा तत्स्वज्ञानानंतानंदादिस्वरूप
लक्षणै गंगजन्मादिनरस्थलक्षणैः करुणत्वादिगुणैः स मीवीनैः सामुद्रिकोदिकस्त्री लक्षणैर्वा लक्षिता लक्षणलक्षिता॥१४७॥ लीला भगवत्क्रीडारूपा वा। पञ्चका

लेखस्त्रवंती लस्माभा लघुवेगा लघुत्वहृत्॥ लास्यत्तरंगहस्ता ललिता लयपक्षगा॥१४६॥ लोकबंधुर्लोकधात्री लोकोत्तरगुणो १८
र्जिता॥ लोकत्रयहिता लोका लक्ष्मीर्लक्षणलक्षिता॥१४७॥ लीला लक्षितनिर्वाणा लावण्यामृतवर्षिणी॥ वैश्वानरीवासव ॥२५६॥
ड्या वंध्यात्वपरिहारिणी॥१४८॥ वासुदेवांघ्रिरेणुघ्नी वज्रिवज्रनिवारिणी॥ शुभावती शुभफला शांतिः शंतनुवल्लभा॥१४९॥ १८

जमहिषीरूपा वा। तथा अवासि निर्वृति। लक्षितं दर्शितं निर्वाणं यया सा लक्षितनिर्वाणा लावण्यमेव अमृतं तद्वर्षिणी लावण्यामृतवर्षिणी महालवणस्य लवणं रागविस्य
इदं जलं लावण्यं रत्नादिसंपन्नं। अमृतं केवल्यं तद्वर्षितुं शीलं यस्याः सा तथा वैश्वानरी आग्नेयी शक्तिः स्वाहादाहिकात्मरूपा॥१००॥ गंगानामसहस्रे स्मिन् वि वृतेन वमे
शेति। पदद्वयं पूर्वेण तत्र हि स्वेष्ट्रोमम पूर्वितं॥१॥ वा सुवेड्या इंद्रस्य स्तुत्या वंध्यात्वं परिहर्तुं शीलं यस्याः सा वंध्यात्वपरिहारिणी वासुदेवांघ्रिरेणुं हर्तुं शीलं यस्याः सा
वासुदेवांघ्रिरेणुघ्नी वज्रिणः इंद्रस्य वज्रं कुलिशं निवारयितुं शीलं यस्याः सा वज्रिवज्रनिवारिणी। पवनादिरूपेण शुभानि आसमंतात् हर्तुं तियस्याः सा शुभावती शुभं फलं यस्याः
सा शुभं वा फलं ती ति शुभफला॥ शांतिर्नैष्कर्म्यं तत्स्वरूपा ब्रह्मरूपा शांतिकर्मरूपा वा॥ शांतनोः समुद्रगा स्य वल्लभा सा भार्या शांतनुवल्लभा शंतनुरिति पाठे त्वाद्धाक्षरं तत्र पठि
शुभमत्र मस्या स्तीति स्त्रकिनी। शोभाव शिष्टसंबोधि वयो यस्याः सा शोभावयाः॥१०॥ शीतलं प्रदमृतं जलं तद्वांदुं शीलं यस्याः सा शीतलामृतवाहिनी॥ ॥१४९॥ श्रीराम॥

प:२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

504

शोभावर्तते यस्याः सा शोभावती ॥ शीलं वर्तते यस्याः सा शीलवती ॥ शोषितमशेषं यया सा शोषिता ॥ शेषाः किल्बिषा ॥ शरण्या आश्रयणीया ॥ शिवं कल्याणं मोक्षं ददातीति शिवदा ॥ शिष्टाः सदाचाराः ॥ शिष्टावधि सत्वाश्रया शरजन्मप्रसूः ॥ कार्तिकेयजननी शिवा कल्याणरूपा मोक्षरूपा ईश्वरीरूपा वा ॥ शक्तिर्माया आह्लादिनी वा ॥ शशांकविमला चंद्रवत् आह्लादकारिणी ॥ चंद्रवन्निर्मलेति वा ॥ शमनः स्वसः यमुनायाः संमता अभिमता ॥ शमनेन स्वसा संमता ॥ शमनस्य यतिनाशस्य यतिः आश्रय अनंतकाय इति शमा हितमनुमार्ग प्रायमार्गनिवारिणी ॥ शितिकंठमहाप्रिया ॥ रुद्रस्य अत्यंतवल्लभा ॥ शुचिः पवित्रता शुचिकरी पवित्रकरी ॥ शोणा अवधिः उत्तानज्ञानंतः शक्तिः मंदिरा रेवती विष्णुकघ्नीति पाठे शौककनाशिनीत्यर्थः ॥ शेषशायी पदोद्भवा अनंतशायी चरणोद्भवा शेषशायीचरणौ सन्तौ ॥ १५२ ॥ श्रीनिवासो विष्णुः तद्रूपेण आश्रयत इति श्रीनिवासश्रुतिः श्रद्धा आस्तिक्यबु

शोभावती शीलवती शोषिताशेषकिल्बिषा ॥ शरण्या शिवदा शिष्टा शरजन्मप्रसूः शिवा ॥ शक्तिः शशांकविमला शमनस्वसृसंमता ॥ १५१ ॥ शमा शमनमार्गघ्नी शितिकंठमहाप्रिया ॥ शुचिः शुचिकरी शुघ्नी शेषशायिपदोद्भवा ॥ १५३ ॥ श्रीनिवासश्रुतिः श्रद्धा श्रीमती श्रीः शुभव्रता ॥ शुद्धविद्या शुभावर्ता श्रुतानंदा श्रुतिः स्तुतिः ॥ १५४ ॥ शिवेतरघ्नी शबरी शांबरीरूपधारिणी ॥ श्मशानशोधिनी शांता शश्वच्छतधृतिस्तुता ॥ १५५ ॥

द्धिः तद्रूपा श्रीर्वर्तते यस्याः सा श्रीमती ॥ अयं मे नायोगिन इति श्रीः ब्रह्मविद्या श्रीर्लक्ष्मीरूपा वा शुभानि व्रतानि यस्याः सा शुभव्रता ॥ शुद्धा चासौ विद्या चेति शुद्धविद्या शुभं विद्योतिक्रिमिति शुभम् आवर्तो जन्मसामग्रीयस्या सा शुभावर्ता श्रुतो ज्ञात आनंदो यया सा श्रुतानंदा ॥ श्रुतिर्निवेदैः स्तुतिर्यस्याः सा श्रुतिस्तुतिः ॥ तथा च भागवते ॥ जपयज्ञयज्ञधनानामित्यादि शिवेतरपापं तन्नाशिनी शिवेतरघ्नी ॥ शबरी शबरांगना किरातवेषेण माहेश्वरस्य पत्नीत्वेन ॥ ४० ॥ शांबरो मृगस्तत्स्त्री शांबरी ब्रह्मणः कामिनायाः सरस्वत्याः मृगीरूपत्वेन तस्याः रूपं धर्तुं शीलं यस्याः सा शांबरीरूपधारिणी ॥ श्मशानं शोधयतीति श्मशानशोधिनी यस्यां मृतानां श्मशानसंबंधीबंधोनस्वकीत्यर्थः ॥ श्मशानमहाश्मशानं काशीतच्छोधिनीति वा ॥ तथा च तत्रैवोक्तं ॥ गंगा ततोधिकेति ॥ शांता शांतस्वभावा दशरथात्मजा ॥ ऋष्यशृंगपत्नी तद्रूपा वा ॥ तथा च हरिवंशे ॥ अथ चित्ररथस्यापि पुत्रोऽधिकेति ॥ शांता शांतस्वभावा दशरथात्मजा ॥ शश्वच्छतधृतिस्तुता निरंतरं ब्रह्मणा स्तुतेत्यर्थः ॥ १५५ ॥

३६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८७

एकों

नात्रिंशत्तमः

शालते शोभमतइति शालिनी। शालि धान्याबांतररूपं तेनया शोभसातया आद्या व्याप्ता। शालिशोभाद्या। शिखिवाहनः कार्त्तिकेयस्तद्रूपं गर्भ बिभर्त्तीति शिखिवाहनगर्भभृत्। रासनीयानिस्तुत्यहार्णि चरित्राणि यस्याः सा रासनीयचरित्रा। शासितानि नाशितान्यशेषेण पातकानि यया सा शासिताशेषपातका ॥५०॥ षड्गुणैश्वर्यसंपन्ना। ऐश्वर्यादिगुणषट्कान्विता। षट्गा। निःशङ्कसादि निःश्रुतिश्चतद्रूपिणी। षंढताकावीर्यतातद्वारि सलिलं यस्याः सा षंढताहारिसलिला। स्यायन्नदनदीशाना स्यायन्तं नदनदीनांशातं यस्याः सा तथा। स्यै स्यै शब्दसंघातयोरिति धातुः। सरिद्वरा नदीनां मध्ये श्रेष्ठा सुरसा नागमातृकारूपा। यद्वा रसा। तेनोरसो यस्याः सा शोभनब्रह्मरसरूपे स्पर्धः। शोसनाग्रसा यस्याः सा सुप्रसा सुरदीर्घिका देववापी स्वःसिंधुः स्वर्नदी सर्वदुःखघ्नी तापघ्नी। अमलिनी। सर्वव्याधिम

शानी शालिशोभाद्या शिखिवाहनगर्भभृत्। रासनीयचरित्रा च शासिताशेषपातका ॥१५६॥ षड्गुणैश्वर्यसंपन्ना षडंगश्रुतिरूपिणी। षंढताहारिसलिला स्यायन्नदनदीशता ॥१५७॥ सरिद्वरा च सुरसा सुप्रभा सुरदीर्घिका। स्वःसिंधुः सर्वदुःखघ्नी सर्वव्याधिमहौषधा ॥१५८॥ सेव्या सिद्धिः सती सूक्तिः स्कंदसूश्च सरस्वती। संपत्तरंगिणी स्तुत्या स्थाणुमौलिकृतास्पदा ॥१५९॥ स्थैर्यदा सुभगा सौख्या स्त्रीषु सौभाग्यदायिनी। स्वर्गनिःश्रेणिका सूमा स्वधा स्वाहा सुधाजला ॥१६०॥ समुद्ररूपिणी स्वर्ग्या सर्वपातकवैरिणी ॥१६१॥

हौषधं सर्वरोगाणां निवर्त्तकी ॥१५८॥ सेव्या सेवनीया। सिद्धिः अणिमादिसिद्धिस्वरूपा। सती पतिव्रता। स्वपत्नी दाक्षायणी तिवा। सूक्तिः शोभनोक्तिस्वरूपा पुरुषसूक्तादिरूपा वा। स्कंदसूः कार्त्तिकेयजननी। सरस्वती वाणी तदधिष्ठात्री देवता वा। संपद्रूपास्तरंगा यस्यां सा संपत्तरंगिणी। स्तुत्या स्तुतेर्विषया। स्थाणुमौलिकृतालया रुद्रशिरःकृतावासा। स्थैर्यदा स्वतीरे तत्तत्कर्कस्थितिदा। सुभगा शोभनकांतिमती श्रेयसी तिवा। सौख्या सुखाय हिता। स्त्रीषु सौभाग्यदा तु शीलं यस्याः सा स्त्रीषु सौभाग्यदायिनी। स्वर्गनिःश्रेणिका स्वर्गैकसोपाना। तद्रूपका शीसारे। या हृद्या सर्वजातुनाथा स्वर्गसरणिर्नामि तस्य सूमा इंद्रियाधगोचरा। स्वधा पितृपत्नी मंत्ररूपा वा। समुद्ररूपिणी तिद्वचिसाठः ॥८०॥ स्वर्ग्या स्वर्गाय हिता। सर्वपातक

४ स्वाहा अग्निभार्या। सुधा अमृतं तत्तुल्यं जलं यस्याः सा सुधाजला। समुद्ररूपिणी समुद्रपत्नीत्वात्।

१८
२५१ ॥
१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५०६

स्मृतासती स्मृतानां चाघहारिणी सीता लांगलपद्धतिः गंगा प्रसेदा विस्रोर्म्या यज्ञानकीतिवा संसाराब्धितरंडिका। भवसमुद्रेतरंडिका तरंडकमितिह्यचित् सौ
भाग्यरूपा या सौसुंदरी च सौभाग्येन वासुंदरी॥ सौभाग्यसुंदरी सम्यक् ध्यासंध्या ब्रह्मज्ञानस्वरूपा। सर्वसारसमन्विता। सर्वशक्तिसं
युक्तेत्यर्थः॥ हरप्रिया शिवकांता॥ हृषीकेशी इंद्रियाणां नियंत्री हृषीकेशपत्नी वा॥ ९०॥ हंसस्वरूपा शुद्धस्वरूपा हंसस्वरूपा भारिणीति वा। तस्या हंसस्व
रूपे एतस्सकारौ मगणम तदेति भागवतोक्तेः॥ हिरण्मयी ज्ञानरूपा स्वर्णमयी निवा हताघसंघा क्षपितपापसमूहा। हितकृत् हितेच्छिणी हेलाभ्रं
गाः भावरूपा हर ईश्वर इला भू मिरा श्रयोस्य स्याः सेति वा हेलाघगर्वहृत् हेलया लीलया पापदमनी नाशिनी अघं चगर्वश्च अघगर्वौ लीलया
यातौ हरतीति वा क्षेमदा कल्याणरूपा कल्याणदा। क्षालिताघौघा नाशितपापसंचया क्षुद्रविद्राविणी दुष्टानां विघातिनी क्षमा पृथ्वीरूपा सहनासहनस्व
भावा॥१००॥ गंगानामसहस्रेऽस्मिन् विद्वते दशमे शते॥ यदद्दृष्टमभूत्तत्र तद्विरेखेरो समर्पितं॥१॥ अध्यायपठितं सदिति शेषं गावाडव ब्राह्मणा तत्वज्ञ इत्यर्थः॥

स्मृताघहारिणी सीता संसाराब्धितरंडिका॥ सौभाग्यसुंदरी संध्या सर्वसारसमन्विता॥ हरप्रिया हृषीकेशी हंसरूपा हिरण्मयी॥१६२॥
हृताघसंघा हितकृत् हेला भूरघगर्वहृत्॥१६३॥ क्षेमदा क्षालिताघौघा क्षुद्रविद्राविणी क्षमा॥ इति नामसहस्रं हि गंगायाः कलशोद्भव॥
२३ कीर्त्तिपिलानेः सम्यग्गंगास्नानफलं लभेत्॥१६५॥ सर्वपापप्रशमनं सर्वविघ्नविनाशनं॥ सर्वस्तोत्रजपाच्छ्रेष्ठं सर्वपावन
पावनं॥१६६॥ श्रद्धयाभीष्टफलदं चतुर्वर्गसमृद्धिकृत्॥ सकृज्जपादवाप्नोति ह्येकक्रतुफलं लभेत्॥१६७॥ सर्वतीर्थेषु यः स्नातः स
र्वयज्ञेषु दीक्षितः॥ तस्य यत्फलमुद्दिष्टं त्रिकालपठनाच्च तत्॥१६८॥ सर्वव्रतेषु यत्पुण्यं सम्यक्चीर्णेषु वाडव॥ तत्फलं समवाप्नोति
त्रिसंध्यं नियतः पठन्॥१६९॥ स्नानकाले पठेद्यस्तु यत्र कुत्र जलाशये॥ तत्र संनिहिता नूनं गंगा त्रिपथगा मुने॥१७०॥ श्रेयोर्थी
लभते श्रेयो धनार्थी लभते धनं॥ कामी कामानवाप्नोति मोक्षार्थी मोक्षमाप्नुयात्॥१७१॥ वर्षं त्रिकालपठनाच्छ्रद्धया शुचिमानसः॥
ऋतुकालाभिगमनात् पुत्रः पुत्रवान् भवेत्॥१७२॥ नाकालमरणं तस्य नाग्निचोरादिसाध्वसं॥ नाम्नां सहस्रं गंगाया यो जपे
च्छ्रद्धया मुने॥१७३॥ गंगानामसहस्रं तु जप्त्वा ग्रामांतरं व्रजन्॥ कार्यसिद्धिमवाप्नोति निर्विघ्नो गेहमाविशेत्॥१७४॥ तिथिवारर्क्ष

योगानां न दोषः प्रभवेत्तदा॥ यदा जप्त्वा व्रजेदेतत् स्तोत्रं ग्रामांतरं नरः॥१७५॥ ६२॥ सब्रालरुःकेन स्यादिति श्रुतेः॥१७५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

508

उपपातकैर्गोवधादिभिः इत्यादिबहुवचनांताः राश्चाण्डालसंसर्गचक्रभवंतीति न्यायात्॥ बहुवचनेन जातिभ्रंशकरं संकरीकरणापात्रीकरण
मलिनीकरणानि गृह्यंते। तानि च मनुनोक्तानि। ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः। महांति पातकान्याहुः संसर्गश्चापि तैः
सह॥ गोवधोऽयाज्यसंयाज्यं पारदार्यात्मविक्रयो॥ गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च। परिवित्तितानुजेन परिवे
चौ४ दनमेवं। तयोर्दानं च कन्यायास्तयोरेव च याजनं। कन्याया दूषणं चैव वार्धुषिलं व्रतच्युतिः॥ तडागारामदाराणामपत्यस्य च विक्रयः॥

आयुरारोग्यजननं सर्वोपद्रवनाशनं॥ सर्वसिद्धिकरं पुंसां गंगानामसहस्रकं॥१७६॥ जन्मांतरसहस्रेषु यत्पापं सम्यगर्जितं॥
गंगानामसहस्रस्य जपनात्तत्क्षयं व्रजेत्॥१७७॥ ब्रह्मघ्नो मद्यपः स्वर्णस्तेयी च गुरुतल्पगः॥ तत्संयोगी भ्रूणहंता मातृहा
२६०॥ पितृहा मुने॥१७८॥ विश्वासघाती गरदः कृतघ्नो मित्रघातकः॥ अग्निदो गोवधकरो गुरुद्रव्यापहारकः॥१७९॥ महापातक २६
युक्तोपि संयुक्तोप्युपपातकैः॥ मुच्यते श्रद्धया जप्त्वा गंगानामसहस्रकं॥१८०॥ आर्तिर्न्नं तानि मनोपि आधिव्याधिपरिक्षुतः॥
मुच्यते सर्वदुःखेभ्यः स्तवस्यास्यानुकीर्त्तनात्॥१८१॥ संवत्सरेण युक्तात्मा पठन्भक्तिपरायणः॥ अभीप्सितां लभेत्सिद्धिं स
र्वपापैः प्रमुच्यते॥१८२॥ संशयाविष्टचित्तस्य धर्मविद्वेषिणोपि च॥ दांभिकस्यापि हिंस्रस्य चेतो धर्मपरं भवेत्॥१८३॥ वर्णाश्र
मपथीनः कामक्रोधविवर्जितः॥ यत्फलं लभते ज्ञानी तदाप्नोत्यस्य कीर्त्तनात्॥१८४॥ गायत्र्ययुतजाप्येन यत्फलं सम
मुपार्जितं॥ सकृत्पठनतः सम्यक् तदशेषमवाप्नुयात्॥१८५॥ गां दत्वा वेदविदुषे यत्फलं लभते कृती॥ तत्पुण्यं सम्यगाख्या
तं [illegible] स्तवराजसकृज्जपात्॥१८६॥ गुरुशुश्रूषणं कुर्वन्यावज्जीवं नरोत्तमः॥ यत्पुण्यमर्ज्जयेत्तद्भाक् वर्षं त्रिषवणं पठन्॥१८७॥

सर्वाकरेष्वधीकारो महायंत्रप्रवर्त्तनं॥ हिंसौषधीनां स्त्र्याजीवोभिचारो मूलकर्म च॥ इंधनार्थमशुष्काणां द्रुमाणामवपातनं॥ आत्मार्थं च क्रियारंभो निंदितान्नादनं तथा॥ अनाहिताग्नि
तास्तेयमृणानामपक्रिया॥ धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणं॥ स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकं॥ ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः॥ जैह्म्यं पुंसि च मै
थुन्यं जातिभ्रंशकरं स्मृतं॥ खराश्वोष्ट्रमृगेभाणामजाविकवधस्तथा॥ संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च॥ निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं॥ अपात्रीकरणं ज्ञेयमसत्यस्य च भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

508

देवपारायणात्॥ उपप्यासपर्यवं सप्तगुणाः शारवायाः पाठाद्यत्र जगति सहचरास्तथा तन्निकटे कृतवासे सर्पः॥ स्वैरं स्वछंदनेनाभ्रंतं करणेपूर्वकं गंगातीरे कृतवासेनेत्यर्थः॥ प्रजपमानोष्ठितो इदं सहस्रनामयोजपेन भवति तस्यापि रूपाणिदं स्तोत्रं त्वपिको स्कंदपि त्यर्थः॥ सि

७२ देवपारायणात्पुण्यं यत्र परिपचते॥ तदभ्यासेन लभ्यते त्रिसंध्यं परिकीर्तनात्॥१८८॥ गंगायास्तवराजस्य प्रसहं परिशीलनात्॥ शिवभक्तिमवाप्नोति विष्णुभक्तोथवा भवेत्॥१८९॥ यः कीर्तयेदनुदिनं गंगानामसहस्रकं॥ तत्समीपे सहचरी गंगादेवी सदा भवेत्॥१९०॥ सर्वत्र पूज्यो भवति सर्वत्र विजयी भवेत्॥ सर्वत्र सुखमाप्नोति जाह्नवीस्तोत्रपाठतः॥१९१॥ सदाचारी स विज्ञेयः स शुचिस्तु सदैव हि॥ कृतसर्वसुरार्चः स कीर्तयेद्यस्त्विमां स्तुतिं॥१९२॥ तस्मिंस्तृप्ते भवेत्तृप्ता जाह्नवी नात्र संशयः॥ तस्मात्सर्वप्रयत्नेन गंगाभक्तं समर्चयेत्॥१९३॥ स्तवराजमिमं गांगं शृणुयाद्यश्च वै पठेत्॥ श्रावयेदथ तद्भक्तान् दंभलोभविवर्जितान्॥१९४॥ मुच्यते त्रिविधैः पापैर्मनोवाक्कायसंभवैः॥ क्षणान्निष्पापतामेति पितॄणां च प्रियो भवेत्॥१९५॥ सर्वदेवप्रियश्चापि सर्वर्षिगणसंमतः॥ अंते विमानमारुह्य दिव्यस्त्रीशतसंवृतः॥१९६॥ दिव्याभरणसंपन्नो दिव्यभोगसमन्वितः॥ नंदने विहरेत्स्वैरं देववत्स प्रमोदते॥१९७॥ भुज्यमानेषु विप्रेषु श्राद्धकाले विशेषतः॥ जपन्निदं महास्तोत्रं पितॄणां तृप्तिकारकं॥१९८॥ यावंति त्र सिक्थानि यावंतोंबुकणाः स्थिताः॥ तावंत्येव हि वर्षाणि मोदंते स्वःपितामहाः॥१९९॥ यथा प्रीणंति पितरो गंगायां पिंडदानतः॥ तथैव तृप्नुयुः श्राद्धे स्तवस्यास्यानुसंश्रवात्॥२००॥ एतत्स्तोत्रं गृहे यस्य लिखितं परिपूज्यते॥ तत्र पापभयं नास्ति शुचि तद्भवनं सदा॥२०१॥ अगस्ते किं बहूक्तेन शृणु मे निश्चितं वचः॥ संशयो नात्र कर्तव्यः संदेहे घोरफलं महि॥२०२॥ यावंति मर्त्ये स्तोत्राणि मंत्रजालान्यनेकशः॥ तावंति स्तवराजस्य गांगेयस्य समानि न॥२०३॥ यावज्जन्म जपेद्यस्तु नाम्नामेतत्सहस्रकं॥ स कीकटेष्वपि तथा न पुनर्गर्भमाविशेत्॥२०४॥ नित्यं नियममानेन तत्तो जपेत्स्तोत्रमुत्तमं॥ अन्यत्रापि विपन्नः स गंगातीरे मृतो भवेत्॥२०५॥ एतत्स्तोत्रवरं रम्यं पुरा प्रोक्तं पिनाकिना॥ विष्णवे निजभक्ताय मुक्तिबीजाक्षरास्पदं॥ गंगास्नानप्रतिनिधिः स्तोत्रमेतन्मयेरितं॥ सिस्नासुर्जाह्नवीं तस्मादेतत्स्तोत्रं जपेत्सुधीः॥२०६॥

बा

क्षयानि अन्नलेशाः कणा इति यावत्॥ कीकटेषु गयापादरहितेषु मुक्तिर्नास्तीति प्रसिद्धेषु। मुक्तेः कैवल्यस्य बीजभूतानि अक्षराणि तेषामास्पदमाश्रयः॥ मोक्षकारणभूतब्रह्मविद्यास्पदं वा मुक्तिबीजस्य तदक्षरस्य ब्रह्मणास्पदं चेति वा॥२०६॥ ॥छ॥ ॥ ॥ ॥ ॥ ॥

सप्तसप्तत्युत्तरशततमो ... ॥१८९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

509

घि:१ श्री२

यः कुर्यात् कात्यायनमस्कारं दिने दिने॥ अरुणाय सरूर्याय तस्य दुःखं क्षयकृतः॥२५॥ आत रुदि समाहात्म्यं यः श्रोष्यति नरो णा
नमः॥ न तस्य दुष्कृतं किंचित् क्वाऽपि भविष्यति कदाचन॥२६॥ स्कंद उवाच॥ ॥इदं दादित्यस्य माहात्म्यं एतत्कथयाम्यहं॥ यस्य श्रव
णमात्रेण नरो नोदुष्कृतं भजेत्॥२७॥ पुरा त्रेदद्रहारीतो वाराणस्यां महातपाः॥ महातपः समुद्यं स्वसमाराधितवान्रविं॥२८॥
मूर्तिं संस्थाप्य शुभकां भास्वतः शुभलक्षणं॥ दक्षिणे न विशालाक्ष्याद दलिसमन्वितः॥२९॥ तुष्टः स्वसमं वरप्रा
दात् ब्रह्मणोत्तरदतं पस्विने॥ अव्यविल्क्ष्ययाचस्वकस्मोदेयाव रोमया॥३०॥ ५१॥ ५२॥ ५३॥ ५४॥ ५५॥ ५६॥

त्यर्थः॥२०॥ अरुणाय सरूर्याय सरूर्यसहिताय अरुणोदयसूर्यायेति क्वचित्पाठः॥५१॥ इदुर्ध्वास्यौ नाम्नाणोत्रतो वाहरितस्रहद
हारितः भास्वतः [illegible] यस्य दक्षिणेन विशालाक्ष्याः दक्षिणेइत्यर्थः वृध्वः सूर्यः घुमणेः सूर्यात्॥३०॥ ५१॥ ५२॥ ५३॥ ५४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

720

॥२॥

घुमरोः स्तूयेत युवत्यं तारुण्यं वसु धनं निर्वाणो मोक्षः ॥ ऋते विना ॥ जरया आतुर इंद्रियग्रामो यस्य तस्मिन्नजरातुरेंद्रियग्रामानिति कश्चित ॥ स्वात्मसा
त्स्वात्मसात् स्वाधीनं इत्यर्थः धियं ज्ञानं ॥७॥ उपाविशत् उपसमीपे विविक्ते ॥ किमर्थमाविशदित्युक्ते ॥ इत्याकांक्षायामाह ॥८॥ निःशब्द इति ॥ स्वस्थो

सोपि प्रसन्नो घुमरोर हृष्टीत वरं मुनिः ॥ यदि प्रसन्नो भगवान् युवत्वं देहि मे पुनः ॥३१॥ तपःकरणसामर्थ्यं स्थविरस्य न मे यतः ॥ पुन
स्तारुण्यमासाद्याहं चरिष्याम्युत्तमं तपः ॥३२॥ तप एव परो धर्मस्तप एव परं वसु ॥ तप एव परः कामो निर्वाणं तत्परं विहि ॥३३॥ ऋतेन
तपसः कोपि लभ्या ऐश्वर्यसंपदः ॥ पदं ध्रुवादिभिः प्राप्तं केवलं तपसो बलात ॥३४॥ ततस्तपश्चरिष्यामि लोकद्वयमहत्वदं ॥ आप्य
त्वद्वरदानेन यौवनं सर्वसंमतं ॥३५॥ धिग्जरां प्राणिनामत्र यया सर्वो विरज्यन्ति ॥ जरातुरेंद्रियग्रामे स्त्रियोपि न य[illegible]ः स्वसा
ता ॥३६॥ वरं मरणमेवास्तु मा जरा त्वतिशोच्यहा हंत ॥ ध्रुवं दुःखं च मरणं जरादुःखं क्षणे क्षणे ॥३७॥ काङ्क्षंति दीर्घतपसा श्रिरमासु
न्तिद्रियाः ॥ धनं दानाय [illegible] पकुल त्रमुक्तये धिया ॥३८॥ हृद्धस्य वार्द्धके बंधुस्तद्धस्त एवादपहत्सर्वे ॥ ददौ च कारुताहेतुं ता
रुण्यं पुण्यसाधनं ॥३९॥ एवं स हृद्धहरीतो वाराणस्यां महामुनिः ॥ स प्राप्य यौवनं [illegible] पडंगं चचार ह ॥४०॥ हृद्धेनाराधिता
यस्माज्जरीते न तपस्विना ॥ आदित्यो वार्द्धकहरो हृद्धादित्यः स्ततः स्मृतः ॥४१॥ हृद्धादित्यं समाराध्य वाराणस्यां स्याद्घटोद्भव ॥ ॥ ज
राज्ञानीति शोभाघ्नं व हवः सिद्धिमाततान ॥४२॥ हृद्धादित्यसमाराध्य वाराणस्यां रवौ नरः ॥ लभेदभीप्सितां सिद्धिं न घूर्णिद मतिल
मेता ॥४३॥ स्कंद उवाच ॥ ॥ अतः परं प्रवक्ष्यामि केशवादित्यमुत्तमं ॥ यथातुर्ये शाव प्राप्य सविताज्ञानमाहवान् ॥४४॥ व्योम्नि सं
चरमाणेन संप्राप्य नादिकेशवः ॥ एकदा दी भावेन भावयल्लिंगमैश्वरम् ॥४५॥ कौतुकाद्द्वकुर्त्री मर्त्ये हरे रविरूपा ॥ भगवान् ॥ निः
शब्दो निश्चलः स्वस्थानुरूपश्वर्यसमन्वितः ॥४६॥ प्रतीक्ष्यमाणोवसरं किंचित्रेषमनाहभिः ॥ हरिर्विसर्जिता चैनं प्रणनाम हतांज
लिः ॥४७॥ स्वागतेति ततो हरिः प्राह बहुमानपुरःसरं ॥ स्वाक्ष्यासीनो आसयामास सम्पास्वतं नतकं चरं ॥४८॥ अथावसरमालोक्य लोकगु
रुरधोक्षजं ॥ नत्वा विज्ञापयामास सहस्रांशुः सुरारिहा ॥४९॥ रविरुवाच ॥ ॥ अंतरात्मासि जगतां विश्वंभर जगत्पते ॥ तवापि
पूज्यः कोस्ति जगत्स्वयोत्र माधव ॥५०॥ त्वत्तश्चाविर्भवदेतत्त्वय्येव सर्वं प्रलीयते ॥ वमनपातास्वस्य नगातो गिता गिमे ॥५१॥ इत्याश्च
र्ये समालोक्य प्राग्रास्यत्र तवांतिकं ॥ किमिदं पृच्छ्यते नाथ भवता भवतापहृत् ॥५२॥ इति श्रुत्वा हृष्टो वैरी सहस्रांशुरुदीरितं ॥ उच्चैरारात्सप्ताश्वं वीरयन्करसंहोपा ॥५३॥

निरुद्धिनः अवसरमवकाशं ॥ स्वाक्ष्यासि समीपे ॥ आसयामास उपवेशयामास ॥ भवतापहृत् संसारदुःखनाशकः ॥ क्रूरसंज्ञायाहस्तश्चवृनेन उच्चैर्यथास्यात्तथा सप्ताश्वं

॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७४

गणेशायनमः

प्रसन्न स्तदा पाधितवान्सर्वाभ्यल्ल्ष्यंतिश्रा कांक्षति किं तदाह भौमइतिमंगलवासरेजरण्यां भरणीनक्षत्रयुक्तायां चतुर्दश्यां भरण्यां स्ततापांशीतव्यधिकरणे

त्वानैर्विज्ञापयांचक्रेएकचक्ररथंरविं॥जगच्चक्षुरमेयात्मन्महाभ्यांतेविध्नननः॥९९॥यदिप्रसन्नोभगवन्यदिदेयोवरोमम॥
तदात्वं द्वीके निष्ठायेकुष्ठमास्त तदन्वये॥९६॥अन्येपिरोगामासंतुमास्तु तेषांविशुद्ध॥मास्तु कश्चनसंतापस्तद्रूपानां सहस्र॥
गो॥९७॥श्रीसूर्यउवाच॥ ॥तथास्तिति महाप्राज्ञ एवमन्यवरमुत्तमम्॥स्वयेवं प्राजे तामसिरिवेका स्यांमहामते॥९८॥ अस्या॥
सान्निध्यमत्राहं नेसक्ष्माभिकदत्तेन॥प्रथितातवा नाम्नाच प्रतिमेषा भविष्यति॥९९॥विमल्लादिसहस्रास्त्व्याभकानोवरस्
सदा॥सर्वव्याधिविनिहंत्रीचसर्वपापक्षयंकरी॥१००॥इतिदत्वावरान्स्तूयस्तत्रैवांतरधीयत॥विमलोनिर्मलतनुः सोपिस्वभवनं
ययौ॥१०८॥इत्थंसाविमलादित्यो वाराणस्यांशुभप्रदः॥तस्यदर्शनमात्रेणकुष्ठरोगप्रशाम्यति॥१०९॥पश्चैतांविमलादित्यक
थांवैश्रण्युयान्नरः॥प्राप्नोतिविमलांबुद्धिंसज्यतेचमनोमलैः॥१००॥स्कंदउवाच॥ ॥गंगादित्योस्तित्रान्योविश्वेशाद्दक्षिणेन
वै॥तस्यदर्शनमात्रेणनरःशुद्धिमियादिह॥१०१॥यदागंगासमायाताभगीरथपुरस्कृता॥तदागंगापरिणेतुरविस्तत्रैवसंस्थि
तः॥१०२॥अद्यापिप्रहर्निशंगंगासंमुखीकृतभास्करः॥परिष्टौतिप्रसन्नात्मागंगांभक्तवरप्रदः॥१०३॥गंगादित्यंसमाराध्यवाराणस्यां
नरोत्तमः॥नजातुदुर्गतिंचाप्तिलभतेनचरोगभाक्॥१०४॥स्कंदउवाच॥ ॥अन्यच्च एणुमहाभागयमादित्यस्तुतंभवे॥पश्चात्तो
पनरोजातुयमलोकंनपश्यति॥१०५॥यमेशात्पश्चिमेभागेवीरेशात्पूर्वतोमुने॥यमादित्यंनरोदृष्ट्वायमलोकंनपश्यति॥१०६॥
यमतीर्थेनरःस्नात्वाभ्यर्च्यतायाभौमवासरे॥यमेश्वरंविलोक्याशुसर्वैःपापैःप्रमुच्यते॥१०७॥यमतीर्थेयमःपूर्वंतप्त्वासुनिष्कले
तप॥यमेशंचयमादित्यंप्रस्थाप्येदृष्ट्वाहंकृतोसिद्धिद॥१०८॥यमेनस्थापितोयस्मादादित्यस्तेनकुम्भज॥ततस्तूयमादित्योयमोहरति
पातनां॥१०९॥यमेशंचयमादित्यंयमेनस्त्रीपितनमम्॥यमतीर्थेकृतस्नानोयमलोकंनपश्यति॥११०॥यमतीर्थेचतुर्दश्यां
वासरभौमकार्यंयमतीर्थेस्नात्वातानोअस्माकंविमुक्तयेयः कश्चिदपिसनतंतर्पणमपिपिंडंकुर्यात्ताकरिष्यतीत्यग्रिमेणान्वयः नतुतर्पणमात्रेणक
थंनरकान्मुक्तिःस्यात्तत्राह॥यदियोगोयमुक्तोमे॥इत्याद्इतिनिश्चयोयोगस्त्वयाणोमेलने॥११२॥ ॥

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७२२

५१ म

॥ ४ ॥

इति श्रीरामानंद... विरचितायां काशीखंडटीकायां एकपंचाशत्तमोऽध्यायः ॥५१॥ ॥छ॥ ॥ द्विपंचाशत्तमे तं विचोर्मिंद्र गोत्रतः ॥ काश्यां
दशाश्वमेधस्य महात्म्यं चोपवर्ण्यते ॥१॥ तिग्मांशुः तीक्ष्णगावो रश्मयो यस्य सः तिग्मगुः ॥३॥ योगिन्यस्तिग्मगुश्चानंदवदनेन प्राप्यका
शीदृष्टां तां निवेदयितुं नायांति एतन्न चित्रं इत्याह किमत्रेति ॥छ॥ आपराब्दार्धं विचएरपवौ क्रमेव स्फुटयति अथा क्षेपामिति अथा

काश्यां कश्यप्रभुमे तीर्थे कृत्वा स्नानं महाकृतिः ॥ आपकथ तर्पणं कुर्यात्सतिलं वाथ मुक्तये ॥११॥ किं गयागमनेनुसांकिं
श्राद्धे र्भर्गीरिदक्षिणे ॥ यदि काश्यां प्रमेतीर्थे योगस्मिन्नर्भामो प्रते ॥१२॥ श्राद्धं कृत्वामे प तीर्थे ... आपस्ताम मेघरं ॥
यसादिसनमस्क्तसपितृणामनन्तम् ॥१५॥ स्कंद उवाच ॥ ॥ इति तेदृ दशाद्विसाकेधिताः पापनाशकाः ॥
॥ एतत्संभवं सम्मा कर्पनरो न निरयी मनेत् ॥१६॥ अन्येपि संति घट जोरावपका घ्नने केशगाः ॥ काश्यां संस्थापि
ताः सर्वयिगुह्य... दिव्यः कृव ॥१७॥ स्नात्वाध्यायानिमान्नुपयान् दशाश्वमेधस्य चकान् ॥ अकिंचे लापिपो
मर्त्यो दुर्गतिं याति न कोचित् ॥१८॥ ॥ इति श्रीस्कंदपुराणे काशीखंडे अरुणा... यमादसव
...नाम एकपंचाशत्तमोऽध्यायः ॥५१॥ ॥ स्कंद उवाच ॥ ॥ गभस्तिमालिनिगते काश्यां त्रैलोक्यमहिने ॥
पुनश्चिंतामनापाद्वैमंद रस्थो मुने हरः ॥१॥ नाप्राप्यापतितप्रायो नाप्याप्यापाति तिग्मगुः ॥ प्रवृत्तिरपि
मे काश्यां क्षित्र मम सूनं दुर्लभा ॥२॥ किमत्र चित्रं य काशी सदीपम प्रमान स ॥ निर्मूलं चैव चलपति गपाना वेतहि
रैस्तु रे ॥३॥ अद्यापि ... का मांत्र गडजो ... रंद्दशो ॥ अहो काश्यपरि... पारव्यो ... परैर्नु पाहरो ॥ ... काशी
मवेशमन्वेष्टुं के नाम हि प्रपाम तः ॥ श्रोतुं कैए वानि पुणो पनःस चतुराननः ॥५॥ इत्यो ... पचि नाना रंद्यमानपुरःसरं ॥

क्षिपंदगधानान स्म त्रि... ज्ञलगज्जिलरं जिजगज्जय शीर्षे ... हरानेत्रेण काश्यपशिलापा रव्यः का म इति शापः दुनुपा तरां ॥ आत शापे न तापयति इह
नैनराम ति कश्चित्काशी ति काश्यपावृत्तीत... ज्ञेयपेक्षुके जनेवा इति चितवे प्राप्ति... यादस्थापयामि अथ वाणि... ये क... लाण मेवम ...
मिति तत्र हेतुमति ज्ञातुमति ज्ञातुं काशीप्रवृ... त्ति मैत्संनुपपद्यते ॥ ... एवक्ष्यद ॥ यतः स चतुराननइति ॥छ॥ तत्र द्वास्थ इत्यपीनिश्येति वा पाठः ॥ ६ ॥

॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

723

हेतु३ जरा२

श्री महादेवइति। महत्वं त्रिविधपरिच्छेदशून्यत्वं सर्वेषां ब्रह्मादीनां करणानामपि कारणं सर्वकारणकारणं सर्वेषां सर्वकारणमिति कवित्साठः विजिग्ये जितवान्॥ जिग्ये येनिकश्चित॥ त्रिजग श्री
दिति। त्रिजगज्जयशीलस्य हेतोः कारणस्य त्र्यक्षस्याराधनं परंपरमधुक्तयार्थसाधनमित्यर्थः अतः सारस्य विश्वेश्वरस्य स्मरस्येति कवित्साठः॥ स वित्यः स्मरविद्विषः कामशत्रोः को नाराधयति आ
राधनं नकरोति अपितु सर्व एव करोतीत्यर्थः कर्मणिवा षष्ठ्येहेतुरिति प्रथमांतपाठे त्रिजगज्जयिनोमम अन्यथा यस्य कस्य त्रैलोक्यस्य श्रेष्ठमाराधनमेव जयहेतुरित्यर्थः तथा नवस्यति त्रिलोक्येश्वर्यसंपत्ति

श्री विष्णुरुवाच॥ देवदेवो महादेवो नीलकंठ उमापतिः एकरात्र वहिद्रुम्भो त्र सर्वकारणकारणं॥५४॥ अत्र त्रिलोकनाद्न्यं समर्थयनियोऽप्यधिः॥ स लोकनोऽपि विजेयो लो
कनाम्ना॥ त्रिवर्जितः॥५५॥ एको मृत्युंजयः शून्या ज्योजन्म मृत्युहर॥ मृत्युंजयं किल्याप्य तस्मैव तो मृत्युंजयो भवत्॥५६॥ कालकालं समाराध्य भृंगी कालं
जिगायवै॥ श्वेतादिमपि तस्याजमृत्युर्मृत्युंजयावकं॥५७॥ विजिग्ये त्रिपुरं यस्क हेलये केवमोक्षणात्॥ न समभ्यर्चन्तशंको न पुज्य नमो भवेत्॥५८॥ त्रि
जगज्जयिनो हेतोस्त्र्यक्षस्याराधनं परं॥ को नाराधयतिब्रह्मसारस्य स्मरविद्विषः॥५९॥ यस्माच्छिपक्ष्मसंकोचात् जगत्संकोचमेत्यदः॥ विकस्वरं विकासाय
कस्य तुज्यतमो नसः॥६०॥ शंभोर्लिंगं समभ्यर्च्य वैकुण्ठपार्थवत्तु ये॥ ब्रह्मत्व त्र्यम्बुमान्नस्यैनात्त्र कार्यविवारण॥६१॥ समर्च्य शांभवलिंगं अपिजन्मशतानि
तं॥ पापत्रुजङ्गहात्यवत्पुमान त्रक्षणाद्भुवं॥६२॥ किंकिं न संभवेदत्र शिवालिंगसमर्चनात्॥ पुत्रः कलत्रं क्षेत्राणि स्वर्गमोक्षावसंशयं॥६३॥ त्रैलोक्ये स्वर्यसंपु
त्रि मीयापापाना सहस्रगो॥ शिवलिंगार्चनादेकात्सव्यसत्यपुनः पुनः॥६४॥ न यमे वपरो योगच्छिदमेकपरं तपः॥ इदमेव परं ज्ञानं स्थाणुलिंगयदर्चनं॥६५॥ ये लि — ने.८
ग.८ गंसमभ्यर्च्य त्रह्मजितपावतीपते॥ कुतो दुःखभयं तेषां संसारे दुःखसारी॥६६॥ सर्वं परित्यज्य र वे ये लिंगं शरणं गताः॥ न तं पापानि बाधंते महात्यपि दिवाकर॥६७॥
लिंगार्चने फलं हेतुस्त्रिषामेवा त्रभास्कर॥ एषां तु नाम विष्टोदावि कीर्तिं महेश्वरः॥६८॥ तं लिंगाराधनात्सुलभ्य त्रिषु लोकेषु वापरं॥ सर्वेनोर्म्यभिषेकः स्याल्लिंग
स्नानां तु सेवनात्॥६९॥ तस्माल्लिंगत्वमभ्यर्च्य सुमर्चयमहेशतः॥ संज्ञा प्रभु परमां लक्ष्मी महानेजो विरञ्चिराणि॥७०॥ इति श्रुत्वा हरेर्वाक्यं दनरक्ष सहस्रगुः॥
विधाय स्फाटिकं लिंगं मुनेर्यापि समर्चयत्॥ गुरुत्वेन तदा कल्प विवस्वानादिकेशवं॥ तत्रोपतिष्ठ तेयाप उत्तरेणादिकेशवात्॥७२॥ अतः स केशवादि
त्यः काश्यपाप्सलं स मोनुद॥ समर्चितः सदादेयान्मने सोवांछितफलं॥७३॥ केशवादित्यमाराध्य वाराणस्यां नरोत्तमः॥ परमं ज्ञानमाप्नोति येन निर्वाणमाप्नुवेत्॥७४॥

श्री र्मया प्राप्ता सहस्रगो॥ शिवलिंगार्चनादेकादिति॥५९॥ शेषं पूर्ववत् एकान्तमुख्यात्केवलात्॥ वामहेश्वरस्य उत्तरेण उत्तरस्यां पादोदके॥ गंगावरणयोः संभेदे॥७४॥ श्रीराम॥ श्री

र्य=

॥ नपाकोटरश्रितोद्गीतानगोरकेदिः॥

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रथसप्तम्यीअवठासप्तम्यां॥ तत्रस्नानस्यपूर्वांगमंत्रत्रयमाह॥ यद्यदित्यादिसप्तसुजन्मसुसप्तजन्मकृतंजन्मारभ्ययत्पापंकृतमित्यर्थः॥ माकरीमकरसंबंधिनीमाघीत्यर्थः॥ मनोवाक्कायजादिनिपापानियद्यज्जन्म

३॥

विलोक्यकेशवादित्यं मुच्यते जन्मपातकैः॥७५॥ अगस्त्येरथसप्तम्यां रविवारोयदाप्यते॥ तदापादोदकेतीर्थेआदिकेशवसन्निधौ॥७६॥ स्नात्वोषसि
नरोमौनकेशवादित्यपूजनात्॥ सप्तजन्मार्जितात्पापान्मुक्तोभवतितत्क्षणात्॥७७॥ यद्यज्जन्मकृतंपापंमयासप्तसुजन्मसु॥ तन्मेरोगंच
शोकंचमाकरीहंतुसप्तमी॥७८॥ एतज्जन्मकृतंपापंयच्चजन्मांतरार्जितं॥ मनोवाक्कायजंयच्चज्ञाताज्ञातेचयेपुनः॥७९॥ इतिसप्तविधंपापंस्नाना
न्मेसप्तसप्तिके॥ सर्वव्याधिसमायुक्तंहरमाकरिसप्तमी॥८०॥ एतन्मंत्रत्रयंजप्त्वास्नात्वापादोदकेनरः॥ केशवादित्यमालोक्यक्षणान्निःकलु
षोभवेत्॥८१॥ केशवादित्यमाहात्म्यमेवंनृत्यद्वासमन्वितः॥ नरोनलिप्यतेपापैःशिवभक्तिंचविंदति॥८२॥ स्कंद उवाच॥ अतःपरंस्क
णुमुनेविमलादित्यमुत्तमं॥ हरिकेशवनेरम्ये वाराणस्यांव्यवस्थितः॥८३॥ उदग्देशोभवत्स्वर्वविमलोनामवाडजः॥ सप्राकृतनत्रकर्मयोगा
तविमलेपथ्यपिस्थितः॥८४॥ कुष्ठरोगमवाप्योवैस्यस्त्रकादारानुग्रहंवसु॥ वाराणसीसमासाद्यब्रह्ममाराधयत्सुधीः॥८५॥ करवीरैःपापि
स्त्रगंधकैःकिंशुकैःसुमैः॥ रक्तोत्पलैररणकेश्वसमानर्चभास्करं॥८६॥ विविन्नरवनैर्माल्यैःपाटलाचंपकोद्भवैः॥ कुंकुमागरुकर्पूरकस्तू
रीरोरागचंदनैः॥८७॥ देवमाहनुधूपैश्चवकामोदनंतांबरैः॥ कर्पूरवर्तिदीपैश्चनैवेद्यैर्घृतपायसैः॥८८॥ अर्घदानैश्चविविधैवतमोरैःस्तोत्रजपै
रपि॥ एवंसमाधयतस्तस्यप्रीतोवरदोभवत्॥८९॥ उवाचवरंब्रूहिविमलाभवस्थितः॥ कुष्ठरोगनेषयात्वेषप्रार्थयान्यंवरंपुनः॥९०॥ आकर्णवि
विमलश्चेश्वमालापरत्रिमित्राक्षिनः॥९१॥ राम॥ हेकृष्णहेकृष्णहरेकृष्णकृष्णहरेहरे॥ हरेरामहरेरामरामराहरेहरे॥ रामायनमः॥ श्री

॥३॥

विषयान्यपीनिज्ञानव्यानिसप्तसप्तयोश्वायस्यसप्तसप्तिःसप्तसप्तेरियंसप्तसप्तीकासप्तसप्तिकाशोरीशास्किरित्यर्थः तस्यासंबोधनंहेसप्तसप्तिके॥८१॥ उदग्देशोपर्वतदेशेतत्रभिन्नीवावाडजःक्षत्रियःवाहराजन्यःक्र

×प्रहृष्टोदंडवद्भूमौसंप्रहृष्टतनूरुहः॥९१॥×

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

725

स्य ३

कस्मि[illegible] न वेद्यत अगस्त्यं प्रतिगृह्य स्वसंबोधनं कमल संपन्नेति पाठे कमलः संबोधनं भरतौ दृष्टांतः अनघेति अल्पफलवले असत्ये सरसि नावा
धिष्ठितो राघवितवान् ॥ ६ ॥ इहितं चेष्टितं कार्यं इति पावन तदसीति तत्त्वेन स्य गौरव मंदर वरक्षन चतस्र स्वार्थः ॥ मंदो मुरवं ॥ न हास्यर स्पतकग
मनः प्रीति वं च काश्यावाल ॥ ७ ॥ ॥ न हास्यरत नागमनं प्रीतिबंधं कांपावादस्त्व यमेव चि मीत नागम्यते तेनाह ॥ अधैवेति ॥ स्वमापया स्वरा
त्स्या पार्वत्या सह हे सर्थः ॥ विधौत ॥ हे विधे हे विधातः सर्वकार्याणि समेव करोषि ॥ अखिलेति ॥ चेति चैवं स्पाकर्त यमेयदकस्यंते ति

योगिन्यः प्रेषिताः पूर्वं प्रेषितो थ सहस्रगुः ॥ नायापि ते निवर्तते कास्याः कमलसंभव ॥ ७ ॥ सा समुत्सुकये काशी लोके रामममानसं ॥
प्राकृतस्य जनस्येव चंचलाक्षीव कानन ॥ ८ ॥ मंदरे चरति मेऽनघ्र रा सुंदरकंदरे ॥ अनघ्र तु घ्रपानीयेन कस्ये वाल्प पल्वले ॥ ९ ॥
नाधिष्ठितथामासतापो हालाहलोद्भवः ॥ काशीविरहजन्मात्र यथामामभिबाधते ॥ १० ॥ शीतरश्मिः शिरस्थोपि वर्षन्नपी
यूषशीकरैः ॥ काशीविश्लेषजं तापं नाहो गमयितुं प्रभुः ॥ ११ ॥ विधे विधेहि मे कार्यमार्यं दुर्यं महामते ॥ पाहि काशीमते ॥
स्तुर्णं यत्न स्वचममोहते ॥ १२ ॥ ब्रसंस्त देव तं वेत्सि काशीसज्जनकारणं ॥ मदीयं न सजे काशीं किमु योवेत्ति किंचन ॥ १३ ॥
अस्येव किं न गच्छेयं काशीं ब्रह्मस्वमायया ॥ दिवोदासं स्व धर्मस्थं न लंघयितुमुत्सहे ॥ १४ ॥ विधे स नंदि यया भिलमे नवि
दुधासि वल ॥ इति चेति च कनकपे सयप्तार्थमतो खिलं ॥ १५ ॥ अरिष्टं गंधयं पंथास्ते सुखोदर्कोऽभवत्तव ॥ आदायाज्ञां विधि
मेऽधिपयौ वाराणसीं मुदा ॥ १६ ॥ सितहंसरथस्तूर्णं ययौ वाराणसीं पुरीं ॥ क्षतक्रमसमिवो मानं अमन्यत तदात्मभूः ॥
॥ १७ ॥ हंस पानफलं मेघजातं काशी समागमे ॥ काशीप्राप्तावतः प्रोक्तौ तेन सुपाः पदे पदे ॥ १८ ॥ दृशिधातु रङ्ख दृष
महर्षी प्राप्य सान्वयः ॥ स्पष्टं दृशिरथं प्राप्य देशानंद वाक्यतो ॥ १९ ॥ स्वयंसु चेतयामद्रि स्वाति स्वर्ग तरंगिणी ॥ पत्रानंदमर्थं

त्वय्यपायोऽपगतार्थं इत्यर्थः ॥ त्वया पायं मितपाठः ॥ सुगमः कर्तव्यालयीतिपाठे अपार्थ व्यर्थमिति पाठे कष्टा व्याख्येयं ॥ रिष्टं शुभाशुभ
तदभावः अरिष्टं शुभं यथा स्यात्तथा गच्छ रिष्टं क्षेमे ष्ट्यशुभे वेपुंसि स्वड्गे च फले निवृत्ते चेति मेदिनीकरः ॥ सुखोदर्कः सुखोत्तरफलः ॥ सितेति ॥ सु
न्त्वाहं सा य स्मिन् रथो यस्य सः ॥ १५ ॥ ॥ दृशिरति ॥ दृशिर प्रेक्षणे इति धातोः ॥ दृश्यते अनयैति दृक् चक्षुः सहचोक्षसचेषां सा
न्वयः सार्थकः ॥ यद्वा स्मात् ॥ आनंदवाटिकाविशिनष्टि ॥ १९ ॥ स्वयमिति ॥ स्वापि स्वकीया यास्ति तीयरितिपाठे सिद्धा स्मारः सर्वः ॥

प १   स्कु ३

यक्षाणामानंदयज्ञे केकतुकाख्याने ... ॥ १० ॥

726

जानीतः २

ना २

निर्दिशंतीति ॥ अन्यत्रस्थितानां अपि फलनिकास्यां निर्विशंतीति संभव आनंद वंति भवंति काशीस्थितानां लक्षणानां आनंद [illegible]
भावः ॥ यत्रानेदमयाजनाइ सेत्र कारणमाह सदैवेति विद्वांसः संविदाते जानीतः ॥ मनुते ध्यायति बुध्यति निश्चिनोति वा स्याहीनवाते च [illegible]
३न को शीपररूपतिकास्यानदर्शनयेषां इति वा कास्य दर्शनैः ॥२७॥ ॥ वहते रागः फल्गे रित्सयर्थः ॥ व्यथा पिअकारि विश्वेशस्यानो [illegible]
निर्दिशंति समग्र कारणं पापक अन्यानंद वेत च ॥ सदैव नंद भवः काशी सदैवानंद दः शिवः ॥ आनंदरूपा जायंते तैः कास्यां ग्रहजातव ॥
=भ्यो३ चरत्यो परि स्तुविन स्ताबेव क्षत न मि ह ॥२२॥ चरणो यो विचरतां विश्वभर्तुः पुरा ध्रुवि ॥ तावेव श्रवणोश्रोतुं से निदात नु [illegible]
कुश्कतो ॥ इह श्रुतिमतांपुसां यो काशी [illegible] तास कृतः ॥ तदेनम नु तेसर्वम नास्ति ह मनस्विनी ॥ २३ ॥ येनानुमन्यते नेपा
काशी श्वर प्रभा पाश्च ॥ बुद्धिर्बुध्यति सा सर्वमिह बुद्धिमतां सतो ॥ २४ ॥ य एत द्रुजटिधाम फल वंस्तु विषयी कृतो ॥ २८
॥५॥ एनिधान्यानतानिवा तोह तान्यपि ॥ २६ ॥ अघमेसफलं चायुः परार्द्धद्वय संमितं ॥ यस्मिन्नसति मयाप्पियुः
प्रापा काशी कापुरी ॥ २८ ॥ अहो मे घम संपत्ति रहो मे भाग्य गौरवं ॥ पपद्धक्षिप्यमहं काशी सुचिरस्थित ना ॥
॥ २९ ॥ अघमे स्वतु तपोवृक्षो मनोरथ फलैरवे ॥ ज्ञानभक्त्यनुनासिकं कल्पितो तिव्रहूतरैः ॥ ३० ॥ मया व्यथापव
कुत्राहष्ठः स्रष्टिविनन्दिता ॥ परसन्याद्दशी काशीस्वयं विश्वेश निर्मिता ॥ ३१ ॥ इति हष्ट मनो वेधा हष्ट्वा वाराणसीं पुरीं ॥ वह्नि श्रीलएरूपा राजा नेचह दर्शह ॥ ३२ ॥ जगाम इक्षितपा [illegible] स्वस्य [illegible] ध्वनीधन जो ॥ कृतप
एमोराज्ञाथ मे जोतद्वृतमानसं ॥ ३३ ॥ हतमानोन्नपातनासोऽभ्युत्थानास नादिभिः ॥ विप्रोवृज सेपङ्कपर स्थाग ॥ ११५ ॥
न कारणं ॥ ३४ ॥ ॥ श्री सूत उवाच ॥ ॥ अपावृक्षकाली नो स्पृहमेतेचि रंतनेः ॥ त्वं तु मानेन जानासि जानेतो हि
र पुंजयं ॥ ३५ ॥ ॥ परः शतानमपीह ष्टाराजानो धरिदाक्षिणाः ॥ वाजतानेक संग्रामापाप जैकाजतद्विपाः ॥ ३६ ॥ धनानि निः
यस्याः सा विश्वेशानिर्मिता ॥ वाते ष्व परेपर नाताः असंख्याताराजानो मया दृष्टाः परं केवलं ते व्वेषु राजसु मध्ये तव सहगुणाः छत्री
पवित्रा यते सापुरा स्तो मम दर्शनगता इति पं चानाम्न्वयः याय जेको इत्यारी लाः विनिः कृताः षड्वर्गाः निर्जित शत्रु भते
षडिद्वय वर्गाः अतस्यपारं दृष्टा नेअध्ययनस्यपारगामिनः राजनीतिविचक्षणाः संधिविग्रहयानासन द्वैधाश्रयेषु निपुणाः ॥ ३७ ॥

५ काश्यां यान्या पतंती हनजनाः काश्य दर्शनाः ॥ २७ ॥ ५

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रयोवेगः॥ दृशं नेत्रं ज्ञानं वा सद्गुणलभेवाहाप्रदोति॥ अस्पृहावतां स्पृहारहितानां निरीहस्य तत्वं न पारतिन्त्यमयादित्यर्थः॥ स्तावकांश्चास्तौतिकुर्वाणा

दयादाक्षिण्यनिपुणाः सत्यव्रतपरायणाः॥ क्षमया क्षमयातुल्या गांभीर्य्यजितसाग[...]राः॥४८॥ जितरोषरयाः शूराः सौम्यसौंद
र्य्यभि[...]मयः॥ इत्यादिगुणसंपन्नाः सुसंचितयशोधनाः॥४९॥ परं द्विजाः पवित्राय राजर्षे सद्गुणाः कुले॥ तेषु पुराजसुमम प्रा
यशोनिधनंगताः॥४०॥ अद्यानिजकुटंबस्त्वं तु पूर्वदेवदेवतः॥ महातपः सहायस्त्वं यथा नान्यत यान्नपाः॥४१॥ धन्योसि मान्यो
सि सतां हृजनी योसि सद्गुणैः॥ देवाग्रपि दिवोदासत्वत्रासा न विना मम॥४२॥ किं न्वस्तु त्यात वन्न्पदि जानामस्पृहावतां॥ किं कुम
स्वगुणग्रामास्तावकान्नः प्रकुर्वते॥४३॥ गोष्ठी तिष्ठ वियंतावदस्तु तं स्तोमि सांप्रतं॥ यदुकामोस्म्यहं राजस्त्वां सहायमतो हृले
॥४४॥ तयाराजन्वती चेयं वनिः सर्वर्द्धिभाजनं॥ अहं चास्ति धनोराजन्न्यायोपात्तमहाधनैः॥४५॥ इयं च राजधानी ते कुम्भभूमा
वनुत्तमा॥ यस्यां हतानां काय्याणि संवर्त्तेपि न संक्षयः॥४६॥ संचितं यद्धनं पुंभिर्यन्न सन्मार्गगामिभिः॥ तत्कार्य्ये विनियुज्यते
क्रूरगायेतरथा भवेत्॥४७॥ महिमानं परं काश्याः कोपि वेदजसूपते॥ कृते त्रेन न [...]नाघं भोः सर्वज्ञानप्रदायिनः॥४८॥ मन्यध
न्यतरोसि त्वं बुकुजन्मरातान्निन्तिः॥ सुहृते पापासियत्कारी विश्वभर्तुः परां तनुं॥४९॥ काशी त्रिजगतीसार त्रिवेदीसार
पवं॥ निजगोत्रिमसारश्च निर्णीते ति महर्षिभिः॥५०॥ विश्वेशानुग्रहे लेवल्व यै प्राप्यापूर्णतपुरी॥ एकस्याप्यवनात् कार्य्या
त्रैलोक्यमवितं भवेत्॥५१॥ अन्यश्चैतेहितं वचि प्रयदितेरोचूतं नघ॥ प्रीणनीयः सुदेवैको विश्वेशः सर्वकर्मभिः॥५२॥ अन्यदेवाधि
याराजन्विश्वेशं पेरयमाप्नुवितु॥ अलविध्वं उचंचक्रोः [illegible] तस्य धुर्जटिः॥५३॥ विप्रेरुद्देके मिछ हृदिः ज्ञिक्षणी याय नोऽन्न
पाः॥ न तन्नावहितं ख्यातं किं वामे चिंते मानया॥५४॥ इति जोषं स्थिते विप्रे प्रत्युवाच नृपो नेमः॥ सर्वं मयाह दिष्टं तं यत्त्वयो
द्विजोत्तम॥५५॥ राजोवाच॥ ॥ अहं स्वयं क्ष्यमाणस्यतत्व साहाय्ये कर्म्म दिश॥ दासोस्मि यज्ञसंभारानुपमेकोरातोरिजन्मा
नु॥५६॥ यदाप्तोपि निरविदृतेनसंगांगे पिञ्जवान् भूपः॥ यज्ञरैवेक मना ब्रह्मन्नु सिद्धमन्यन्न स्त्वयं द्विती॥५७॥ राज्ञ्यंकुरोमि
यज्ञलन्न स्वार्थंत न्मननागपि॥ पुत्रैः कलत्रैर्देहेन परोपकृतये यतौ॥५८॥ ॥ ६॥ ॥ ६०॥ ६१॥ ६२॥ ६३॥

नागोष्ठीवाचस्तोमि कथया मित्यहं चास्ति धनः अस्तिराद्धः सुबंतप्रतिरूपकः अस्ति धनं यस्य सः अस्ति धनः अस्ति धनीति क्वचित्पाठः॥ ७॥ जो
षं तूष्णीं इयक्ष्यमानस्य यष्टुं इच्छतः॥ सप्तांगे स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलौ॥५८॥ ६१॥ ६२॥ ६३॥ ६४॥ ६५॥

नि च १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥

पूर्वैः प्रजासंतापजन्यदुःखाद् एकेऽभिलाषं तं दर्शयति मार्गेणोपाचक्रुः स्वतनोः शरीरस्य यज्ञात् विपुलदक्षिणायज्ञकृत्। अयमेव पाठः॥ घेतियत् यदभ्यतिर्यक्कालमारभ्य होमधर्मेण गणानां तरं यात तदाप्रभृति नघा। पिनिलिमानंतमाख्यामलखनदः नमो

नमोऽयं सास्याथेभ्यो तीर्थेभ्यो पिमन्वितः॥ प्रजापालनमेवैकोधर्मः प्रोक्तो मननं सिंचयित्वा पप्र। प्रजासंतापजो वह्निर्दिवस्त्राये रपिदारुणः॥ द्वित्राम् दहतिव त्राग्निः पूर्वो राज्यकुलोत्तमं॥६०॥ यदा वक्ष्य घासिन्त्र मुखविनं द्विजसत्तम। तदा विप्रपद मामिरभिषेकं करोम्यहं॥६१॥ हवनं ब्राह्मणामुखं पलं करोमि द्विजोत्तम॥ अन्यत्कुलक्रियाभ्यो पितां द्विरीक्ष्म हाम ते॥६२॥ अभिलाषेषु सर्वेषु आगतं कोऽहं देहिनां॥ अधापि मार्गेण कोपि दृष्टः स्वतनोरपि॥६३॥ अहो अहो लिखितं कुर्भिः फलितो मेमनोरथः॥ यत्वं मे घगृहान् प्राप्तः किं चित्प्रार्थयते द्विजः॥६४॥ एकाग्रमनसोऽपि प्रयज्ञा

२६ न्विपुलदक्षिणेन॥ बहुयज्ञकृतं विद्धि सहोप्य सर्ववस्तु॥६५॥ इति राज्ञो महाबुद्धेर्धर्मश्रीवस्यभाषितं॥ श्रुत्वा तु एमनाः सुश्लोकः तु संसारमाहरन्॥६६॥ स साहाय्यं प्राप्य राजपेर्दनो दासस्य पप्रच्छ॥ ईयाजदर्शिः कास्यामच्चपे घेमहामुखे॥६७॥ अघापिहोमच्छमो घेयं घा संगगनो तरं॥ तदा प्रभृति नो व्योमनी विमानजोहासदः॥६८॥ तीर्थं दशाश्वमेधाख्यं संस्थितं जगतीतले॥ तदा प्रभृति तत्रासी दाराणस्य प्रभुप्रदं॥६९॥ पुण्यरुद्रसरोनाम तत्तीर्थं कुरुशोद्भव॥ दशाश्वमेधिकं नस्मात् तीर्थं पिपरियुहात्॥७०॥ स्वर्धुन्यपतत प्राणाभा गीरथसमागमाल॥ अतो वपुष्यवं जातमेतत्तीर्थं शुभं॥७१॥ विधिंदशाश्वमेधे शालिंग संस्थाप्य तत्र वै॥ ऋषयस्तपो भगतो घापिक्रूपकारी विहायचा॥७२॥ राज्ञो धर्मरतस्यास्य दिखं नानापविचन॥ अतः पुरा सुरलोक जले किं वदि दिघि॥७३॥ क्षेत्रप जो वचिज्ञोपप्पा यनरोपच्य परीवा॥ गुणेश्वरेच संस्था प्यविधिस्तत्रैव संस्थितः॥७४॥ परातनुरियकारी विश्वेशास्पीतानि जितं॥ अस्याः स सेवनाद्य पुनर्न कुप्पति मनो मापि॥७५॥ कः साप्य कारी दुर्मेध्याः पुनः स्तसंतोमि

तजहाती स्वन्चयः॥७६॥ तीर्थमिति तत्र यज्ञवाटे तस्येत्पाठे तस्य ब्रह्मणः संबंधितत्तीर्थमिति पर्वनैवान्वयः॥ प्रभाव साह परातनुरि

तत्रहेतुमाह॥ विश्वसंतापेति॥ ईशास्यायंरेवाततस्मात्॥ स्वकासंसअभुंजत्रितिक्वचित्॥ निर्णियनिश्विस निर्णिपात्रितिक्वचित्॥७७॥ पितृसम
र्चनोभितिश्राद्धविशेषणं॥ एवमितिक्रमस्नायी तिथिरंध्रसात्राप्यप्रतिजन्माघंदशभ्यांदशजन्माघमितिक्रमेणोसर्वः॥ यामीयमसं

विश्वसंतापसंहर्तुःस्थानेविश्वपतेःस्तनुः॥ संताप्यतेजरंकाश्यांविश्वेश्वजमहाग्निना॥७७॥ प्राप्यकाशीसिजेयस्तु समस्तापौघनाशिनीं॥
नश्यस्तुःसर्पारिरीवोभतासोत्यपराङ्मुखः॥७८॥ निर्वाणलक्ष्मीपः काश्यांस्वका संसारदुर्गति॥ तेनकाशीनसंसाप्यानस्पाशेवानुग्रह
त॥७९॥ एः काशीसंपरिसज्यगच्छेदन्यत्रदुर्मतिः॥ तस्यहस्ततलाद्गच्छेचतुर्वर्गफलोदयः॥८०॥ निर्वाणमोक्षदायस्यसुपुण्यमभिव
हिंनी॥ संप्राप्यकाशीदुर्मेधास्सजन्मोक्षसेवप्रदा॥८१॥ स्वर्गलोकेधनासौख्यंपुसौख्यंनैघवपदे॥ पत्तोरव्यल्लभतेकाश्यांनिमेषार्द्ध
निमेषणात्॥८२॥ वाराणसीगुणगणाननिर्णयमहिगास्सति॥ भावसमंदरगिरिंनइनःप्रसंगान्मुने॥८३॥ स्कंदउवाच॥ मित्रावरुण
योःपुत्रमहिमानंब्रवीमिते॥ काश्यांदशाश्वमेधस्यसर्वतीर्थसिरोमणेः॥८४॥ दशाश्वमेधिकंप्राप्यसर्वतीर्थोत्तमोत्तमं॥ यासोचित्
त्रिपतेकर्मतदसंख्यमिहोस्त॥८५॥ स्नानंदानंजपोहोमःस्वाध्यायोदेवतार्चनं॥ संध्योपास्तिस्तर्पणंचश्राद्धंपितृसमर्चनं॥८६॥ दशा
सा स्वमेधिकेतीर्थंसरस्ननोनरोत्तमः॥ दृष्टुदशाश्वमेधेयरास सर्वपापैःप्रमुच्यते॥८७॥ ज्येष्ठमासिसितेपक्षेप्राप्यप्रतिपदंतिथिं॥ दशाश्व
मेधिकेस्नातोमुच्यतेजन्मपातकैः॥८८॥ ज्येष्ठशुक्लद्वितीयायांस्नात्वारुद्रसरोवरे॥ जन्मद्वयकृतंपापंतत्क्षणादेवनश्यति॥८९॥ ए
वंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः॥ आशुक्लपक्षदशमीप्रतिजन्माघमुत्सृजेत्॥९०॥ तिथिंदशहरांप्राप्यदशजन्माघहारिणीं॥
दशाश्वमेधिकेस्नातोयामींपश्यनयातनां॥९१॥ लिंगंदशाश्वमेधेशंदृष्ट्वादशहरातिथौ॥ दशजन्मार्जितैःपापैस्त्यज्यतेनात्रसंश
यः॥९२॥ स्नातोदशहरायांयःपूजयेल्लिंगमुत्तमं॥ ततोदशाश्वमेधेशानेतंगर्भेदशास्यदेवात्॥९३॥ ज्येष्ठमासिसितेपक्षेस्नात्वावा रु
द्रसरेनरः॥ कुर्वन्दैवार्षिकीयात्रांनविघ्नैरभिभूयते॥९४॥ दशाश्वमेधावाधःपैर्यसलिलंसम्यगाप्यत॥ दशाश्वमेधेतन्नरःस्नात्वादश
हरातिथौ॥९५॥

यंबिनीपक्षंपक्षमानंस्नात्वेतितिशेषः स्नात्वेतिक्वचित् रुद्रसरोरुद्रसरइतिख्यातेम्यंब्रह्मणास्वनाम्नास्थापितंलिंगं॥९५॥ गुरुस्वरूपेमीश्वरम ।\

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मनालाख्यमंडपं॥ ॥इतिश्रीरामानंदकृतायांकाशीखंडटीकायांद्विपंचाशत्तमोध्यायः॥५२॥ ॥७८॥त्रिपंचाशत्तमेध्यायेक
रुद्रप्रेषणमुच्यते॥शंकुकर्णमुखानांचकाश्यश्रमहिमातथा॥५३॥ ॥धनादिविषयेदर्वाता अयोगिन्योमारहिताः॥सक्तम्
गादशस्यार्थः॥पक्षअयोगिन्यःमायरहिताअकारविश्लेषविनाकाश्याख्येनमुख्ययोगेनयुक्तदसर्थःयोगिन्यइतिक्वचित्पाठः॥७८
स्वर्धुन्याःपश्चिमेतीरेनत्वादेशाहेश्वरं॥नर्दुरंगामवाप्नोतिपुमान्पुण्यतमःक्वचित्॥७५॥यत्काश्यांसोमेशद्वारसंनतर्गेहस्यकी
र्तितं॥तत्रब्रह्मेश्वरंदृष्ट्वाब्रह्मलोकेनहीयते॥७॥इतिब्राह्मणवेषेणवाराणस्यांमहाधिया॥दुंढिनास्थिततावद्यावद्विश्वेश्वरा
गमः॥९८॥दिवोदासोपिराजर्षिरव्रवद्ब्राह्मणरूपिणे॥ब्राह्मणकृतयज्ञायब्रह्मज्ञालाभक मैत॥९९॥ब्रह्मेश्वरसमीपेतुब्रह्मशा
लामनोहरा॥ब्रह्मातत्रावसद्योमब्रह्मघोषैर्निनादयन्॥१००॥इतितेकथितोब्रह्मन्महिमातिमहत्तरः॥द्वाश्वमेधतीर्थस्य
सर्वाघौघविनाशिनः॥१०१॥श्रुत्वाध्यायमिमंपुण्यंश्रावयित्वातथैवच॥ब्रह्मलोकमवाप्नोतिश्रद्धयामानवोत्तमः॥१०२॥ ५३
इतिश्रीस्कंदपुराणेकाशीखंडेदशाश्वमेधिकनामद्विपंचाशत्तमोध्यायः॥५२॥ अगस्तिरुवाच॥ भगवन्कथयाख्यात
ब्रह्मणाब्रह्मवित्तम॥किंचकारततःशंभुस्तत्रब्रह्मण्यपिस्थिते॥१॥स्कंदउवाच॥ मणुवगस्त्यमहाभागकाश्यांब्रह्मण्यपिस्थि
ते॥गिरिश्चाश्चितयामासश्चरंशमुद्विग्नमानसः॥२॥पुरीसायादृशीकाशीविश्वेश्वराभुमिका॥नतादृशीदृशीहासीत्क्वचिन्मे
आयत्रोभवे॥३॥योयोयातिपुरींतांतुससतत्रैवतिष्ठति॥अभवन्ननुयोगिन्योयोगिन्यस्तारिसंगताः॥४॥अर्कंचिवकरंतास्त्वा
प्यसस्तहत्वकरोप्यरं॥विधिर्विधानदक्षोपिनससविधोभवत्॥५॥चिंतयन्निति देवेशोगणानाहूयानीरिशः॥प्रेषयामास
भोयात स्तिप्रंवाराणसींपुरीं॥६॥विमूर्वीतितयोगिन्यःकिंकरोतिसभानुमान्॥गत्वावित्तवरायुक्ताविधिश्चविदधातिकिं॥
॥७॥नामग्राहंततःप्रैषीद्धुनानपुरःसरं॥शंकुकर्णमहाकालघंटाकर्णमहोदर॥८॥सोमनंदिनंदिषेणकालपालकुपाटा
कुंभारमस्तकबाणाकर्णतारक॥९॥नीलपर्णस्थूलकर्णद्रुमचंडप्रभामय॥सुकेशविंदतघगकपर्दीनपिंगल॥सक॥१०॥वीरसे
इनिरातास्वचतुर्मुखानेकुशक॥पंचाक्षमारतारवच्चयेरसेमकलांगालिन्॥११॥ ७५ ॥अकंचितरतांकिंचिदपिकर्तुं
मसमतां॥अपानक्षरतात्ति तिपाठस्तरेःसहस्रकरोपनंतरारमपानक्षरतांतेजोरहिततांअपांकंत्रामस्यार्थः॥अरमसर्थसाविधःसाविधा
धे।

॥ ७ ॥

स्क॰

स्वकार्यं कर्त्तुं तानू प्रोत्साहयति भवंत इत्यादिना॥ ननु तस्मात् भवत्सु मध्ये द्वौ अमू शंकुकर्णमहाकालौ यातां गच्छतां इत्यन्वयः यद्वा भवत्सु मम अंतरंगेषु विद्यमानेषु मम समीपे तिष्ठत्सु काशीप्रवृत्तिं राज्ञस्य प्रवृत्तिं न ज्ञाना मि
त्यपुक्रमिति शेषः॥ ननु तस्मात् हे शंकुकर्णमहाकालौ युवां द्वावेव यातां तत्र इति कविसाठः आयातं आगच्छतं विस्मृतिं मा गा वाक्यं प्रस्मरत्यतनेनैव तत्सद्भूरिति शेषः यद्वा काशी विश्वेशा भवी गिरं विस्मृत्य तत्रैव तौ मोहमापातां मिश्र

विराधस्तु मुखात् पाठे भवंतो मम सूनवः। यूयं सौख्यं ददे हं वो नगमेयो यथा त्वयं॥१२॥ यथा शास्त्रविशारदो व यथेमे तं दिभृंगिनौ॥ भवत्सु विद्यमानेषु महाविक्र
मशालिषु॥१३॥ काशीप्रवृत्तिं नो जाने दिवोदासनृपस्य च॥ योगिन्यर्कविधीनां च तद्यौ यातं भवत्स्वम्॥१४॥ शंकुकर्णमहाकालौ कालस्यापि कंपनौ॥
ज्ञातुं वाराणसीवार्त्तां मा यातं क्ष्वत्वरान्वितौ॥१५॥ कृतप्रतिज्ञौ तौ तूर्णं प्राप्य वाराणसीं पुरीं॥ शंकुकर्णमहाकालौ विस्मृतौ शांभवीं गिरं॥ पृथ्वेंद्र जाठि
कीहृष्ट्वा मायाभिहविवक्षणः॥ क्षणेन मोहमायाति काशीवीक्ष्यनथैव नौ॥१७॥ अहो मोहस्य माहात्म्यमहो भाग्यविपर्ययः॥ निर्वाणराशीयत्काशी
प्राप्य यां त्यन्यतो बुधाः॥१८॥ तत्यजे येरियं काशी महाशीर्वादभूमिका॥ तेषां करतलान्मुक्तिः प्राप्तापि परितो गता॥१९॥ यत्र सर्वविभ्रष्टं यतः स्नानमात्रं
विशिष्यते। अप्युक्षीक्तनपानीयैस्तां काशीं कः परित्यजेत्॥२०॥ पत्रदंडप्रणामेन अर्प्ये केन शिवायत॥ तुष्टमेदंपदं प्राक् तां काशीं को विमुंच
ति॥२१॥ पत्रैकद्विजमात्रं तु भोजयित्वा यथेच्छया॥ वाजपेयादिकं पुण्यं तां काशीं को विमुंचति॥२२॥ एकां गांयत्र दत्वा वै विधिवद्ब्राह्मणाय वै॥ लभ्यते द
मुतगोपुण्यं कस्तां काशीं त्यजेत्सुधीः॥२३॥ एकं सुवर्णविश्राण्य पत्र पात्राय सन्मतिः॥ कोटिसौवर्णिकं पुण्यं कस्तां काशीं समुत्सृजेत्॥ एकं लिं
गं प्रतिष्ठाप्य यत्र संस्थापितं भवेत्॥ अपि त्रैलोक्यमखिलं तां काशीं कः समुज्झति॥२५॥ परिनिष्ठि त्यता विश्वं लिंगे संस्थाप्य पुण्यदे॥ तत्रैव संस्थितं
प्राप्तौ काशीं नाद्यापि मुंचतः॥२६॥ शंकुकर्णेश्वरं लिंगं शंकुकर्णगणो विर्लिं॥ दृष्ट्वा न जायते जंतुर्जातु मातुर्महोदरे॥२७॥ यथा कृतयात्यानतर्वापरं देवोधापतेः॥२८॥

न्ययः अहो मोहस्य इत्यादिना तानि विश्वं परिनिष्ठित्यतत्रैव संस्थितिं प्राप्तावितिनवमश्लोकगतेनान्वयः॥१८॥ दश सौवर्णिकं दशसुवर्णदानजन्यं विश्वेश्वरात् पूर्वभागे इति विश्वाश्रनादिशां तात् अग्नेर्निर्विश्वेशात्
पमः कामोर्दिकु यस्मात् समवायुदि ग्वरुणस्य मध्ये नैऋत्यां दिशी स्पर्शः अथवा विश्वेशाद्धिश्वनाथात् यावत्सोर्दिक्कत स्याभागे समानसूत्रपदे छोड स्पर्शः अथवा विश्वेशात् सकाशात् पश्चिमे सहेतु उदिग्भागे उत्तर स्याव यत्त्वं

३१

नैमित्तिकमाहा॰ इत्यर्थः स्पृशा
ज्ञानाख्यायां श्री ॥ त्रिंशत्प॰
विनेश्वरकुंडा॥ ॥२८॥
नामनामराणः काशिखा॥

प॰ शंकुकर्णमहाकालौ
सप्तदशसंहिता॥ द्विसप्ततिः
शंकुकर्णमहाकालौ मिथ्याप्रसंगेना॥
॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७३२

ज्ञात्वेति॥ अस्मत्कार्यमनिष्पाद्य शंकुकर्णमहाकालौ तत्रैव तौ न स्थितौ इति ज्ञात्वेत्यर्थः तज्ज्ञाने कारणमाह सर्वज्ञनाथ इति॥ आहेषीत् प्रेषयामास॥ निवृत्तिः सुखिनः संस्थितौ इत्यर्थः॥ औदरीं दरीं उदरसंबंधि
नीं दरीं॥३६॥ व्यासेश्वरमित्यत्र विश्वेश्वरमिति क्वचित्पाठः॥ अवहितो ध्यानस्थः॥ वदंतीति॥ अस्माकं सोपि नो अस्माकं वंशे तिलोदकस्य दाता कः कश्चिदपि जनयते किं ज्ञापयते जनयिष्यतीति निमित्त तरोवदं ... ती र

विश्वेशाद्दक्षिणे दिग्भागे शंकुकर्णेश्वरं नरः॥ संपूज्य न विशेदत्र घोरे संसारसागरे॥२९॥ महाकालेश्वरं लिंगं महाकालगणार्चितं॥ सर्वे पिल्वा वनलाव

॥ ८ ॥ लकत्वा कालभयं कुतः॥३०॥ स्कंद उवाच॥ शंकुकर्णमहाकालौ विरं तत्र विलंबितौ॥ ज्ञात्वा सर्वज्ञनाथोथ आहेषीदपरौ गणौ॥३१॥ घंटाकर्णं त्वमा ॥ ८ ॥

गच्छ महोदर महामते॥ काशीं यातं युवां तूर्णं ज्ञातुं तत्र त्यवेष्टितं॥३२॥ इत्यगस्ते गणौ तौ तु गत्वा काशीं महापुरीं॥ व्यावृत्तायापि तौ यातौ कापि त

त्रैव संस्थितौ॥३३॥ घंटाकर्णेश्वरं लिंगं घंटाकर्णगणोत्तमः॥ काश्यां संस्थाप्य विधिवत्तस्थौ तत्रैव संस्थितः॥३४॥ कुंडं तत्रैव संस्थाप्य लिंगस्न

पनकर्मणे॥ नाद्यापि संत्यजेत्काशीं ध्यायल्लिंगं तदेव हि॥३५॥ महोदरोपि तत्पार्श्वे शिवध्यानपरायणः॥ महोदरेश्वरं लिंगं ध्यायन्नद्यापि कु

मज्जा॥३६॥ महोदरेश्वरं दृष्ट्वा वाराणस्यां द्विजोत्तमः॥ कदाचिदपि वै मातुः प्रविशेदौदरीं दरीं॥३७॥ घंटाकर्णह्रदे स्नात्वा दृष्ट्वा व्यासेश्वरं विभुं॥ य

त्र कुत्र विपन्नोपि वाराणस्यां मृतो भवेत्॥३८॥ घंटाकर्णे महातीर्थे श्राद्धं कृत्वा विधानतः॥ अपि दुर्गतिमापन्नानुद्धरेत्सप्त पूर्वजान्॥३९॥ नि

मज्य पिहितः कुंडे क्षणं पावहितो भवेत्॥ विश्वेश्वरमहापूजाघंटारावान् शृणोति यः॥४०॥ वदंति पितरं तस्य घंटाकर्णमहाजले॥ दातास्तिलो

दकस्यापि वंशे नः कोपि जायते॥४१॥ यद्वंश्या मुनयः काश्यां घंटाकर्णमहाह्रदे॥ कृतोदकक्रियाः प्राज्ञाः परां सिद्धिं ययोद्भव॥४२॥ रामराम॥

निउअर्थः न तु तथा सति किं स्यात्॥ किमर्थं वावदंतीत्याकांक्षायामाह यस्यैव यद्वंश्या इति यस्य घंटाकर्णस्य ह्रदे निकोदकः दातुः वंश्याः यद्वंश्याः यत्र घंटाकर्णे कृतोदकक्रियाः पापेभ्यः वंशोद्भवः तेन त्वामु
नयः संतः परां सिद्धिं प्राप्तास्तथा वयमपि गास्याम इत्यभिप्रायेन वदंतीति॥४१॥ हे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥ हरे राम हरे राम हरे राम राम राम हरे हरे॥ राम राम राम राम राम राम ...

सि२

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

733

इयंकाश्यांमहामोहनम्नूरि तिष्ठनर्नजानंतीत्यर्थमावा नूपरिषदः परिकरः तावंतं प्रेषपिष्या मीत्यर्थः सर्वांश्चेन्मोहीपिष्यामि प्रेषणेन तत्राह नोद्यमादिति एतीद्वषणोति नोपमाइति स्तुस्वकारणस्य कलुष्यमिति
कूक इति। प्रतिपक्षश्च तोपिविधिर्दैवं तेषां विचक्षणा नांमल तोयं मात्रीरिवद्येत निर्बंधं दृष्ट्वा मानुकूलो भवेत्र स्यर्थः [illegible] माहशी नेति चितोस्मा गावोरश्मपोपयोस्तो वंद्र स्त्यो

स्कं द्रष्टवान्॥ घंटाकर्णोगिरीयातेप्रयालेव महोदरे। विसिस्मायस्मरद्वेशामेो किमांदोद्यम्मुद्धः॥ ४३॥ उवाचवमनस्येवहरः स्मित्वा पुनःपुनः॥ महामोहन विद्यासि
ति२ काशीं त्वां पर्य्यवेम्यहं॥ ४४॥ पुराविदः प्रसंशंत्वा सदामोहहारिणीं॥ काशीविति नजानंति महामोहनभूरिय॥ ४५॥ प्रेषयिष्याम्यहं सर्वानुत्सवंतो मोहयिष्यति॥
इति सम्यक् विजानामि काशी त्वां मोहनौषधिं॥ ४६॥ तथापि प्रेषयिष्यामि यावन्मेत्ति परिच्छदः॥ नोद्यमाद्धिरमंती हज्ञानिनः साध्यकर्मणि॥ नोद्यमाद्धि
रतिः कापाकापि कार्य्ये विचक्षणे॥ प्रतिकूलोपि रिवद्येन विधिस्त्त सततोद्यमात्॥ ४८॥ शीलोत्कर्षानुस्वधर्मानुयस्तावपि नभोगणे॥ शांतिनेत्यजतोद्यापि प्र
क्रांतव्यक्ततोद्यमो॥ ४९॥ एकत्र हंति कार्याणि प्राप्त कूल्याद्विधिर्मुहुः॥ एकत्रकरणी पाति सेत्स्यत्यन्नं प्रशोद्यमात्॥ ५०॥ दैवंपूर्वकृतं कर्म कथ्यते नैस्तुनः
॥ तन्निराकरणे यत्नः स्वयं कार्यो विपश्चिता॥ ५१॥ भाजनोपस्थितं कोड्येदेवान्नास्यं स्वयं विशेत्॥ हस्तवक्रोद्यमात्तश्च प्रविशेदोदरं दरीं॥ ५२॥ इद्यमंस
मर्थ्येशो निश्चित्तं देवजित्वरं॥ पुनश्च प्रेषयांचक्रे गणान् पंचमहारथान्॥ ५३॥ सोम नंदि नंदिषेणकालपिंगकुकुटाः॥ तेषामपि न निवर्त्तते काश्यां
जीवामृतायथा॥ ५४॥ तेपि स्वनाम्ना लिंगानि शंभुसंतुष्टिकाम्यया॥ प्रतिष्ठाप्यस्थितः काश्यां विश्वनिर्माराजन्मनि॥ ५५॥ श्रीरामराम॥

ति१ स्वपर्न्नु नाराकुणाद्यत्ता अपि अग्रारम्या पिगर्भिनत्तजनः नमुंचतः किमपि प्रकांतयेगमनेऽद्यमोपाप्यांतो॥ ४६॥ नहि कुत्रापि कार्य्ये प्रतिबंधोन स्यादित्याशंक्याह विमार्गं॥ एकत्रेति मुहुः प्राप्तिकूल्यादित्यन्वयः अन्यत्र गतिर्डो
लेइति पाठेऽन्ते अन्ते तोबहूद्यमानंतर मित्यर्थः नतु। लक्ष्लुटे लिखितं यत्नु षष्टिआगरवासरे। नोहरिः शंकरोवक्तीघ्यन्यथाकर्तुमर्हतीति हरीनाहर। कथं देवमन्यथाविधातव्यमित्याशंक्याह॥ देवमिति कर्मणाकृ
र्म निर्हारसंभव त्रिषेधुववनस्य लन्तु द्यमवत्स कृषादि निभावः उद्यमं विनादेवमर्किं चिक्लरमिसाह भाजनेति प्रयत्न पूर्वमुपमहरन्न तस्यकृत्वमाहइत्युद्यममिति समर्थं संसाधउद्यमं विशिनष्टि निश्चि
तं पक्ष्याहप्रकदं दैवजित्वरं अंधजयनशीलं॥ ५५॥ ॥

तर५
न्यु६

॥ १७ ॥

२

॥ यत्वादि३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

73

734

मूल्येन जीविकया वस्तु वी सुकर्दुर्या वस्तु जैतावत्कं भजतइत्यर्थः व्यष्टावासो धर्माश्रयः अधिष्टे अधि अधिकं यथास्यात्तथा इष्टे राज्ञीस
र्थः॥१०२॥ निमेषरहितानीक्षणानियेषां तेनिमेषक्षणाः॥ असंतं सावधाना इत्यर्थः॥ नपरिज्ञाततस्यराज्ञीछिद्रं यैस्ते अपरिज्ञातछि

पस्तकारीतकारीतिहिस्त्रिजं पतिपुण्यवान्॥ अपि सर्वपवित्रेभ्यः सपवित्रतरोमहान्॥ येन कारीहृदि ध्यातायेन
कारीहृसेविता॥ तेनाहंहृदि संध्यातस्तेनाहं सेवितः सदा॥९५॥ कारीयःसेव्यते जंतुर्निर्विकल्पेन चेतसा॥ तमहंहृदयेनि
संधारयामिप्रयत्नतः॥९६॥ स्वयंवस्तमेरा कोपि वासयेत्तीर्थवासिनं॥ अप्येकमेप्यमन्येन सवस्तेः फलमाप्नुते॥॥
९७॥ कारुण्यं वसतियेषी रामेपचहाविनिश्चया॥ जीवन्मुक्तास्ते ज्ञेया वेधाः पूज्यास्तोत्रं हि॥९८॥ इत्थं वैमस्पवकुराः ॥२०॥
स्थाणुर्वी राणसी गुणान्॥ गणानन्यान्समाकृपयाहि तौस्मीतरंवेके॥ ॥ तारकं संसमागच्छ गच्छ॥ स्वच्छमानस
॥ दिवोदासोवच्यावां सोपस्मयी वेष्टवरां पुरी॥१००॥ ते पर्णी कर्णी चंडप भामपास्तु केशविंदते छागकप
दीन पिंगलाक्षक॥१०१॥ वीरभद्र किरातारव्य चतुर्मुखवानकैक॥ पंचास्य पक्षभारभ्रातारव्य पक्षक्षेमकलीग ऋ
२॥१०२॥ विराधस्तु नुरवाषाढे योतु सर्वरूपेरूपकैः॥ एते गणा महाभागास्वामिमकाद्दृष्टमना॥ ॥१०३॥ महासाया
बहुविधा बहुरूपा विचक्षणाः॥ अनिमेषक्षणास्तस्थुः क्षोणीरा छिद्रकांक्षिणः॥१०४॥ अपरिज्ञाततीछद्राधि
द्राविवतयरोरूना॥ आधिकमेतदहो जातानानिडुः स्वामिनीहिते॥१०५॥ गणाश्चचुः॥ धिगस्मान्स्वामिनामि संक्रु
तं संभावन्मुना कुः॥ मनुष्यमात्रमप्येकं पचेकं नवरीकृतं॥१०६॥ बहुमानेन नमेनेसौ नमहीयसा॥ कृतमस्मा
तं स्वत्क्षेण धिक्कुस्तकार्पवं च कान्॥ कागतनो भावनी हस्वामिकृत सममादृनो अमंतमो मपेलोके धुवं नासोभ

डा॥ विडावितंदूरीकृतं यशएव धनं येषां तोविडावितयशोधनः॥ अः क्रोधे अहो खेदे। मनुष्यमात्रमपि एकंचापरेकं मनुष्यमेना
पि नवरीकृतं तस्य नेडुरे। स्ववरीकरणं दूरत एवनिस्तामित्यर्थः॥ अज्ञीनमपेलोके प्रावेष्टानामित्यर्थः॥१०८॥ ॥ ॥ ॥

२१

१० १०

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

735

ना१

स्वामिकार्यासावध्यानानां किमिति नरकप्राप्तिस्तत्राह ४ ॥ अस्तेति ॥ गुरानां त्राशीच्छाः महसां महत्तराणां महीजुषामिति पाठे महीसेवमानां तद्रूपसन्नानामिस्पर्धष्ठा विष्व

॥ अकृतस्वामिकार्याणां महोजीवितचारिणां ॥ अस्तेंद्रियवृत्तीनां दुर्गतिश्च पदे पदे ॥ १० ॥ तत्र संभावनानां च न्यकृतस्वामिकर्म्म णां ॥ भ्रसानां भरि भाजां च १ नं गुराः स्यु र्मनोरथा ४ ॥ ११ ॥ अनिष्पादितकार्यार्थाये मुखं वेक्षयं स्वहो ॥ अपत्रपाः पुरो भर्तु रैते भ्रूर्भ्रोरवतांहिम ॥ ११ ॥ नाडीणां न हि समुद्राणां न क्रमाणां च महीजुषां ॥ भूतभा - भारस्तथा भारो यथा स्वामि [illegible] हां महान् ॥ ११२ ॥ अहो पौराणिकी गाथा श्रुतास्माभिरनिंदिता ॥ तदर्थमवलंब्येह स्थास्यामः कृतनिश्चयाः ॥ ११३ ॥ आनाकचित्तपु ण्यानां परिक्षीणधनायुषां ॥ सर्वोपायविहीनानां गतिर्वाराणसी पुरी ॥ ११४ ॥ अपुण्यभारखिन्नानां पश्चात्तापमुपेयुषां ॥ विष्वगूर्ध्वगतीनां च गतिर्वाराणसी पुरी ॥ ११५ ॥ स्वामिद्रुहः कृतघ्नाश्च ये च विश्वासघातकाः ॥ एषां क्वापि गतिर्नास्ति मुक्त्वा वाराणसीं पुरीं ॥ ११६ ॥ इत्थं निश्चित्य गाथार्थं प्रमथा अवतस्थिरे ॥ अविज्ञातस्वरूपाश्च दिवोदासेन भूभुजा ॥ ११७ ॥ न तु बोधसरूपाको नितरां बु द्धिमानपि ॥ विबुधान् विबुधाकारैः स्थितानीत्रा प्रभावतः ॥ ११८ ॥ चित्रं न चित्रगुप्तोपि वेत्ति वाराणसीस्थितान् ॥ जंतूनां गणनान्ये पां सस्व

स्व०१ लोकनिवासिनां ॥ ११९ ॥ अविछिन्नप्रभावानामविछिन्नैस्तेजसां ॥ कृतलिंगप्रतिष्ठानां न तं प्राप्नोति धर्मराट् ॥ १२० ॥ इति ते प्रमथाः सर्वे प द्मोद्भव महामुने ॥ कृतलिंगार्चनाः काश्यां नाप्युर्वेति त्रासमंतरं ॥ १२१ ॥ तारकेशं महालिंगं तारकाख्यो गणोत्तमः ॥ तारकज्ञानदं पुंसां मुने या पि समर्चयेत् ॥ १२२ ॥ तारकेश्वरलिंगस्य कृत्वा भक्तिं सुनिश्चयां ॥ सुखेन तारकज्ञानं लभ्यते तैर्नरोत्तमैः ॥ १२३ ॥ निकुंभेश्वरलिंगं निकुंभगण प्रतिष्ठितं ॥ निकुंभ प्रमाणमप्यत्र दृष्ट्वा पापं न संभवेत् ॥ १२४ ॥ स्वकर्लेश्वरलिंगं परिदृश्य नरोत्तमः ॥ न दुर्गतिमवाप्नोति पुण्यमाप्नोति चोत्त मं ॥ १२५ ॥ दुर्मिचंडेश्वरं लिंगं तत्पाल्ति प्रभामयं ॥ अराध्य तत्सतां च्यां चन पापे रति भूमते ॥ १२६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कुसर्वत ४ ऊर्ध्वं च गतिर्येषां ते विष्वगूर्ध्वगतयः तेषां सर्वतोऽधूंतानामिस्पर्धष्ठा तिर्यगूर्ध्वगतीनामिति कश्चित्सारः ॥ ११९ ॥ स्वज्ञोंस्तत्र ऋद्धिरस्त्राया यास्ति मज्जा इति षट्कोत्रासैर्नि र्मितं षाट्कौशिकं ॥ छ ॥ इति श्रीरामानंदकृतायां काशीखंडटीकायां त्रिपंचाशत्तमोध्यायः ॥ ५३ ॥ ॥

तां१

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

236

वलो० १

कपर्दीशस्य लिंगस्य माहात्म्यं स्थानपूर्वकं ॥ चतुःपंचाशके ध्यायेपैशाचाख्यानमुच्यते ॥ ५४ ॥ गणपः गणमुख्यः गणकः ॥ इति पाठे स्वार्थे कः ॥ तज्जलस्पर्शमात्रेण वै मत्यं भवतीत्यत्रेति
हासमाह इति हासमिति ॥ ५ ॥ इदानीं तस्य पाशुपतयोगानुष्ठानमाह ॥ एकदेति ॥ मार्गे मार्गशीर्षे ॥ लिंगस्य दक्षि[illegible] णे भागे इत्यादीना सक्षरणं सरस्वतीरेउपविष्टः सन्दृश्य
पद्माक्षीन् इति षष्ठश्लोकगतेनोत्तमः ॥ न्यस्त भस्म कपाल इत्युत्तरश्लोकगतेन शिरसि भस्म धारणं ध्यानांगत्वायस्य कृ ध्यायन् संध्याजीव वल्लनी रैक्यानुसंधानरूप

॥ प्रभामयेश्वरं लिंगं तस्मात्तत्रापि संस्थितः ॥ प्रभा[illegible] मयेनयानेन त्रिशूल मयं देहं धाद्युत्तु धी ॥ १२७ ॥ सुकेशेश्वरमभ्यर्च्य [illegible] व्रजे २
चंडीशमीश्वरं [illegible] म[illegible] केशावनेन नरः ॥ धा[illegible] शिवमयं देहं धारयेत्पुनः पुनः ॥ १२८ ॥ विंदतीशं नरो भ्यर्च्य भीम चंडीस
११ मीपतः ॥ स त्यक्त्वा प्रचंडमप्येनो मोक्षं विंदति शाश्वतं ॥ १२९ ॥ छागलेशं महालिंगं पित्रेश्वरसमीपतः ॥ विलोक्य पशुवल्लो
पिनपापं प्रक्षतं स्यशोल ॥ १३० ॥ ॥ इति श्री स्कंदपुराणे काशीखंडे वाराणसी वर्णनं गणोत्तप्रेषणं चैपंचाशत्तमोध्यायः ५३ ॥
स्कंद उवाच ॥ ॥ कुंभसंभव वक्ष्यामि शृणोत्त्ववहितो भवान् ॥ कपर्दीशस्य लिंगस्य महामाहात्म्यमुत्तमं ॥ १ ॥ कपर्दीनाम गणपः शंभोर ॥ त्रि ४
त्यंतवल्लभः ॥ पित्रेशादुत्तरे भागे लिंगं संस्थाप्य शांभवं ॥ २ ॥ कुंडं चखानतस्याग्रे विमलोदकसंज्ञकं ॥ यस्य तोयस्य संस्पर्शादिमलो जायते ११
हा ७ नरः ॥ ३ ॥ इतिहासं प्रवक्ष्यामि तत्र [illegible] त्रैतायुगे पुरा ॥ यथा दृष्टं कुंभयोने श्रवणात्पातकापहं ॥ ४ ॥ एकः पाशुपतः श्रेष्ठो वाल्मीकिरिति
शि ८ सं[illegible] तः ॥ तपश्चचारस मुनिः कपर्दीशं समर्चयन् ॥ ५ ॥ एकदा स सहिहेमंते मार्गमासि तपोधनः ॥ स्नात्वा लनम हानीथे मध्याने
विमलोदके ॥ ६ ॥ चकार भस्मना स्नानमापादतलमस्तकं ॥ लिंगस्य दक्षिणे भागे कृतमध्याह्निकक्रियः ॥ ७ ॥ न्यस्त भस्म स्तकपा
स सुश्रसंध्यां माध्याह्निकीं स्मरन् ॥ जपन् पंचाक्षरी विद्यां ध्यायन् देवं कपर्दिनं ॥ ८ ॥

पलांकयं न्नलां आध्यामि कीं आत्मानं कार्यकारणसंघातमधिकसजातं माध्याह्निकी इति पाठे स्पष्ट एवार्थः पंचाक्षरी विद्यां नमः शिवाय इति मंत्रात्मिकी पंचात्मिका मि
तिपाठे ईशानतत्पुरुषा घोरवामदेवसद्योजातात्मिकामित्यर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंदिरं ३

संहारमार्गेणवामावर्त्तेनतदुक्तं॥अपसव्यंयतीनांतुसव्यंतुब्रह्मचारिणां॥सव्यासव्यंगृहस्थस्यशंभोर्नित्यंप्रदक्षिणमिति॥पाशुपतविशेषस्यनिर्वाणदीक्षया
दीक्षितत्वाद्यतिसमानधर्मत्वंद्रष्टव्यंयच्चिदानींविश्वेभ्यमादौसृष्टिक्रमेणयतीनांप्रदक्षिणंत्रिष्वेतत्तुविष्णुसन्निधानात्॥तदप्युक्तं॥सोमसूत्रंद्रुपंप
चपत्रंवैविष्णु[illegible]जन॥अपसव्येनकुर्वीतकुर्याद्दक्षप्रदक्षिणमितिस्वयंभुलिंगवाद॥मतुवृषंचंडवृषंचंडमथोसूत्रंपुनर्वृषं॥चंडंचसोमसूत्रंचपुन
श्चंडपुनर्वृषमिष्यते॥ननुशानिमदोषसेनयंप्रकरणेपठितत्वात्द्विनतथैवसर्वलिंगेषुतथैवविधेयम्अचरपतागेरतशानिवारसंबंधीप्रदोषः॥अतएवअ
ष्टम्यांवृषचंडागारिषिसृक्रमकारेणविश्वेभ्यरेवपीतनत्रदक्षिणाकृताशितसनत्कुमारसंहितायांदृश्यतेसोमसूत्रप्रमाणंचान्यत्रोक्तं॥तथाहि॥आसादवि
नद सारसमोसूत्रंसोमस्यसूत्रंदिशिसोमसूत्रं॥सूत्रादादिर्लंघनतोनदोषः॥सदोषमस्यंतरलंघनंलितिसप्रणाणंचा॥स्त्रीपप्रमाणसहितं॥पथास्या
त्पाठान्तरस्पष्टएवगतमसंगागातमनुक्त्वापुनःपाशुपतयोगेनवानुक्रमीतहुडुंकसेतिहुडुंकसहुडुंकारंविधायहुडुंकसेतिक्वचित॥उच्चैर्यथास्यात्तथेति

वत्संहारमार्गेणसञ्जणामप्रदक्षिणं॥हुडुंकसहुडुंकसहुडुंकसजितोच्चैः॥१०॥प्रणवपुरतःशंखापडादिस्वरभेदतः॥गीतंविधाय
सानंदंसहस्तंहस्तकान्वितं॥१०॥अंगहारैर्मनोहारिचारुमंडलसंपुतं॥सगणत्रसरस्तीरउपविष्टोमहातपाः॥११॥अट्टहासीट्टा
घोसंघोरमतीवविवृतानन॥सृक्कणकपोलास्थिनिमग्नापिंगलोचनं॥१२॥श्रीगुरुचरणेभ्योनमः॥श्रीपार्वतीपरमेश्वराय॥

ॐहुंहुंहुंहुंहुंहुंइतिप्रणवपुरःसरंवारंवारंवारत्रयमित्यर्थः॥१॥प्रणवमितिषड्जादिस्वनेनपदेननिषादादयोगृह्यंते॥हस्तकान्वितंकरचालनयुक्तंअं
गानिहारैर्विहारैर्विक्षेपैर्मनोहरंमनुष्यशीलयस्पशतन्मनोहारि॥कारुन्सेसंचरणशीलः॥पाशुपतविशेषणंमंडलसंपुतंमंडलाकारेणसंयुक्तंअंग
हारैर्मनोहारैर्मंडलसंबद्धंयस्ययथास्यात्तथागीतंविधायसरस्तीरउपविष्टइत्यर्थः॥तथाचोक्तं॥पाशुपतयोगविधौश्रीमहादेवेन॥भस्मनात्रिषव
णस्नायीनतस्मानिशयीतभनुस्नानंनिर्माल्यीलिंगधारीआयतनवासीसहितगीतनृत्यहुडुंकारणनमस्कारजनाप्युपहारेणोपतिष्ठेतमहा
देवस्यदक्षिणमूर्तिमितिव्याख्यानंचैतत्सजातमिनिपञ्चाध्यायीनेहोच्यतेग्रंथगौरवभयादितिकथंसतंतथापितत्रहेतुमाहअ
तीवविवृताननेतिर्विकृताकारत्वमाहसृक्कणेतिदंष्ट्रातिःसृक्कणोर्शखोल्लालटशनोकपोलोतदधोभागौचयस्मिनन्तत्॥आस्यंमुखंयस्य
तत्तत्निमग्नेअधःप्रविष्टेआपिंगेईषत्पीतवर्णेलोचनेयस्यतत्॥१२॥हरेरामहरेरामहरेकृष्णहरेहर॥हरेरामहरेकृष्णहरेकृष्णनमोस्तुते॥ वृंदं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

738

१२

रूक्षाणि श्मश्रूणि स्फुटितानि विदीर्णानि केशानां अग्राणि अग्रभागा यस्य तं महती स्थूला लंबा लंबायमाना दीर्घशिरोधरा ग्रीवा यस्य तं अतीवचि
पिटं नम्रं घ्राणं यस्य तं नासा शुष्कौ ओष्ठौ यस्य तं दंतुरान् अतिदंतुरः तं महादंतुरान् स्पर्धे महती दीर्घा विशाला विस्तृता मौलिर्मस्तको यस्य तं अकृष्णेण
ऊर्ध्वकेसंहता ऊर्ध्वगताः शिरोरुहाः केशा यस्य तं अलंबकर्णपालीकं लंबायमानश्रोत्रपालीभागं पिंगलानि पिंगलवर्णानि यानि श्मश्रूणि तैर्भी
षणं मलिविता दीर्घा लल्लंती चलंती जिह्वा यस्य तं असुलटा अतिविकृता टकाटिका अवदुर्घटिका या बाहिर्भागो यस्य तं स्थूले अस्थिनी यि
योस्तथाभूते जत्रुसंस्थाने कंठाधोभागो यस्य तं दीर्घपृष्ठं स्कंधद्वयं तेनोत्कटं उन्नतं निम्नं निम्ने कक्षाकुहरे बाहुमूलविवरे यस्य तं विमग्नेति काचि
त्पुस्तके पाठः ह्रस्वं खर्वं भुजद्वयं यस्य तं विरलाः परस्परसंगमनाभावे अंगुल्यो ययोस्तौ हस्तौ यस्य तं नता अधोमुखा वापी नाभिः स्थूला त्वचा नखावलि
र्यस्य नखपंक्तिर्यस्य तं ॥१६॥ विशेषणसुखबोधार्थं पाठः पांसुधूलिधूसरजतुबद्धः क्रोडो यस्य तं पृष्ठेन तलेन उदरसंबंधिनी त्वक् यस्य तं कटि

रूक्षस्फुटितकेशाग्रं महालंबशिरोधरं ॥ अतीवचिपिटघ्राणं शुष्कौष्ठमतिदंतुरं ॥१३॥ महाविशालमौलिं च प्रोर्ध्वरूक्षशिरोरुहं ॥
अलंबकर्णपालीकं पिंगश्मश्रुविभीषणं ॥१४॥ अलंबितलल्लज्जिह्वमध्युत्कटकाटिकं ॥ स्थूलास्थिजत्रुसंस्थानं दीर्घस्कंधद्वयोत्क
टं ॥१५॥ निमग्नकक्षाकुहरं सुष्ठु ह्रस्वभुजद्वयं ॥ विरलांगुलिहस्ताग्रं नतपीनतरखावलिं ॥१६॥ किंचधूपांसुलक्रोडं पृष्ठलग्नोद
रत्वचं ॥ कटीतटेन विकटं निर्मांसत्रिकबंधनं ॥१७॥ अलंबस्फिक्युगं शुष्कमुष्कमल्पमेहनं ॥ दीर्घनिर्मांसलोरुकं स्थूलजान्वस्थि
पंजरं ॥१८॥ अस्थिचर्मावशेषं च शिराजालितविग्रहं ॥ शिराजालं दीर्घजंघं स्थूलगुल्फास्थिभीषणं ॥१९॥ अतिविस्तृतपादं च

तटेन श्रोणिपूर्वभागेन विकटं भयानकं निर्मांसं मांसरहितं त्रिकसंबंधनं गुदजानुकूर्परलक्षणं यस्य तं महात्रिकबंधनं तिहडा इति
लोकप्रसिद्धं त्रिर्मांसस्य यत् अलंबरं धमानयत स्त्रिकयुगकटिपुष्पं मतेना चितं शुष्कौ तु मानुष्कौ अंडकोशौ यस्य तं अल्पमहितं शिस्नो
यस्य सचासौ तरं अनेनवस्त्रवस्तचितं दीर्घौ निर्मांसलौ मांसरहितौ ऊरू सक्थिनी यस्य तं स्वार्थे क स्थूले जानुनी यस्य अस्थ्नां पंज
रमिव पंजरं ॥ पाठांतरे अस्थिपिंजरेव बध्यते स्यास्थिबंधनः सचसत्वरं अस्थिचर्मणोरवशेषो यस्य तं शिराजालितविग्रहं नाडीभिर्व्या
प्तपुन्नद्धं शिराजालं शिराभिः अलपर्याप्तव्याप्तमभिसर्धः महाशिरालपर्याप्तयान्पादौ दीर्घजंघे यस्य तं स्थूलानियानि गुल्फास्थीनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

739

अस्थिचर्मशरीरं च रोषेणाहत्य दीर्घरात्रिं स्त्रीदिता ॥ प्रहर तद्वद्विग्रहो यस्य तं विकृतं कुत्सितं भीषणाकारं अपि तु नगाकारं विटंकमिति कश्चित् ॥ तन्मि पिसएवार्थः क्षुत्क्षामं क्षुधा क्षीणं ह्रस्वान्तिलोम रोमाणि बिडलोमरोमवनं दावदग्धवत्कृष्णाकारं वनाग्नि भस्मीकृत वृक्षसदृशं ॥ नेतिचं चलेलोच

अस्थिचर्मविशेषेण शिरातांडितविग्रहं ॥ विकटं भीषणाकारं क्षुत्क्षाममतिलोमकं ॥ दावदग्धद्रुमाकारं प्रतिचंचललोच
नं ॥ महाभयानकं निवसर्वं प्राप्तो लक्ष्य च प्रदं ॥ हृदयाकंपनं दृष्ट्वा मंचितं दृढतापसः ॥ २२ ॥ अतिदीनाननः कस्त्वमिति धैर्ये
ण दृष्टवान् ॥ किमर्थमिह संप्राप्तः कस्मात्त्वं गतिरीदृशी ॥ २३ ॥ अनुक्रोशपरो यावद्रक्षः पृच्छति वदनिष्प्रभं ॥ अस्माकं तापसानां च न भयं तु विधास्यते ॥ २४ ॥ शिवनामसहस्राणि विहरति वसति तव मर्मणः ॥ तापसो दीरितामिति तद्रक्षः प्रीतिपूर्वकं ॥
२५ ॥ निशम्य प्रांजलिः प्राह तं क्षपाचरं तपोधनं ॥ राक्षस उवाच ॥ अनुक्रोशोस्ति यदि ते शृणु वत्सापसोत्तम ॥ २६ ॥ स्ववृत्तां
तं तथा वच्मि शृणुष्वावहितः क्षणं ॥ प्रतिष्ठानाभिधानोस्ति देशो गोदावरीतटे ॥ २७ ॥ तीर्थप्रति ... क्षत्रासं ब्राह्मणस्त
हं ॥ तेन कर्मविपाकेन प्राप्तोस्मि गतिमीदृशीं ॥ २८ ॥ मरुस्थले महाघोरे तरुस्तोमविवर्जिते ॥ गतो बहुतरो कालस्तत्रमे वसतो
मुने ॥ २९ ॥ क्षुत्पीडितस्य तप्तस्य शीततापसहस्य च ॥ वर्षोपि महामेघधारासारैर्दिवानिशं ॥ ३० ॥ प्राप्तदुःखं नाल्पवति
किंचनावरणं न मे ॥ पर्वण्यदत्तदानाय हत तीर्थप्रतिग्रहाः ॥ ३१ ॥ तदेनमयोनि ... महादुःखानि बध्नती ॥ गते बहुति
थे काले मरुस्थमोनुनेमम ॥ ३२ ॥ दृष्टो ब्राह्मणदायादएकदा कृषिदागतः ॥ सूर्योदयमनुप्राप्य संध्याविधिविवर्जितः ॥
३३ ॥ स्नात्वा नत्वा पुरीं तु शौचाचमनवर्जितः ॥ मुक्तकच्छमशौचं च संध्याकर्मविवर्जितं ॥ ३४ ॥ तं दृष्ट्वा तच्छरीरे हं संक्रांतो
भोगलिप्सया ॥ सद्विजो मदभाग्यान्मे केनचिद्दोषेण सह ॥ ३५ ॥ अत्र थलोपमेन संप्राप्तः पुरीं कुर्वन्निमां मुने ॥ ततः पुरिं प्रविष्टोहं त्वदृजो मुनिसत्तम ॥ ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नेयस्यतां किं बहुनाम्नां तन्निमित्तस्यान कं भयमिव अत एव प्राणिमात्रस्य भयप्रदे गोदावरीतीर इतिप्रयाणव्यावृत्त्यर्थमुक्तं ॥ २४ ॥ वाति सतिप्रा
वरणं आकाराच्छादनं संक्रांतः प्रविष्टः पुण्यार्जितः पुरीमध्य इत्यर्थः ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अंतः १

ग्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

740

अघापीति॥ सीम्नि सीमनि सीमा प्रथमेति पाठे आतं दोपि सीमा राद्धो ज्ञष्टव्यः। अत्रेदं तात्पर्यं तच्छरीरप्रवेश मात्रात्तायान्केवलं तस्य बहिर्निर्गमने
च्छयासीन्निपापानि तिष्ठंति नतु प्रवेशोऽस्ति वाराणस्यां प्रविष्टस्य पुनस्तेषां प्रवेशासंभवात्॥ यद्वायस्कं जितेंद्रियो भूत्वा यथाविधि काश्यामा
यातितस्येव सर्वाणि पापानि नश्यंति॥ तदुक्तं॥ यस्य पादौ च हस्तौ च मनश्चैव सुसंयतं॥ विद्यातपश्च कीर्तिश्च स तीर्थफलमश्नुत इति अत्र यच्च स्यत एवं अवधि

१३ तच्छरीराद्बहिर्भूतः स्वहं पापैः समं क्षयगात्॥ प्रवेशोनास्ति चास्माकं प्रेतानां तपसांनिधेः॥ महतां पातकानां च वाराणस्यो
शिवाज्ञया॥ अघापि तानि पापानि तत्र बहिर्निर्गते च्छया॥ ७८॥ बहिरेव हि तिष्ठंति सीमामाश्रित्य साधुसत्तम॥ तच्छ्रद्धो वा
परश्चो वा सर्वेहि निर्गमिष्यति॥ ७९॥ इत्याराया स्थिता सर्वे यावद्धतपोधन॥ नाघापि संबद्दन्गच्छेत्राघाप्यात्र
प्रयातिनः॥ ८०॥ इत्यास्महे निराधारा आशापाशनियंत्रिताः॥ चित्रमद्भवनं वक्ति तपस्विं स्तान्नैराश्रय॥ ८१॥ अ
घेन पाति कल्याणं मतिमन्यधुनेव हि॥ आप्रयाणं प्रतिदिनं प्रयामः क्षुधितावयं॥ ८२॥ आहारकाम्यया क्वापि पर
नोद्धिं चिदाप्नुमः॥ संति सर्वत्र फलिनः पादपाः प्रतिकाननं॥ ८३॥ नवौ[illegible] या श्वरच्च च्छायाः संति स्मर्या पदे पदे॥ अन्या
न्यपि च भक्ष्याणि सर्वेषां सुलभान्यहो॥ ८४॥ पानान्यपि विचित्राणि संति भूयांसि सर्वतः॥ पश्यो दृग्गतान्येव दूरे दू
रे वजं सहे॥ ८५॥ दूरादधेक्षमायांत दृष्ट्वा कार्प्टिकमुने॥ तस्यांतिकमुपह्यासः क्षुधया परिपीडितः॥ ८६॥ प्रश
स्य भक्ष्यामो न मितिमलावरान्वितः॥ यावत्तं तु द्रष्टुं दृष्ट्या मितावत्तददर्नाकु डाते॥ ८७॥ शिव नाम पवित्रावाकूनि र १३ २८ २७
गाद्धिं घ्राहारिणं॥ शिवनाम स्मरणतो मदीयमपि पातकं॥ ८८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नाप्रयप्रपंच कर्म निपापमाचरन्तो वार्थलोक्सिनागतः॥ यद्वा विश्वासिकेयं काश्यां प्रविष्टैर्बहिर्निर्गंतव्यमिति काश्यां प्रविष्टैर्बहिर्निर्गच्छेदित्यादि विधेर
र्थवादोयं सौरादीस्त्यादिवते॥ ८०॥ इत्यास्मेति॥ एतदपि श्लोकद्वयं कार्प्टिकवेरवाति मन्द्वल्प नारदीयस्यं॥ सीमायां तिष्ठते देव ब्रह्महत्यासुदारुणा॥ वस्त्वमि
घ्रायम्य हं क्षेत्रे तव चक्रे गदाधरे॥ सत्यायस्तो जगन्नाथ देहि क्षेत्रे संदेवमा मम निर्गमने हत्या पुनरेव प्रवर्त्त तइति अनये वदिशनीयमिति सर्वं मनवद्यात
हि वंकथमत्र काश्यां प्रविष्टो सीत्यत आहमित्रमिति॥ ८१॥ दृग्गतानि संति पापानि प्रपानकानि प्रपानकादीनि पाकान्यपीति क्वचित्पाठः॥ तत्र पक्वानीत्येव निषया २६

741

अस्थीति १

सन्नमः सतां मध्ये श्रेष्ठः तापस इतिकाविसाठ्शारे पिङ्गावित्यन्वयः पतोरक्षेयुः ॥ापरा॥ विभूतिधारणमेव पाशुपतास्त्रं हृदागमनमात्रे दृष्टांतः ॥ अस्थिध्वजांकितं काळाद्युपल

मंदीभूतं तनतस्तेन प्रवेशं लब्धवाहं नो सीमास्थेः प्रथमे न हिंसयोद्गोचरीकृतः ॥४९॥ शिवनामस्मृतिर्येषां तान्नपश्येयमोपियत् ॥ अंतर्गेहस्य सीमांतं प्राप्तस्तेन
सहाधुना ॥५०॥ स तु कार्पटिको मध्ये प्रविष्टो हमिह स्थितः ॥ आज्ञा नैव कृमन्येहं त्वांविलोक्याधुना मुने ॥५१॥ मा मुंच रक्षपाको त्वं योनेरस्मात्सुदारुणात् ॥ इ
ति घेतवचः श्रुत्वा स कृपास्तु स्तपोधनः ॥५२॥ मनसा चिंतया मास धिङ्ज्ञायोघमान्नरान् ॥ स्वोदरंभरपः सर्वेपि पशुपक्षिमृगादयः ॥५३॥ स एव धन्यः संसारे
यः परार्थोद्यतः सदा ॥ तपसाद्य निजेनाहं प्रेतमेनमघातुरं ॥५४॥ तामेव शरणं प्राप्तमुद्धरिष्याम्यसंशयं ॥ विमृश्येति स वैवित्ते पिङ्गावंश हसन्नमः ॥५५॥
विमलोदे सरस्यस्मीन्स्नाहि रेपापनुत्तये ॥ पिङ्गावने पिङ्गाच्चत्वं तीर्थस्यास्य प्रभावतः ॥५६॥ कपट्टन्नोक्षणाद्द्य क्षणात्क्षीणं विनश्यति ॥ श्रुत्वेति स मु
नेर्वाक्यं प्रेतः प्राह प्रणम्य तं ॥५७॥ झीलात्मा झील मनसं प्रबद्ध करसंपुटः ॥ पानीयं पातुमपि नो लभेयं मुनिसत्तम ॥५८॥ स्नानस्य का कथा नाथ रक्षेयुर्ज्ज
देवताः ॥ पानस्याप्यन्नका वा त्वं जलस्पर्शोपि दुर्लभः ॥५९॥ इति प्रेतोक्तमाकर्ण्य स भस्मशीति मानभूत् ॥ उवाच वलपस्वीत जगद्धरणक्षमः ॥६०॥ गृहा
णमां विभूतिं त्वं ललाटे फलके कुरु ॥ अस्माद्विभूतिमाहात्म्यात्स्वेलक्ष्ये पिनकुत्रवित् ॥६१॥ बाधां करोति कस्यापि महापातकिनोप्यहो ॥ भाळे विभूतिधवळेवि
लोक्य यमकिंकराः ॥६२॥ पापिनोपि पलायंते सीलाः पाशुपतास्त्रतः ॥ अस्थिध्वजांकितं दृष्ट्वा पथा पाथा ज्ञळाशयं ॥६३॥ हृत्पंरे निपथा भस्मा भाळोकं यमकिंक
राः ॥ कृतभूतिंतनुत्राणं शिवमंत्रैर्नरोत्तमं ॥६४॥ नोपसर्पंति नियतमपि हिंस्राः समंततः ॥ पत्स्याविभक्तियो भस्म शिवमंत्रैर्विशेतां ॥६५॥ भोवत्स सिदाभूत्केनतं सि प२
हिंति हिंसकाः ॥ सर्वेभ्योडुरसत्वेभ्यो पतोरक्षेद हर्निशं ॥६६॥ राम ॥

ष्टितं शिवमंत्रैः नमः शिवायेत्यादिभिः भाळेवक्षसि दोर्मूले शिरस्यपि वा ॥ बोद्धव्यौ ॥ शिरोललाटवक्षःस्कंधेष्विति स्कंते ॥६६॥ श्रीराम ॥ श्रीराम श्रीराम श्रीराम ॥ ७७ ॥

लेर

८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

7452

ग्र

अग्निहोत्रादिदैवस्यकरीषादेनमिपंचकं निर्वक्ति सर्वेभ्य इतिद्वयेन॥भास्मनाज्जगत्स्त्रकाशनात्॥भस्मनेनादविद्यानकार्य्योनिस्कारणांतपांसुत्वं पापत्वं घ्नीनिखंडयति॥तिपा

रक्षत्वेषालनः प्रोक्ता विभूतिर्भूतिकारणः॥भासनाद्भस्मनाम स्यपांसुत्वं तुत्वदायनः॥६७॥पापानांक्षारणात्क्षारो बुधैरेवं निरूप्यते॥गृहीत्वाधार मध्यात्स्म

स्मप्रेतकरे पर्ययत्॥६८॥ सोप्यादरात्समादाय भाळदेशेन्यवेशयत्॥विभूतिधारणं वीक्ष्य पिंवं रौजन्ठ देवताः॥६९॥ जलावगाहनपरं वारयांबक्रिरेनतं॥स्नात्वा पीत्वा

बहिर्गच्छ धावन्तस्माज्ञ्जळाशयात्॥७०॥ नावस्वेशाश्यं मगमहिश्यं देहमवाप्स्यथ॥दिव्यमाल्यांबरधरो दिव्यगंधानुलेपनः॥७१॥ दिव्यपानं समारुह्य वर्तमाप्नोघ्

पावनं॥गच्छताले नगगनेमलपस्वीं नमस्कृतः॥७२॥ पोह्वैः प्रोवाच भगवान् मोविनास्मिन्त्वया नघ॥तस्मात्कदर्योपो निवादतीव परिनिंदितात्॥७३॥अस्यती

र्थस्य माहात्म्यादिव्यदेहमवाप्तवान्॥पिशाचमोचनं तीर्थमघारस्य समाख्यया॥७४॥अन्येषामपि पेशाच्यमिदं स्नानाद्धरिष्यति॥अस्मिन्तीर्थे महापुण्ये

स्नास्यंतीहमानवाः॥७५॥पिंडान् निर्वपिष्यंति संध्यातर्पणपूर्वकं॥देवात्पैत्र्यापमापन्नास्तेषां पितृपितामहाः॥७६॥तेपि पेशाच्य मुत्सृज्य यास्यंति परमां गतिं

॥अद्यप्रभृति ये च तुर्दश्यां मार्गमासितपोनिधे॥७७॥अत्र स्नानादिकं कार्य्यं पैशाच्यपरिमोचनं॥इमां मांवत्सरीं यात्रां ये करिष्यंति मानवाः॥७८॥तीर्थप्रतिग्रहात्ता

पात्रिंः स्मरिष्यंति ते नराः॥पिशाचमोचने स्नात्वा कपर्दीशं समर्च्यच॥७९॥कृत्वा तत्र च सदानं वनरोन्यत्रापि निर्भयः॥मा गच्छकु च लुईश्वरपाक महेश्वर सन्निधौ॥

॥८०॥स्नात्वान्यत्रापि मरणान्नपैशाच्यमवाप्नुयुः॥इत्युक्त्वा दिव्यपुरुषो प्रत्युपोन मुस्पनः॥८१॥तपोधनं महाभागो दिव्यांगनिमवाप्तवान्॥तपोधनो पितं दृष्ट्वा

महाश्चर्य्यं घयोभवः॥८२॥कपर्दीश्वरमाराध्य कालान्निर्वाणमाप्तवान्॥पिशाचमोचनं तीर्थं तदारभ्य महामुने॥८३॥वाराणस्यां परां ख्यातिमगमत्सर्वपापहृत्॥पै

सर्वदेवानामिदंवचनमब्रवीत्॥२१॥ ॥देवदेवउवाच॥ ॥शैलादेप्रविशाशुत्वंगुहाम्यत्रमनोहरा॥तदंतरेस्तिमत्सक्तोजैगीषव्यस्त
पोधनः॥२२॥महानियमवान्नंदिन्त्वगस्थिस्नायुशेषितः॥तमिहानयमद्भक्तंमद्दर्शनदृढव्रतं॥२३॥यदाप्रभृतिस्त्यक्ताकाश्यामंदर
सर्वसुंदरे॥महानियमवानेषत्वदारभ्योज्झिताशनः॥२४॥गृहाणलीलाकमलमिदंपीयूषपोषणं॥अनेनतस्यगात्राणिस्पृशसघृत
बृंहिणा॥२५॥ततोनंदीसमादायतल्लीलाकमलंविभोः॥प्रणम्यदेवदेवेशंमविशत्तद्गुहांगुहां॥२६॥नंदीदृष्ट्वाथतंतत्रधारणादृढ
मानसं॥तपोग्निपरिशुष्कांगंकमलेनसमस्पृशत्॥२७॥कपांतेवृष्टिसंयोगात्शालूरइवकोटरे॥उद्धुलाससमोगींद्रःस्पर्श
मात्रालद्ब्रतः॥२८॥अथनंदीतमादायसत्वरंमुनिपुंगवं॥देवदेवस्यपादाब्जेनमस्कृत्यन्यपातयत्॥जैगीषव्योयसंभ्रांतःपु
रतोवीक्ष्यशंकरं॥२९॥वामांगसन्निविष्टाद्रितनयंप्रणनामह॥प्रणम्यदंडवद्भूमौपरिलुठ्यसमंततः॥स्तुत्वाचिष्ट्वाभरतस्याप्रसमुनिभ्यंदुशेखरं॥३१॥

१०२५

818

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

पघैः सार्द्धचतुस्त्रिंशैः सोमं सोमकलाधरं ॥ अस्तौन्मुनिरुदाराभासगुणागुणसेदतः ॥ १ ॥ शिवाय सुखस्वरूपाय शुभात्मने मंगलस्वरूपाय शुभ आत्मा यस्मात्तस्मा इति वा । जगदानंदकंदाय जगति यः आनंदः सुखं तस्य कंदाय मूलाय कारणाय सेतत् । स एष परमः ॥

५४ ॥ जैगीषव्य उवाच ॥ ॥ नमः शिवाय शांताय सर्वज्ञाय महात्मने ॥ जगदानंदकंदाय परमानंदहेतवे ॥ ३२ ॥ अरूपाय सरूपाय नानारूपधराय च ॥ ५४

॥ विरूपाक्षाय विधये विधिविष्णुस्तुताय च ॥ ३३ ॥ स्थावराय नमस्तुभ्यं जंगमाय नमो स्तु ते ॥ सर्वात्मने नमस्तुभ्यं नमस्ते परमात्मने ॥ ३४ ॥

गा२ ॥ नमस्त्रैलोक्यकाम्याय कामांगदहनाय च ॥ नमो शेषविशेषाय नमः शेषांगदायिने ॥ ३५ ॥ श्रीकंठाय नमस्तुभ्यं विषकंठाय ते नमः ॥ वैकुंठवं

॥ घ्रपादाय नमो कुंठितशक्तये ॥ ३६ ॥ नमः शान्तर्धदेहाय विदेहाय सुदेहिने ॥ सद्यस्मरणमात्रेणादेहादेह[illegible]निवारिणे ॥ ३७ ॥ कालाय

८५ ॥ कालकालाय कालकूटविषादिने ॥ व्यालयज्ञोपवीताय व्यालभूषणधारिणे ॥ ३८ ॥ नमस्ते खंडपरशो नमः खंडेंदुधारिणे ॥ खंडिताशेष ॥

नंद एतस्यैवानंदस्या[illegible]न्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः । ३२ ॥ विधये चतुराननाय आंग्यस्वरूपायेति वा त्रैलोक्यकाम्याय त्रैलोक्यानां काम्याय स्मात्तस्मै वा काम्यल इति तथा तस्मै शेषांगदाय अनंतवलयाय शेषांगदायिने इति पाठे अनंतवरूवलयं अपि तु पाशुं शीलं यस्य स तथा तस्मै । कालकालाय कालस्यापि कालाय महत्कालाये त्यर्थः । सकालकाल इति श्रुतेः । कालमूषकभक्षक इति स्मृतेश्च । नारायण[illegible]गात्रे खंडितः कुंठितः परशुः कुठारो यस्य स तथा तत्संबोधनं हे खंडितपरशो खेटकं चर्म ॥ ३९ ॥

त ।

(819)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णेशायनमः

शा०१

जीवयतीति जीवः ईश्वरस्तस्मै क्षेत्रज्ञायेति तुभ्यं जीवायतत्वेति पाठे जीवनौषधाय जंज पुंगपापेत द्दहारिणे। आदित्यश्चैनाशं गच्छतेजं जपे कौ१
घहारणेशतिवा पाठः। जंजपकेतिपाठ द्वयेपि सएवार्थः। जंजपकोनपुनरीत्यः।।४३।। परात्परायअव्यक्तात्परात्परतत्त्वंतेकार्यस्या
र्थः। पारयतीतिपारस्तस्मै प्रकृत्योर्वधिभूताया वापरापरपरायेति। वा कार्यकारणाभ्यां भिन्नाय।।परात्परायदक्षयज्ञहेतवे [illegible]

गीर्वाणगीतनाथाय गंगाकल्लोलमालिने।। गौरीशाय गिरीशाय गिरिशाय पशुहारिणे।। चंद्रार्कचंडकिरणाय चंड-
सूर्याग्निचक्षुषे। नमस्ते चर्मवसनेन नमो दिग्वाससानापते।।४१।। जगदीशाय जीर्णाय जराजन्महराय ते।। जीवाय
ते नमस्तुभ्यं जंजपगादिहारिणे।।४२।। नमो दक्षमखघ्नाय धनुर्हस्ताय ते नमः।। त्रिनेत्राय नमस्तुभ्यं गंजो [illegible] नेत्रा-
पते नमः।।४३।। त्रिमूर्तव्यग्रहस्ताय नमस्त्रैपथगाधर।। त्रिविष्टपाधिनाथाय त्रिवेदीपठिताय च।।४४।। दारि-
ताशेषपापाय नमस्तेदीर्घदर्शने।। दूराय दुरवाप्याय दोषनिर्दलनाय च।।४५।। अर्यमायायततापाय भक्ततुष्टिप्र-
दायच।। दाक्षिणात्याय नमस्तुभ्यं देवदेवाय ते नमः।।४६।। दोषाकरकलाधारसक्तदोषागमाय च।। नमो धूर्जट-
ये तुभ्यं धत्तूरकुसुमप्रिय।।४७।। नमो पीशाय धर्माय धर्मपालपते नमः।। नीलग्रीव नमस्तुभ्यं नमस्ते नीललो-
हित।।४८।। नाममात्रस्मृतिकृतत्रैलोक्यैश्वर्यसूचक।। नमः प्रथमनाथाय पापनाशेष्टपापये।।४९।। पशु-
पाशविमोक्षाय पशूनां पतये नमः।। नामोच्चारणमात्रेण महापातकहारिणे।।५०।। पुरात्पराय पाराय परा-
त्पराय च।। नमो पारचारित्राय सुपवित्रकथाय च।।५१।। वामदेवाय वामार्धधारिणे वृषगामिने।। नमो
भर्गाय भीमाय नतभीतिहराय च।।५२।। भवनाय भवनाशाय भूतानां पतये नमः।। महादेव नमस्तुभ्यं महेश
महसांपते।।५३।। नमो मृडानीपतये नमो मृत्युंजयाय ते।। यज्ञारये नमस्तुभ्यं यज्ञेशाय प्रियाय च।।५४।।
यायजूकाय यज्ञाय यज्ञानां फलदायिने।। रुद्राय रुद्रपतये कद्रुद्रा परमात्मने।।५५।। ।। ।। ।।।

दक्षयज्ञरक्षां कर्तुं मृगरूपं धृत्वा तत्रैव पलायतो नि [illegible] रात्र वेपज्ञो वै विष्णुरिति श्रुतेः। यज्ञराजकुमाराय ज्ञेयेशाजेति वा पाठे यज्ञ-
राजोऽग्निष्टोमस्तेषाय यायजूका यज्ञकर्तारः कुत्सितं रुदन्तं द्रावयतीति कद्रुद्रस्तस्मै रमयतीति रमस्तस्मै रमापतेरिति वा पाठः।।५५।।

२

820

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लिनेस्वच्छचारिणे शाम्भवते शाम्भवते शाम्भवते शायेसेकपद्यं वाइडाप्टथ्वीपंगुः खंजः ॥५६॥ ईशकनेतिवकारेणादरः सूचितः ॥७१॥

५५ शूलिने शाम्भवे शापरमशानानवनिचारिणे ॥ शिवप्रियाय शर्वाय सर्वज्ञाय नमोस्तु ते ॥ हराय कांतिरूपाय क्षेत्र वस्त्र ४
ज्ञायक्षमाकर ॥ क्षेमाय क्षितिहर्त्रे चक्षीरगौराय ते नमः ॥५७॥ अंधकारे नमस्तुभ्यमाचतराहिताय च ॥ इग
धाराय ईशाय उपेंद्र इस्तनाय च ॥५८॥ उमाकांताय उग्राय नमस्ते कुबेरेतसे ॥ एकरूपाय चैकाय महदे
श्वर्यरूपिणे ॥५९॥ अनंतकारिणे तुभ्यमंबिकापतये नमः ॥ त्वमोंकारो वषट्कारो भूर्भुवःस्वस्त्वमेव हि ॥६०॥
ह[illegible] स्वाहा स्वयंभुदत्तोऽस्ति तत्सर्वं त्वमुमाधव ॥ स्तुतिं कर्तुं न जानामि स्तुतिकर्ता त्वमेव हि ॥६१॥ ॥
वाच्यस्त्वं वाचकस्त्वं के स्तौहि वाक्यं ते स्मरणेऽस्मि ते ॥ नान्यं वेद्मि महादेव नान्यं स्तौमि महेश्वर ॥६२॥ नान्यं ५५
नमामि गौरीश नान्यास्यामाददे शिव ॥ मूको नान्यं ग्रहणे बधिरोन्यथाश्रुतौ ॥ पंगुरन्यत्र गम २१
नेऽस्म्यं योन्यपरिवीक्षणे ॥६३॥ एक एव नमस्यानीश एकः कर्ता त्वमेव हि ॥ पाता हर्ता त्वमेवैको नानात्वं
[illegible] मृडकल्पना ॥६४॥ अतस्त्वमेव शरणं भूयो भूयः पुनः पुनः ॥ संसारसागरे मग्नं मामुद्धर महेश्व
र ॥६५॥ इति स्तुत्वा महेशानं जैगीषव्यो महामुनिः ॥ वाचंयमो भवत्तूष्णीं पुरतः स्थाणुसंनिधेः
॥६६॥ इति स्तुतिं समाकर्ण्य मुनेस्तस्य रविप्रभः ॥ उवाच वचसां नाथो वरं ब्रूहीति तं मुनिं ॥६७॥ जैगीषव्य उ
वाच ॥ ॥ इति प्रसन्नो देवेशस्ततस्तपसां निधिं ॥ भक्तानां भवनाशनो दूरदृष्टिप्रदः ॥६८॥ अपरमनसो नाथ देयाय
नाच ॥ ॥ इति प्रसन्नो देवेश ततस्तपसां निधिं ॥ तत्र सांनिध्यमस्तु ते ॥६९॥ इत्थं स उवाच ॥ ॥ जैगीषव्य महाप्राज्ञ तपोधन
मनिचारितः ॥ यन्मया स्थापितं लिंगं तत्र सांनिध्यमस्तु ते ॥ सर्वेषां योगिनां मध्ये योगाचार्यो भवान् ॥७०॥
भवतानघ ॥ तत्सर्वं ते प्रतीष्ठं वरमन्यं ददामि च ॥७१॥ योगशास्त्रं मया दत्तं तव निर्वाणसाधकं ॥ सर्वेषां योगिनां मध्ये योगाचार्यो भवान् ॥७२॥
सि१

१०८

(821)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रस्योगविधायापश्यारतंतपोधन ॥ संसेवतस्तेप्रसादान्मेयं इनिर्वाणमाप्स्यसि ॥ ७२ ॥ यथानदीषुयातांगासोमनं दीपयातथा ॥ तथाक्षिप्रसिलानोमेज
रामरणवर्जितः ॥ ७३ ॥ सेतिवृत्तानितत्यांसिनियमाः सस्नेकधा ॥ तपांसिनानासंसत्रसंतिदानान्यनेकशः ॥ ७४ ॥ श्रेयसांसाधनान्यत्रपापघ्नान्य
[illegible]सर्वथा ॥ परोहिपरमश्चैषनियमोपस्त्वयाक्तः ॥ ७५ ॥ एतोहिनियमश्चैषमोविलोक्यचमस्यते ॥ मामनालोक्य
[illegible] सजन्मान्यविंशतिः ॥ ७६ ॥ महतोनि
यद्भुक्तं तद्भुक्तेकवलंसघं ॥ ७६ ॥ असमर्थं चयेक्षुंकेपत्रपुष्पफलैरपि ॥ रतोभक्ष्यंभेदन्मुदः सजन्मान्यविंशतिः ॥ ७७ ॥ महतोनि
यमस्यास्यमेवतानुष्ठितस्यवै ॥ नाहंतिचोडशीमात्रामण्यस्यनियममायमा ॥ ७८ ॥ येतामच्चरणाभ्यासेत्वंनिकृस्थासिसर्वदा ॥
ततोनेश्रेयसीलक्ष्मीनत्रैवप्राप्स्यसिध्रुवं ॥ ७९ ॥ जेगीषव्योमद्वरनामलिंगकाश्यासुदुर्लभं ॥ त्रीणिवर्षाणिसंसेव्यलभेमोगनसंश
य ॥ ८० ॥ जेगीषव्यगुहामाप्ययोगाभ्यसननतत्परः ॥ षण्मासेनलभेत्सिद्धिंवांछितामदनुग्रहात् ॥ ८१ ॥ तवालोमिदंकिं सज
नीयप्रयत्नतः ॥ विलोमचानुहारम्याप्रसिद्धिमभ्रोसुधीः ॥ ८२ ॥ अत्रजेष्ठेश्वरक्षेत्रेवलिंगसर्व[illegible]सिद्धिदं ॥ नाचायेदघस्तस्यानि
दृष्टदृष्टसमर्चितं ॥ ८३ ॥ अत्रजेष्ठेश्वरसंतेत्रसाजभावियोगिनः ॥ कोटिकोटिफलसम्यगेकैकपीसस्पृया ॥ ८४ ॥ जेगीषव्येश्वरलिंग
गोपनीयंप्रयत्नतः ॥ कलौकलुषबुद्धीनां पुरतश्चविशेषतः ॥ ८५ ॥ क्रीडायाम्यत्रसांनिध्यमस्तिनलिंगतपोधन ॥ योगसिद्धिप्रद
नोयलाभकोभ्यः सदेवहि ॥ ८६ ॥ इदंश्रणुमहाभागजेगीषव्यापरंवर ॥ त्वयेदयत्कृतंस्तोत्रंयोगसिद्धिकरंपर ॥ ८७ ॥ महापापौघशमन
नेमहापुण्यप्रवर्द्धनं ॥ महाभीतिप्रशमनंमहाभक्तिविवर्द्धनं ॥ ८८ ॥ एतत्स्तोत्रजपात्पुंसांभसाध्यंनैवकिंचन ॥ तस्मात्सर्वप्रयत्ने
नेजपनीयंमुमुक्षुभिः ॥ ८९ ॥ इतिदत्त्वावरंतस्मैसमरारिःस्मरलोचनः ॥ ददर्शब्राह्मणांस्तत्रसनेतानक्षेत्रवासिनः ॥ ९० ॥ स्कंदउवाच ॥
निशम्याख्यानमतुलमेतत्प्राज्ञःश्रमलतः ॥ निःपापोजायतेमर्त्योनोपसर्गैःप्रबाध्यते ॥ ९१ ॥ इतिश्रीस्कंदपुराणेकाशीखंडेजेष्ठेशाख्याननाम
त्रिषष्टितमोध्यायः ॥ ६३ ॥ ६२ ॥ श्रीजैगीषव्ययोगिनः शिवविघ्नेशदर्शनं ॥ उपसर्गाआध्यात्मिंघुपुङ्गवाः ॥ इतिश्रीमदानंदकृतायांकाशीखंड

का० १

१०१

काशीखंडटी० ॥ ६३ ॥ ७ ॥ ६ ॥

त्वतुः षाङ्गतनेध्यायेकाश्यपाः सेतुप्रवासिनां ॥ पुरतः कश्यपानामस्यत्र स्वाम्यद्विजाश्च ॥ ना सतोरसर्व ब्राह्मणांस्तत्र समेतान् सेतुवासिनः ॥ इष्टं तं
ज्येष्ठेश्वरादिलिंगानि च प्रादुर्भूतानि रस्तुतः ॥ तत्र तान् दृष्ट्वा भगवान् किमेतदिति अन्यानि च कानि लिंगानि तत्र भवन्तिति पृच्छति दृष्ट्वेति भट्ट देवाः
ब्राह्मणाः उपाकृत्याः परताः इति केचित्साठः । अविरत संततं वातं स्वातं वा तेषु सर्वे ॥ स्वातः स्वावावेति च धारिव साठः ॥५॥ स्थाप्यस्थापमिहान्यैरुद्दिश्य त ३

मास्ये याव ॥ रष्यात्तदेवताः शंभुः किमाचरत् षडानन ॥ कानि कानि च लिंगानि तत्र तान्यपि च क्ष्व मे ॥१॥ ज्येष्ठस्यानेम
हागुणे देवदेवस्य दल्लभे ॥ आश्चर्यं किमभूत्तत्र तदाचक्ष्व षडानन ॥२॥ स्कंद उ० ॥ मण्डकास्य पथोपष्टिप्रभवनात दुर्वान्यह ॥
मदाद्दिश्य यादेवाग तवानघ्न तगोरवात् ॥३॥ नदा निराश्रया विप्राः सेत्रसंन्यासिनोनघाः ॥ उपाकृतास्थानिरतं मुहा क्षेत्र
प्रतिग्रहात् ॥४॥ खातखातं च दंडाग्रैर्तन्निर्दद्दीदृवृत्तयः ॥ चक्रुः पुष्करिण्यान्यांडदेवाना भिद्रामुने ॥५॥ तन्नीर्थपारतः
स्थाप्य महालिंगान्यनेकशः ॥ महेशाराधनपरास्तपश्चक्रुः श्रमं लतः ॥६॥ विरस्तिथारिणो निसनिसंरुद्राक्षधारिणः ॥
लिंगप्रजारता नि सद्भानरुद्रीयजापिनः ॥७॥ तेष्वत्रावोदेवदेवस्य पुनरामनमुने ॥ तपः कृत्वा अतितरामासुरानंद
मेदुराः ॥८॥ द्विजाः पंचसहस्राणि चक्रुस्तेविपुलं तपः ॥ दंडखातान्महातीर्थादाजग्मुर्देवदर्शने ॥९॥ तीर्थान्मंदा
किनीनाम्नो द्विजाः पाशुपतव्रताः ॥ त्रिंपकारा धनपराः समेता अयुतोन्मिताः ॥१०॥ हस्ततीर्थस्य स्नाता अयु
तत्रिशतोत्तरं ॥ शतं दुर्वाससस्तीर्थाद्देकादशशताधिकं ॥११॥ श्रीगुरुनारायणाय नमः ॥ श्रीगुरु ॥ ॥

जापिनः ॥ भासुर्वभवत् आनंदमेदुराः आनंदस्निग्धाः आनंदमेदुरा इति च पाठः ॥ अयुतोन्मिताः दशसहस्राणि एकादशशताधिकं द्वि
शताधिकसहस्रमित्यर्थः ॥११॥ ॥ ५ ॥ श्रीरामनारायण वासुदेव गोविंद वैकुंठ श्यामगपाल ॥ ५ ॥ ५ ॥

५६ ५६

११०

825

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयुतार्द्धकं पंचसहस्राणि॥आया सिधुरागतवंतः नवतिः सशतत्रयानवत्यधिकशतत्रयमित्यर्थः॥ सार्द्धशतं किंचिदधिकं शतमित्यर्थः॥ सपादशतं

मत्स्योदर्योः परोपेतुः सहस्राणि षडेव हि॥ कपालमोचनात्सप्तशतान्यभ्यागता द्विजाः॥१२॥ ऋणमोचनतस्तीर्थात्सहस्रं द्विश
ताधिकं॥ वैतरण्यामपि मुने द्विजानामयुतार्द्धकं॥१३॥ ततः पृथूदकात्कुंडात्पृथुना परिखातितात्॥ आयाता त्रिंशद्द्विजाना च
शतान्येव त्रयोदश॥१४॥ तथैवाप्सरसः कुंडान्नकारव्याघ्रतद्वयं॥ उर्वशीकुंडतः प्राप्ताः सहस्रं द्विशताधिकं॥१५॥ तथैरा
वतकुंडाच्च ब्राह्मणाः षट्शतानि च॥ गंधर्वाप्सरसः सप्तशतानि द्विशतानि च॥१६॥ हरशीर्षतीर्थादाजग्मुर्नवतिः सशत
त्रया॥ यक्षिणीकुंडतः प्राप्ताः सहस्रं सशतोत्तरं॥१७॥ लक्ष्मीतीर्थात्समाजग्मुः षोडशैव शतानि च॥ पिशाचमोचनात्सप्त
सहस्राणि द्विजोत्तमाः॥१८॥ पितृकुंडाच्छतं साग्रं घृतलीर्थाच्छतानि षट्॥ मानसाख्याच्च सरसो द्विशती सशतत्रया॥१९॥
ब्राह्मणा वास्तुकि कूपात्सहस्राणि दशैव तु॥ तथैवाष्टशतं कृष्णं ज्ञानवापीकुंडतो द्विजाः॥२०॥ काशीनाथमनुप्राप्ताः परमा
नंददायिनं॥ तथा गौतमकुंडाच्च शतानि नव चागताः॥२१॥ तीर्थाद्दुर्गतिसंहर्तुर्ब्राह्मणाः प्रतिपेदिरे॥ एकादशशतान्येव द्र
ष्टुं देवमुमापतिं॥२२॥ प्रसीसंपेदमारम्यगंगातीरस्थिताद्द्विजाः॥ आसंगमेश्वरात्तत्र परिप्राप्ताघटोद्भव॥२३॥ नवपंचाशत्सह
स्राणि तथा पंचशतानि च॥ ब्राह्मणाः पंचपंचाशद्गंगातीरात्समागताः॥२४॥ सार्द्रदूर्वाक्षतकरैः सुपुष्पफलपाणिभिः॥ सुगं
धमाल्यहस्तैश्च ब्राह्मणैर्जयवादिभिः॥२५॥ स्तुतो मंगलसूक्तैश्च प्रणतश्च पुनः पुनः॥ तेभ्यो दत्ताभयः शंभुः पप्रच्छ

वा॥१८॥ द्विशती सशतत्रया पंचशतामित्यर्थः॥ सार्द्रेति॥ ब्राह्मणैर्मंगलसूक्तैः पुनःपुनः स्तुतः प्रणतः तेभ्यो दत्ताभयः शंभुः कुशलं पप्रच्छेति द्वियेनान्वयः चतुर्भि

कूर्मसंहितायां ॥२६॥
द्वितीयोध्यायः काशीखंडे ... ॥२६॥

१११

नन्वक्षिसन्निकृष्टं वस्तु नयनगोचरं भवत्येव किमाश्चर्यं तत्राह ॥ यत् स्वरूपं श्रुतयो न विदुरिति परमार्थतः श्रुत्ययाप्यं तत्त्वेत्यर्थः ॥ आशी
विषांगदसर्पवाकुळयागर्भरिक्षाम शिर्गार्भनाराकोम शिरित्यर्थः मंत्रश्च ॥ यद्वा काशीति वर्णद्वयात्मको मंत्रः सगर्भरक्षामशिरि

ततस्ते ब्राह्मणाः प्रोचुः प्रबद्धकरसंपुटाः ॥ क्षेत्रे निवसतां नाथ सदानः कुशलोदयः ॥२७॥ विशेषतः श्रुतोऽस्माभिः साक्षान्नयनगो
चरः ॥ त्वं यत् स्वरूपं श्रुतयो न विदुः परमार्थतः ॥२८॥ सदैव कुशलं तेषां ये लक्ष्मीपराङ्मुखाः ॥ चतुर्दशापि ते लोकास्तेषामनि
त्यं पराङ्मुखाः ॥२९॥ एषां हृदि सदैवास्ते काशी काशी विषांगदः ॥ संसाराशीविषविषं न तेषां प्रभवेत् क्वचित् ॥३०॥ गर्भर
क्षामशिर्मन्त्रः काशीवर्णद्वयात्मकः ॥ यस्य कंठे सदा तिष्ठेत्तस्याकुशलता पुनः ॥३१॥ सुधां पिबति यो नित्यं काशीवर्णद्वयाभि
कां ॥ स नैर्जरीं दशां हित्वा सुधैव परिजायते ॥३२॥ श्रुतं कर्णामृतं येन काशीत्यक्षरयुग्मकं ॥ न स माकर्णयत्येव स पुनर्गर्भसंज्ञां
कथां ॥३३॥ काशीरजोपि यन्मूर्ध्नि पतेदप्यनिलाहृतं ॥ चंद्रशेखरतन्मूर्धा भवेच्चंद्रकलांकितः ॥३४॥ प्रसंगतोपि यन्नेत्रप
थ्यमानंदकाननं ॥ जातं तेत्र न जायंते नेक्षेरन् पितृकाननं ॥३५॥ गच्छता तिष्ठता वापि जाग्रता स्वपता पि वा ॥ काशीत्येष महा
मंत्रो येन जप्तः स निर्भयः ॥३६॥ येन बीजाक्षरयुगं काशीति हृदि धारितं ॥ अबीजानि भवंत्येव कर्मबीजानि तस्य वै ॥३७॥
काशीकाशीति काशीति जपतो यस्य संस्थितिः ॥ अन्यत्रापि सतस्तस्य पुरो मुक्तिः प्रकाशते ॥३८॥ क्षेममूर्तिरियं काशी क्षेम
मूर्तिर्भवानपि ॥ क्षेममूर्तिस्त्रिपथगा नान्यत् क्षेमत्रयं क्वचित् ॥३९॥ ब्राह्मणानामिति वचः क्षेत्रकांक्षिविशिष्टं हितं ॥ निशम्याग

त्यर्थः ॥ निर्जितरां जरां जरा यस्यां सा निर्जरा एव नैर्जरी त्युपलक्षणं षड्भावविकाररहितामित्यर्थः ॥ सुधैवामृतावस्थैव मोक्षावस्थैवेति यावत्
३२ ॥ बीजाक्षरयुगं तत्र ककारः कामबीजं शकारः श्रीबीजमिति विवेकव्यं ॥ क्षेत्रमुक्त्या विशेषेण विवर्धितं क्षेत्रमहिम्ना विशिष्टं हितं तत्प्रतिपादकमित्यर्थः ॥४०॥

५७

टीका॰ कां॰ स्तो॰ मिलकहः॥४०॥ ५७

११२

825

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनकेवलं तु नोषप्रो वा चेति चकारार्थः विरोधितः विरोध्यं शापितः॥ निवसतीति भिन्नं वाक्यं ममलिंग घरा वै दिक त्रिपुंड्रादि धारिणः॥ उक्तमर्थं व्यतिरेकेणाद्दर्शयति निवसंती
ति॥ न निवसंतीस्युग्रिमो नकारो ऽनुषज्यते॥ एकवाक्यत्वे अभक्तो योपि भक्तेभ्यः॥ ४९॥ एकवाक्यत्वे अभक्तेभ्योपि भक्तेभ्योपि स्थितो मुक्तिसमादिष्टो नादिति विस्तुरार्थनानंतरं

चे ४ नि २ व

गप्रोवाच च प्रसन्नात्मा चान्यायस्यं द्विजषर्भ॥ येषामीहे हरीभक्तिर्मम क्षेत्रेति पावने॥ ४२॥ जाने सत्यं मया जाताः क्षेत्रस्यास्य निषेवणात्॥ नीरजास्का
म २ ॥ वितर्षसः संसारार्णवपारगाः॥ ४३॥ वाराणस्यास्तु ये भक्तास्ते भक्ता मम नैष्ठिकं॥ जीवन्मुक्ता हि ते नूनं मोक्षलक्ष्मीकटाक्षिताः॥ ४४॥ ये श्रकाशीस्थि
॥ तो जंतुरल्पकोपि विरोधितः॥ तै वै विश्वंभरा सर्वा मया सह विरोधिता॥ ४५॥ वाराणस्यास्तु तिमपि ये निंद्यान्यानुमोदते॥ अपि ब्रह्मांडमखिलं
सं ४ ॥ क्षतं तेनानुमोदितं॥ ४६॥ निर्वैतिहि मर्त्या अस्मिन्नानंदकानने॥ म माज्ञाः करणेते वै निवसेयुरकल्मषाः॥ ४७॥ निवसंति मम क्षेत्रे मम म
॥ किं प्रकुर्वते॥ ममलिंगपरा ये तु तानेवोपदिशाम्यहं॥ ४८॥ काशी निर्वाणनगरी येषां चित्ते प्रकाशते॥ ते मस्युरः प्रकाशंते नैश्रेय
॥ स्या श्रिया युताः॥ ४९॥ मोक्षलक्ष्मीरियं काशी न ये भ्यः परिरोचते॥ स्वर्लक्ष्मीकांक्षमाणेभ्यः पतितास्तेन संशयः॥ ५०॥ काशीकांक्षमा संध
॥ णानां पुरुषार्थचतुष्टयं॥ पुरः किंकरवत्तिष्ठेन्ममानुग्रहतो द्विजाः॥ ५१॥ आनंदकानने ह्यत्र ज्वलं द्रवानप्यो स्म्यहं॥ ५२॥ वसत्व्यंसत
ष्यां १ ॥ तं कांक्षेत्वोहं प्रयत्नतः॥ जेतव्यो कश्चिकाव्यैश्चरतव्या मुक्तिरंगना॥ ५३॥ प्राप्यापि काशी दुर्बुद्धिर्योमां न परिसेवते॥ तस्य हस्तगतास्या

कानामप्यभक्तानां पुण्यपापरंतानामपि मुक्तिं दास्यामि सर्वेषां भक्तानामेव सा न हीत्यादि विष्वे श्रवचनं व्याकोपात्॥ कीदृश मुक्तिप्रसंगाच्च मोक्षलक्ष्मीरिति तेभ्यः स्व
र्लक्ष्मीकांक्षमाणेभ्यस्तु भयत्रैच्यविन्नानुयोगा ७ थ्यार्थेचतुष्टयपतिताः संसारसागरश्चितेशं यद्वा पतिताः संकरजा इत्यर्थः॥ प्राप्येति भक्त्याभावे काशीत्यागप्रसक्तेर्मुक्ते

षे २

ध्यन्याद्गति॥ यदिति येषां युष्माकं चेतसो वर्त्तेः अंतःकरणज्ञानात्॥ अहं न दूरे काशी च न दूरे इत्यर्थः॥ वर्त्तैरिति क्वचित्॥ भवतापहृदिति काशीविशेषणं विश्वेश्वरसंबोधनं वा॥

॥ चन्यामद्भक्तिवृक्षमाणो ब्राह्मणाः काशिवासिनः॥ यूयं यच्चेतसो वर्त्तेर्न दूरेहं न काशिका॥ ५५॥ दातव्यो वो वरः कोत्र व्रियतां मे यथारुचि॥ श्रेष्ठ

५२ ॥ यां सो मे यतौ यं क्षेत्र संन्यासकारिणः॥ ५६॥ इति पीत्वा महेशान मुखवक्त्री राद्विजा सुधां॥ परि तुष्टा द्विजाः सर्वे व ब्रुवुर्वरमुत्तमं॥ ५७॥ ॥७ ॥ मेरु

॥ ब्राह्मणा ऊचुः॥ ॥ उमापते महेशान सर्वज्ञ वरद प्रभो॥ काशी कदापि न त्याज्या भवता भवतापहृत्॥ ५८॥ वचनात्तव ब्राह्मणानां नः शापो

५८ ॥ मा प्रभवत्विह॥ कदाचिदपि केषांचित्काश्यां मोक्षांतरायकः॥ ५९॥ तव पादांबुजद्वंद्वे निर्द्वंद्वा भक्तिरस्तु नः॥ आ कलेवरपातं च काशी वा

॥ सोस्तु नो [illegible] निशं॥ ६०॥ किमन्येन वरेणात्र देय एष वरो हि नः॥ अपरं च प्रार्थयामोऽयं धर्म्यं नः सिद्धवरमन्यं वृणीमहे॥ ६१॥ तव प्रतिनिधिं कृत्वा स्मा

॥ भिस्तु भुक्तिकामैर्विधेयं॥ प्रतिष्ठितेषु लिंगेषु सान्निध्यं भव तोस्त्विह॥ ६२॥ श्रुत्वेति तेषां वाक्यानि तथास्त्विति पिनाकिना॥ प्रोच्चैर्न्योपि वरोदत्तो ज्ञानं व

॥ अभविष्यति॥ ६३॥ पुनः प्रोवाच देवेशो निशामयत भो द्विजाः॥ हितं वः कथयाम्यत्र तदनुष्ठीयतां कृपं॥ ६४॥ सेव्योत्तरवहा नित्यं सुलिंगमर्च्यं प्रयत्नतः॥

॥ दमो दानं दयानित्यं कर्त्तव्यं मुक्तिकांक्षिभिः॥ ६५॥ इदमेव रहस्यं च कथितं तत्र वासिनां॥ मतिः परहितारकार्थ्या वाच्यं नोद्वेगकृद्वचः॥ ६६॥ मनसापि

न कर्त्तव्यमेनो त्रिविजिगीषुणा॥ अत्र समक्षयं यस्मात्तत्तु कृतं तु कृतेतरं॥ ६७॥ अन्यत्र यत्कृतं पापं तत्काश्यां परिणश्यति॥ वाराणस्यां कृतं पापमंतर्गेहे प्र

नश्यति॥ ६८॥ अन्तर्गृहे कृतं पापं

गाच नरकावहं॥ ६९॥

५९

संबोधनं वा प्रतिनिधिः प्रतिरूपं॥ ६२॥ ६५॥ दमो दानं दयेसत्र कर्त्तव्यमितिसामान्यनिर्देशः॥ अत्रेत्येये पुण्यक्षेत्रे तदुक्तं॥ यत्र कुत्र कृतं पापं गंगातीरे विनश्यति॥ गंगातीरे कृतं पापं गंगा

यां विमुक्तिनश्यति॥ गंगायां च कृतं पापं पुण्यक्षेत्रे विनश्यति॥ पुण्य

क्षेत्रे कृतं पापं वाराणस्यां प्रणश्यति॥ अन्तर्गृहे कृतं मानां॥ ७०॥

१५५

827

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिशाचेति ।। यदि पैशाचनरकावहं पापं बहिरंतर्गेहाद्बहिः कान्यया कृतं भवेत्तेन पापेन पैशाचनरकप्राप्तिरंतर्गेहे गच्छत्येव नन्नवत्येवेत्यर्थः ।। एतेनोपपातककारस्थ्याकृतमंतर्गेहेन नश्यति न महत्पातकमिति
निरस्तं यद्यपि पिशाचनरकप्राप्तिपुरुषः कान्यया बहिर्गच्छत्येव पुनर्नयातीत्यर्थः तदा कायाय कृतं पापं कल्पकोटिभिरपि तत्पापं तेन न भुज्यते न समाप्यते तावत्कालेनापि तत्सेपं न श्यतीत्यर्थः

।। पिशाचनरकप्राप्तिर्गच्छत्येव बहिर्यदि ।। न कल्पकोटिभिः कारयाकृतं कर्मप्रभुज्यते ।। किंतु रुद्रपिशाचत्वं जायते त्वायुतत्रयं ।। ७० ।। वा ।।
।। एवंस्यास्थितो यो वै पातकेश्वरतः सदा ।। योनिं प्राप्यापि शापैश्चीवर्षाणाममुतं त्रयं ।। ७१ ।। पुनरत्रैव निवसन्नूज्ञानं प्राप्स्यत्यनुत्तमं ।। तेन ज्ञानेन
।। संप्राप्ते मोक्षं प्राप्स्यत्यनुत्तमं ।। ७२ ।। दुःकृतानि विधायेह बहिः पंचत्वमागताः ।। तेषां गतिं प्रवक्ष्यामि शृणुत द्विजसत्तमाः ।। यामाख्या
।। पेगणाः संति घोरा विलतमन्त्रयः ।। मूषायाते धमं त्यादो क्षेत्रदुःकृतकारिणः ।। ७४ ।। नयंत्यनूपप्रायां च ततः प्राचीं दुरासदां ।। वर्षाकाले ।।
।। दुःशचाराननू पातयंति महाजले ।। ७५ ।। जलूकाभिः सूपक्षाभिर्दंदंशूकैर्जलोद्भवैः ।। दुर्निवारैश्च मशकैर्दश्यते ते दिवानिशं ।। ७६ ।। ।।
।। मरुस्थले ततो ग्रीष्मे वारिवृक्षविवर्जिते ।। दिवाकरैरेकस्त्रीक्षिस्तप्यंते ते पिपासिताः ।। ७७ ।। क्लेशितास्ते गणैरुग्रैर्यातनाभिः
।। समंततः ।। इत्थं कालमसंख्यातमानीयंते तेत्विह ।। ७८ ।। ।। श्रीरामजयरामजयजयराम ।। सीतापतिरामलोकाभिराम ।

तद्दर्स्मितविपर्ययः यद्यत्रंतर्गेहे कृतपापो यदि बहिर्गच्छति तदा तस्य पिशाचनरकप्राप्तिर्भवत्येव कियत्कालं भवति तत्राहनकल्पेतितर्हि अत्र स्थितस्य का गतिस्तत्राह किंस्विति कारयामतर्गेहे किं तर्हि किंभूतं गेहकृतपानां नामिद्य
न्यनंतनु स जाये पैशाचनरकप्राप्तौ साम्यकेवले स्यादा अत्रेति ।। अत्रकारयामृतानामिति शेषः अयुतत्रयं त्रिंशत्सहस्रदिव्यवर्षाणि ७१ ।। ।। अथ रुद्रपिशाचत्वोगानंतरमेव तेन ज्ञानेन संप्राप्तेसम्यक्भोगांते तेन ज्ञानेन संप्राप्तमिति क्वचित्सा

तः ।। एवं कायाद्यग्रहतानां पापिनां गतिविधानमाह दुःकृतानीत्यारभ्य समादिशत्तः ।। वाक्तौ ।।
(नृथैव ज्ञ तपस्यामाशत पापम् ।। ७८ ।।)

न १

828

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मा देवंतस्मादिह्युपसंहारणानाविमुक्तइति अविमुक्तेमृतः किल्बिषीयत्रकुत्रापीतिशेषः। नरकं नयाति अधःपातंनप्राप्नोतिनरइतिपाठेमरणपर्यंतंनिवसन्नितिशेषः।तत्रतत्रहेतुमाहममेति।गच्छसेव

५७ मति ५ ॥निवेदयंतितेयामाकालराजांतिके पुनः।कालराजोपितान्दृष्ट्वाकर्मसंस्मार्यदुष्कृतं॥८९॥विवस्त्रान्क्षुत्तृषार्तांश्चलग्नपृष्ठोदरत्वचः।अन्येरुद्रपिशा॥
॥चैश्च सहस्रंयोजयंत्यपि॥९०॥ततोरुद्रपिशाचास्ते भैरवानुचराः सदा।स्वहंते हामम सर्वं क्षुत्तृड्लग्नतत्सम भवं।९१॥आहारंरुधिरोन्मि॥
॥श्रंतेलभंतेकदाचन॥अथसंक्षीणपापास्तेकाल भैरवदर्शनात्॥९२॥इहैवदेहिनोभूत्वामुच्यंतेतेममाज्ञया॥तस्मान्नकामयेन्नात्रवा॥
॥स्मनःकर्मणाप्यघं॥९३॥स्तुचोपधिसमास्थेयंमहालापममभीसुभिः॥नाविमुक्तेनरःकश्चिन्नरकंयातिकिल्बिषी॥९४॥ममा॥
॥नुग्रहमासाद्यगच्छसेवपरां गतिं॥अनाशकं यः कुरुते म... केरहसुव्रतः॥९५॥नतस्यपुनरावृत्तिः कल्पकोटिशतैरपि॥अशा॥
॥श्वतमिदंज्ञात्वामानुष्यंबहुकिल्बिषं॥९६॥अविमुक्तंसदासेव्यंसंसारभयमोचकं॥नान्यस्वरयामिजंतूनामुक्त्वावाराणसीपुरीं॥९७॥
॥सर्वपापप्रशमनीप्रायश्चित्तंकलौयुगे॥जन्मांतरसहस्रेषुयत्पापंसमुपार्जितं॥९८॥अविमुक्तंप्रविष्टस्यतत्सर्वंव्रजतिक्षयं॥जन्मांते॥
॥रसहस्रेषुयत्रयोगीयमाप्नुयात्॥तदिहैवपरोमोक्षोमरणादधिगम्यते॥तिर्यग्योनिगताःसत्वायेविमुक्तेकृतालयाः॥१०॥कालेनिधनं॥
॥नंप्राप्तास्तेपियांतिपरांगतिं॥अविमुक्तंनसेवंतेयेमूढास्तमसावृताः॥११॥विण्मूत्ररेतसांमध्येनिवसंतिपुनःपुनः॥अविमुक्तंसमासा॥
॥द्ययोलिंगंस्थापयेत्सुधीः॥१२॥कल्पकोटिशतैर्वापि नास्तितस्यपुनर्भवः॥ग्रहनक्षत्रताराणांकालेनपतनं ध्रुवं॥१३॥अविमु

श्र१

परांगतिमित्युक्तक्रमेणेत्यर्थः।अशनमेवाशनंनअशनंअनाशनं।अनाशकमितिक्वचित्पाठः॥९५॥।श्रीरामजयरामजयजयरामसीतापतिरामचंद्रोरघुवरामलोकाभिराम॥

५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यायजैन्यस्मिमार्गान्ज्ञातेः पाठांतरेणुपमेवार्थः तु मर्थ्ये न स्थिते हैंतोः उतस्पार्थ्यवत्तुष्टयेन स्थितेर्वसमेर्नोनं भिन्नत्वात् ॥ ब्राह्मणा हेश ब्राह्मणाः अश्मना पाषाणेन १०४ ॥ अश्मना पाषाणेनका किन्पीविंशतिव राटिकायां ॥११०

॥ब्राणांस्त्यजेजियः काश्यां समुक्तो नात्र संशयः ॥ स्त्रियः पतिव्रता याश्च मम भक्तिसमन्विताः ॥ ९५ ॥ अविमुक्ते मृता विप्रा यांति ताः परमां गतिं ॥ अश्वो॥
॥क्रमणकाले हं स्वयमेव द्विजोत्तमाः ॥ ९६ ॥ दिशामि तारकं मंत्रं देहिस्वाधेन तन्मयः ॥ मन्मना मम भक्तश्च मम सर्वार्पितक्रियाः ॥ ९७ ॥ यथा॥
॥मोक्षमवाप्नोति न तथान्यत्र कुत्रचित् ॥ मरणं निश्चितं ज्ञात्वा गौरीवा सुखरूपिणी ॥ ९८ ॥ वक्ष्मागं तु कं सर्वतनः काशीं समाश्रयेत् ॥ काशी॥
॥समाश्रियायैस्तु मनोवाक्कायकर्मभिः ॥ ९९ ॥ तानत्रनीमच्छधियो निर्वाणश्रीः समाश्रयेत् ॥ काशीस्थिते कमपियः प्रीणयेन्नायनेर्धा॥
॥नैः ॥ १०० ॥ तेन त्रैलोक्यमखिलं प्रीणितं तु मया सह ॥ यः प्रीणयति पुण्यात्मा निर्वाणनगरी नरं ॥ १०१ ॥ तु मर्थ्ये निस्थिते नित्यं ब्राह्मणाः प्रीण॥
॥यामितं ॥ दिवोदासो पि राजर्षिः काशीं धर्मेणापालयन् ॥ १०२ ॥ मद्देहो मत्पदं शान्तो यतो न तु नरा गतिः ॥ अत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना॥
॥१०३॥ [illegible]तो दिमुक्तमासाद्य नाध्यगच्छन्तपोधनं ॥ मोक्षं सुदुर्लभं ज्ञात्वा संसारं सा निर्भिषणं ॥ १०४ ॥ अश्मना चरणौ हत्वा काळमत्र प्रतिक्षपेत् ॥ ज॥
॥विमुक्तं परित्यज्य पदायास्यंति दुर्धियः ॥ १०५ ॥ हसिष्यंति तदा भूताः ह्यन्योन्यं करताडनैः ॥ प्राप्य वाराणसीं दुर्गां सिद्धक्षेत्रमनुत्तमं ॥ १०६ ॥ परितः
५२ ॥कांतु मन्य नैस्थजंतो मंतिर्स्वर्गं ॥ महादाने न वान्यत्र यत्फलं लभते नरः ॥ १०७ ॥ अविमुक्ते तु काकीन्यां दत्वा मायत्कवाप्यते ॥ एकः समर्चयेल्लिंगं त॥
॥पस्तेपे तथापरः ॥ १०८ ॥ तयोर्मध्ये तु सश्रेष्ठो यो लिंगं पूजयेदिह ॥ तीर्थानि रोगवाङ्कोटिं विधिवद्यः प्रपद्यति ॥ १०९ ॥ एकाहं यो वसेत् काश्यां काशी॥
॥वासी तयोर्वरः ॥ अन्यत्र ब्राह्मणान् तु कोटिं संभोज्य यत्फलं ॥ वाराणस्यां तदेकेन भोजितेन स्वचाप्यते ॥ ११० ॥ श्रीरामाय नमः ॥ सदाशिवाय नमः ॥

सन्निहत्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥ १११ ॥ तुलापुरुषदानेन काश्यां भिक्षा समा भवेत् ॥ ममेह परमं ज्योतिरापातालाध्यवस्थितं ॥ ११२ ॥ राम राम सदाशिवाय नमः ॥ शंकराय नमः ॥ ८ ॥

१२७

830

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ सत्रिहस्तां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥१११॥ तुलापुरुषदानेन काश्यां भिक्षासमा भवेत् ॥ मन्ये हपरमंज्योतिरापातालाद्व्यवस्थितं ॥११२॥ —

वाडवाः ब्राह्मणाः समर्चितुं ॥ ६४ ॥ इतिश्रीरामानंदकृतायां काशीखंड टीकायां चतुःषष्टितमोध्यायः ॥६४॥ पराशरेश्वरादीनां कंडुकेशादिसंयुजां ॥ पंचषष्टितमेध्याये

॥ अतीत्य सत्यलोकादिननतांलिंगरूपधृक् ॥ पृथिव्यंतेपि ये लिंगं अविमुक्तं स्मरंति ये ॥११३॥ कलुषैस्ते विमुच्यंते महद्भिरितिनिश्चितं ॥ अस्मिन्
॥ क्षेत्रे तु ये नाहं दृष्टः स्पृष्टः समर्चितः ॥११४॥ संप्राप्य तारकं ज्ञानं न स भूयो ऽभिजायते ॥ यो मा ... समभ्यर्च्य त्यक्त्वैतन्यत्र कुत्रचित् ॥११५॥
॥ जन्मांतरेपि संप्राप्य स विमुक्तो भविष्यति ॥ इत्युक्तो क्षेत्रमाहात्म्यं द्विजानामयतोहरः ॥११६॥ पश्यतामेव तेषां तु तत्रैवांतर्हितोभवत् ॥
॥ तेपि साक्षाद्विरूपाक्षं प्रत्यक्षीकृत वाडवाः ॥११७॥ प्रहृष्टमनसो त्यंतं पप्रयुः स्वस्वमाश्रमं ॥ शंभोर्वाक्यं विनिश्चित्य सर्वज्ञस्य कृपानिधेः
॥११८॥ त्यक्त्वा कार्यांतरं विप्रा लिंगान्यं च समर्चितुं ॥ स्कंद उवाच ॥ पठित्वा पाठयित्वा च रहस्याख्यानमुत्तमं ॥११९॥ श्रुत्वा कुंभपातकैर्मुक्तः
॥ शिवलोके महीयते ॥१२०॥ इतिश्री स्कंदपुराणे काशीखंडे क्षेत्ररहस्यकथनं नाम चतुःषष्टितमोध्यायः ॥६४॥ स्कंद उवाच ॥ ज्येष्ठेश्व
॥ रस्य परितो यानि लिंगानि कुंभज ॥ तानि पंचसहस्राणि मुनीनां सिद्धिदान्यपि ॥१॥ पराशरेश्वरं लिंगं ज्येष्ठेशादुत्तरे महत् ॥ तस्य दर्शनमात्रेण
॥ निर्मलं ज्ञानमाप्यते ॥२॥ तत्रैव संस्थितं लिंगं मांडव्येश्वरसंज्ञितं ॥ तस्य दर्शनाज्जातु दुर्बुद्धिं प्राप्नुयान्नरः ॥३॥ लिंगं वशीकरेशाख्यं तत्रैव तु
॥ भद्रं सदा ॥ भृगुनारायणं तत्र भक्तानां सर्वसिद्धिदं ॥४॥ जाबालीश्वरसंज्ञं वै लिंगं तत्रातिसिद्धिदं ॥ तस्य संदर्शनाज्जातु न जंतुर्दुर्गतिं व्रजेत् ॥
॥५॥ सुमंतुमुनिना श्रेष्ठस्तत्रादित्यः प्रतिष्ठितः ॥ तस्य संदर्शनाद्वक्त्रकुष्ठव्याधिः प्रशाम्यति ॥६॥ भैरवी भीषणा नाम तत्र भीषणरूपिणी ॥ क्षेत्रस्य भीषणं सर्वं

महिमावर्ण्यते द्भुतः ॥६५॥ लिंगं नंदीश्वरमिति श्रीशैलेश्वरमीति कवित् आदीश्वरमिति कविवान्यत्र ॥१४१॥ रामराम सदाराम ॥ श्री वाप नमः ॥ शंकराय नमः ॥ गुरुदेवेन मः ॥ छ

९० ९०

१२८

831

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नो१ सं३

स्मरणादिति॥स्मरणादीत्यादि नांपं चानां ए तेषां शुभ्र लिंगानां इति हि तीयेन्वयः स्वैरमिति मदे रीतु ॥शिवा रात्रि रूपा पर्वतीत्यर्थः ॥कंदुकलीलया चिक्रीडेति परितन्वीतित्यर्थः॥ किं कुर्वती उदञ्चती उर्ध्वं अंचति गच्छतीति उदंचंती नितरां अंचंतीन्यंचती उदंचंतीच ता निन्यंचंतीच उदंचन्यंचंती

न ओपजं घनेलिंगं कामबंधविमोक्षणं॥ न्भिःसंसेवितं भक्त्या पुण्यं सासिद्धिदं परं॥८॥भारद्वाजेश्वरं लिंगं लिंगमाद्धीश्वरं तथा॥ एकाग्रसंस्थितं तेभ्यस्तु पुष्प्ये सुकृतानुना॥९॥ आरुणेयं तल्लिंगं तत्रैव कुलरोद्भवं॥ तस्य लिंगस्य संजातः पराम्छिन्मवाप्नुयात्॥१०॥लिंगं वाजसनेयस्य अंतत्रास्य स्यति मनोहरं॥ तस्य दर्शनात्तु सो वाजपेयफलं भवेत्॥११॥ कण्वेश्वरं शुभं लिंगं लिंगं कात्यायनेश्वरं॥ वामदेवेश्वरं लिंगं औतथ्येश्वरमेव च॥१२॥ हारीतेश्वरसंज्ञं च लिंगं वै गालवेश्वरं॥ कुत्सलिंगं महापुण्यं तथा वै कोसुमेश्वरं॥१३॥ अग्निवर्णेश्वरं चैव नैध्रुवेश्वरमेव च॥ वत्सेश्वरं महापुण्यप्रणीदेश्वरमेव च॥१४॥ शंकुप्रस्थेश्वरं लिंगं कणादेश्वरं तथैव च॥ अन्यत्तत्र महालिंगं मांडुकायनिरूपितं॥१५॥ बाभ्रवेयेश्वरं लिंगं शालवतेश्वरं तथा॥ च्यवनेश्वरं लिंगं च शालंकायनकेश्वरं॥१६॥ कालिंदमेश्वरं लिंगं लिंगं मत्स्योदनेश्वरं॥ लिंगं कपोतवृत्तीशं केशं कुंतलेश्वरं॥१७॥ कंठेश्वरं कलशेश्वरं लिंगं तु बहुरूपार्जितं॥ तगीशामरुतेशं सागधेयेश्वरं तथा॥१८॥ जातुकर्णेश्वरं लिंगं जंबुकेश्वरमेव च॥ जातुकर्णीशं जलेशं च जालेशं जंबुकेश्वरं॥१९॥ कणादानि लिंगानि अयुतोद्यानि तंकुंड॥ स्मरणाद्दर्शनात्स्पर्शाद्दर्शनान्नमनात्स्तुतेः॥२०॥ न जातु जायते जंतोः कलुषस्य समुद्भवः॥ एतेषां शुभलिंगानां ज्येष्ठस्थाने तिपावने॥२१॥ ॥स्कंद उवाच॥ एकदा तत्र यच्च तं ज्येष्ठस्थाने महामुने॥ तदहं ते प्रवक्ष्यामि श्रृणुष्वाघविनाशनं॥२२॥ स्वैरं विहरतस्तत्र ज्येष्ठस्थाने महेशस्य॥ कंदुकेनैव चिक्रीडे शिवा कंदुकलीलया॥२३॥ उदंचंन्यंचद्दंगानां लाघवं परितन्वती॥२४॥ निश्वासामोदमुदितभ्रमरा कुलि

न्यंचंति तान्यंगानि चेति उदंचन्यंचंति गानि तेषां लाघवं लघुत्वं लालित्वमानं परितन्वंती परितः विस्तारयंतीत्यर्थः॥२४॥ निश्वासेतिा मंडानी॥ विद्लोलत्लाभ्यां दानवाभ्यां दृष्टा इति पंचमेनान्वयः॥ मृडानी विशिष्टानि श्वासेन वेषया निश्वासामोदेन लीलिते...

स्खा२

832

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६१

च्चरपद्मिर्द्वमिमल्लसन्मात्यैः स्वच्छपुटी घाता आच्छादिता कर्मयास्तासरवघट्टांस्वेद्ममाद्रुरक्तां कपालाभ्यांपत्राभ्यां सवज्रिरं बुकणैरुज्व
लादेदाप्यमानौ स्फुटतौ संचलतौ चोलांशुकपौः कंचुकपरिधानवस्त्रयोः प्रसते सुक्ष्मपौः पंधानभिच्छुद्रा एतिते पुनर्यौ तौ निर्गतस्ता पाश्रंगत्र

च्चरपद्मिमिल्लसंमाल्यस्वच्छपुटीकृष्णमिका॥ स्वेदघटकपोलपत्राभ्यांस्वेदं बुकणोज्वला॥२५॥ स्फुटचोलांशुकप
धानिर्यद्गम्भोदृतो॥ उल्लसत्कंदुकास्फालनतिशोणितकरांबुजा॥२७॥ कंदुकानुगसद्दृष्टिर्नर्तितभ्रूलता च या॥
॥ गनाकिन्नरखेलंतीदृदृशे जगदंबिका॥२८॥ अंतरिक्षचराभ्यां च दृष्टिजाभ्यां मनोहरा॥ कटाक्षिताभ्यामिव वैस
मुपस्थितमृत्युना॥२९॥ विदलोत्पलसंज्ञाभ्यां दृष्टाभ्यां चरतो विषः॥ तथो भ्राता च जगति पुरुषाभ्यांस्य दोर्बं
ला॥३०॥ देवीपरिजिहीर्षू तौ विषमेषुप्रपीडितौ॥ दिवो वेतरतुः क्षिप्रं मायास्वीकृतशंबरौ॥३१॥ च्छत्रापार
मु ६ पदां मर्त्तिमापातावंबिकांतिके॥ तावत्सहसा दुर्वृत्तावंतिकं चलमानसौ॥३२॥ सर्वज्ञेन परिज्ञातौ चांचल्या
लोचनोद्भवात्॥ कटाक्षितावदेवेन दुर्गा दुर्गारिघातिनी॥३३॥ विज्ञापनेत्रसंज्ञातु सर्वज्ञाद्दाराशीरिणा
॥ तेनैव कंदुकेनाथ युगपन्निजघानतौ॥३४॥ महाबलौ महादेव्याः कंदुकेन समाहतौ॥ परिभ्रम्य परि
भ्रम्य तौ दुष्टौ विनिपेततुः॥३५॥ वृंतादिव फलेपक्के तालादनिललोलिते॥ दंभोलिना परिहते शृंगे
इव महागिरेः॥३६॥ तौ निपात्य महादैत्यावकार्प्यकरणोद्धतौ॥ ततः परिणतिं यातौ लिंगरूपेण कंदुकः॥३७॥

भास्ता क्षिरावृत्ता व्यामुल्लसंतः ऊर्ध्वं गच्छंत्यः कंदुकस्य पः आस्फाल आस्फालनं करेपतनं तेन अतिशोणितं करांबुजं य
स्याः सा तथा कंदुकानुगाया सतीदृष्टिः तथा नर्त्तितं भ्रूलताया अंचलं प्रांता नगोपस्याः सा॥२८॥ विषमेषुः कामः वृंतो

६१

७२०

833

ऊँडुस्ते पिबनि ह्रादः शब्दो यस्य स डुंडुसिनिह्रादः एतन्नाना शतम ……तंतवो याताः शततंतवः॥४५॥ सदाशिवाय नमः श्रीरस्तु॥ ॥
कंडुकेश्वर संतं मतल्लिंगमस्वनघ्न दा॥ ज्येष्ठेश्वरसमीपे तु सर्वदुष्ट निबर्हणं॥३८॥ कंडुकेश समुत्पत्तिं यः श्रोष्यति मुदान्वितः॥ पूजयिष्यति
योऽसत्क्यानस्य दुःखस्य यं कृतः॥३९॥ कंडुकेश्वरस्य …क्तानामानवानां निरेनसां॥ योगक्षेमं सदा कुर्यादुर्वली स्वपनाशिनी॥४०॥ मडानी तस्य
लिंगस्य पूजां कुर्यात्सदैव हि॥ तत्रैव देव्यासान्निध्यं पार्वत्या सकलसिद्धिदं॥४१॥ कंडुकेशं महालिंगं काश्यां यैर्न समर्चितं॥ कुर्यंते पांसवा
नीशो स्यातां सर्वेऽक्षिनमद्रो॥४२॥ दृष्ट्व्यं च प्रयत्नेन तल्लिंगं कंडुकेश्वरं॥ सर्वोपसर्गसंघात विघातकरणं परं॥४३॥ कंडुकेश्वर नामा
पि श्रुत्वा च जिनसंततिः॥ क्षिप्रं क्षयमवाप्नोति तमः प्राप्यो समुंयथा॥४४॥ ॥स्कंद उवाच॥ ॥संश्रृणुष्व महाभाग ज्येष्ठेश्वर समीपतः
॥यद्वृत्तं तमसः क्षिप्र परमाश्चर्य कृद्भवं॥४५॥ दंडखाते महातीर्थे देवर्षि पितृतृप्तिदे॥ तप्यमानेषु विप्रेषु भिः काममपरमं तपः॥४६॥
दैत्यो डुंडुसिनिह्रादो दुष्टश्च ह्यरिमातुलः॥ देवाः कथं सुजेयाः स्युरित्युपायमचिंतयत्॥४७॥ किंबलाश्च किमाहाराः किमाधारा हि देवताः॥
विचार्य बहुशो दैत्यः स तं विज्ञाय निश्चितं॥४८॥ अवश्यम यज न्मानो हतवो च विचारतः॥ ब्राह्मणा नूतु मसह ह्ले न वा नु धर्मे ततः
॥४९॥ ततः ऋतु भुजो देवाः अत वो वेद संभवाः॥ ते वेदा ब्राह्मणाधारा स्तुतो देव बलं द्विजाः॥५०॥ निश्चितं ब्राह्मणाधाराः सर्व दे
वाः सवासवाः॥ गीर्वाणा ब्राह्मणबला …ब्राह्मणबला नात्र कार्या विचारणा॥५१॥ ब्राह्मणा यदि नष्टाः स्युर्वेदा नष्टास्ततः
स्वयं॥ आम्नाये षु प्रनष्टेषु विनष्टाः शततंतवः॥ यज्ञेषु नाशं गच्छत्सु हताहारास्ततः सुराः॥ निर्बलाः सुखजेयाः स्युर्जितेषु
त्रिदशेष्वय॥५३॥ अहमेव भविष्यामि मान्यश्च जगतीपतिः॥ आहरिष्यामि देवानामक्षयाः सर्वसंपदः॥५४॥ निर्वेक्ष्यामि
सुखान्येव राज्ये निहत कंटके॥ ……इति निश्चित्य दुर्बुद्धिः पुनश्चिंतितवान्मुने॥५५॥ द्विजान्कुसं ति भक्ष्यां सो ब्रह्मते जो तिबृंहिताः॥५६॥

836

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५४ यत्रयत्र द्विती र्थेषु यत्र यत्राश्रमेषु च। संति सर्वे प्रजन्मानस्तेमपाद्याः समंततः॥२

८८ ज्ञानांचेति। चकारेणम नाह्य योग संते॥ कीकसमस्थि। एको मुख्यः कृतो स्त्र मंत्रेण अस्त्राय फडिति मंत्ररूपेण वान्या सो येन तं कृतास्त्रमंत्रविन्यासः॥६०
४ इति यति। काशीमाश्रयसर्वर सेवकः विता अयं तु काशीमाप्यापि द्विजानवधीदिति शब्दार्थः। नत्वस्त्रवच्चमाद्यं मतिं कृत्वा कुलोचितां दुर्वेन रशिनि चयारोस्ति॥ कुसामादिरूपी प्रवेशनिर्गमं च वसन्नः॥५

श्रुताध्ययनसंपन्नास्तपोबलसमन्विताः॥५६॥ स्त्रयसां ब्राह्मणानां कृस्यानं वाराणसीस्थितः॥ नानादावुपसंहृत्य याभितीर्थां वरं ततः
॥५७॥ इति दुंदुभिनिर्ह्रादो मतिं कृत्वा कुलोचितां॥ प्राप्य पिकाशीं दुर्वृत्तो मायावी न्यवधीद्द्विजान्॥५८॥ समित्कुशान्स
मादातुं यत्र यांति द्विजोत्तमाः॥ अरण्ये तत्र तान्सर्वान्स भक्षयति दुर्मतिः॥५९॥ यथा कोपि न वेत्येवं तथा छन्नोस्स
वसुनः॥ वने वने चरोस्त्वाया दारूपी जलाशये॥६०॥ अदृश्यरूपो मायावी देवानामप्यगोचरः॥ दिवा ध्यान
परस्तिष्ठेन्मुनिवन्मुनिमध्यगः॥६१॥ प्रवेशमुटजानां च निर्गमं च व्यलोकयन्॥ यामिन्यां व्याघ्ररूपेण ब्राह्म
णान्स भक्षयन् बहून्॥६२॥ निःशब्दमेव नयति न त्यजेदपि कीकसं॥ इत्थं निपातिता विप्रास्तेन दुष्टेन भूरिशः
॥६३॥ एकदा शिवरात्रौ तु भक्त एको निजोटजे॥ सपर्यां देवदेवस्य कृत्वा ध्यानस्थितो भवत्॥६४॥
स च दुंदुभिनिर्ह्रादो दैत्येंद्रो बलदर्पितः॥ व्याघ्ररूपं समास्थाय तमादातुं मतिं दधौ॥६५॥ तं भक्तं ध्या
नमापन्नं दृढचित्तं शिवेक्षणे॥ कृतास्त्रमंत्रविन्यासं तं क्रांतुमशकन्न सः॥६६॥ ॥ ॥ ॥ ॥ ५

६२

६२

१२२

835

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्राद्धातुमिघतितंदिसति ॥ मत्तमितिरोष ॥ पं वास्यंव्याघ्रमुख्यवतकरच्चणा अप्यस्यनतुगविदारणासमर्थाइतितैंस इतिव्युसते सचतेनैवरू

अथसर्वगतः शंभुर्लीलातस्याशयंहरः ॥ देसस्यदुष्टरूपस्यवधायविदधेधियं ॥ ६१ ॥ यादृदोवेसति व्याघ्रुस्तावदाविस्फुद्रः
जगद्दशामि गिहरपतो भक्तारक्षणदक्षधी ॥ ६२ ॥ तद्दमायातमालोक्यतद्गर्वितलिंगतः ॥ दैत्यस्तेनैवरूपेणववधेतेप
रोपमः ॥ ६३ ॥ तावतमथसर्वज्ञ पावत्यप्यतिदानवः ॥ तावदायातमालोक्यतस्याप्यंत्रणपीडयत् ॥ ६४ ॥ पश्चात्यान्वथेप
चास्यमुख्यामुद्धन्यताड्यत् ॥ स्ततनमुष्टिघातेनकताभिष्पेषणेनच ॥ ६५ ॥ असर्पनरव्याघ्रोघोरोदसापीतुरयन ॥ तेन
नादेन महतासत्रवेपितमानसा ॥ ६६ ॥ तपोधनाः सगमागमुनिरीशाब्दानुसारतः ॥ तत्रेश्वरंसमालोक्यकद्दीर
तमगोम्वरं ॥ ६७ ॥ तुष्टुवुःप्रणताः सर्वेशर्वंजयजयाक्षरैः ॥ पाहित्राताजत्रातःप्रस्रुहाद्दारुणादित ॥ ६८ ॥ अनुग्रहंकु
रुष्वैशतिष्ठात्रैवजगत्पुरो ॥ अनेनैवतुरूपेणव्याघ्रेश्वरइतिनामतः ॥ ६९ ॥ कुरुरक्षां महादेवज्येष्ठस्थानस्यसर्वदा ॥
अन्येष्याप्युपसर्गेभ्योरक्षेनस्तीर्थवासिनः ॥ ७० ॥ इतिश्रुत्वावचस्तेषां देवःस्वच्छविलक्षणः ॥ तथेत्युक्त्वापुनःप्राह
शृणुध्वंद्विजपुंगवाः ॥ ७१ ॥ योमामनेनरूपेणद्रक्ष्यतिश्रद्धयान्वितः ॥ तस्योपसर्गसंघातंघातयिष्याम्यसंशयं ॥ ७२ ॥
एताभ्यांगसमभ्यर्च्ययोयातिपथिमानवः ॥ चोरव्याघ्रादिसंभूतंभयंतस्यकुतोभवेत् ॥ ७३ ॥ मत्क्षेत्रेभिद
मेतांव्याघ्रलिंगमिदंहृदि ॥ तत्रान्तःप्रविशान्तर्योजयमाप्नोतिनान्यथा ॥ ७४ ॥ इत्युक्त्वादेवदेवेशोनतसिंल्लिं
गेलयमयौ ॥ सविस्मयास्ततोविप्रायातयात्रायथागतं ॥ ७५ ॥ ६ ॥ ७ ॥ ६२ ॥ ६२ ॥

रेणव्याघ्ररूपेणअसर्पयथास्यात्तथाभरन्तशब्दंकृतवान्स्तनेनमुष्टिघातेनेतिपञ्चित ॥ ६७ ॥ प्रस्रुहान्मसोनोअस्मान् ॥ ७५ ॥ श्रीसीताराम ॥

११२

836

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंकराः यमदूताः यानादेवविशेषागवाण॥८०॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांपंचषष्ठितमोध्यायः॥६५॥ षड्भिःषष्ठितमेध्याये सर्वांश्चर्यमनोहरे। शैलेश्वरादिलिंगानां निर्णीतिर्वर्ण्यते स्फुटा॥६६॥ ॥६७॥ उमेष्ठेश्वरस्यतनीपेपारतोपा। नीसुतंत्वा।

स्कंदउवाच॥ तदाप्रभृतिकंभोधिलिंगंव्याघ्रेश्वराभिदं। ज्येष्ठेशादुत्तरेसागेदृष्टंस्पृष्टंभयापहं॥७६॥ व्याघ्रेश्वरस्ययेभक्तास्तान्योविघ्यंतिकिंकराः। पापाअपिमहाक्रूराज्यमजीवीतिवादिनः॥७७॥ पराशरेश्वरादीनां लिंगानामिहसंभवः॥ श्रुत्वानरोनलिप्येत महापातककर्दमैः॥७८॥ कंदुकेशसमुत्पत्तिंव्याघ्रेशाविर्भवंतथा॥ समाकर्ण्यनरोजातुनोपसर्गैश्चदूयते॥७९॥ उटजेश्वरात्लिंगात्तुव्याघ्रेशात्पश्चिमेस्थितं॥ मंदारभार्यमनुद्भूतेस्यास्मात्यर्चनिर्णयं॥८०॥६७॥

इतिश्रीस्कंदपुराणेकाशीखंडेपराशरेश्वरादिकंदुकेशव्याघ्रेश्वरादिलिंगसंभवोनामपंचषष्ठितमोध्यायः॥६५॥ ज्येष्ठेश॥ स्कंदउवाच॥ ज्येष्ठेश्वरपार्श्वतोलिंगान्यन्यानियानितु॥ तानितेकथयिष्यामिशृणुवातापितापन॥१॥ ज्येष्ठेशादक्षिणभागेलिंगमप्सरसेश्वरं॥ तत्रैवाप्सरसःकूपः सौभाग्योदकसंज्ञकः॥२॥ तत्कूपजलसुस्नातोकिलोकाप्सरसेश्वरं॥ नदौर्भाग्यमवाप्नोतिनारीवापुरुषोथवा॥३॥ तत्रैवकुक्कुटेश्वराख्यंलिंगंवापीसमीपगं॥ तस्यप्रजनतःप्रसादकुटुंबपरिवर्द्धते॥४॥ पितामहेश्वरं लिंगंज्येष्ठवापीतटेशुभं॥ तत्रश्राद्धंनरःकृत्वापितृणामुदयमर्पयेत्॥५॥ पितामहस्त्रानेकंसंस्तजनीयप्रयत्नतः। गदाधरेश्वरंलिंगंपितृणांप्रीतिदंसिंदं॥६॥ दिशिपुण्यजनाख्यायांलिंगज्येष्ठेश्वरान्मुने॥ वासुकीश्वरलिंगंचालिंगमर्च्यंतमततः॥७॥ तत्रवासुकिकुंडेचस्नानदानातीतेअध्यायेकानिचिदुक्तानिअवसिष्टानिस्कंदउवाच अत्रमतेज्येष्ठेति॥ अप्सरसेश्वरमिति॥ अंदतमार्ष॥८॥६७॥ श्री॥श्रीःश्रीःश्रीःश्रीः॥

२५८

महन्मुंडं यस्याः सा महामुंडा ॥ महारुंडेति क्वचित्पाठः ॥ तु सिसलोपश्चार्षः ॥ पुरूरवेश्वरमीं ॥९॥ गयः स्नातो नागपंचम्यां कुंडे वासुकिसंज्ञके ॥ न तस्य विषसंसर्गो सिमुद्भ
वः ॥९॥ कर्तव्या नागपंचम्यां यात्रा वर्षे सुतत्र वै ॥ नागाः प्रसन्ना जायंते कुले तस्यापि सर्वदा ॥१०॥ तत्कुंडासन्निमे भागे लिंगं वै तक्षकेश्वरं ॥ पूजनीयं प्रयत्नेन भक्तानां सर्वसिद्धि
दं ॥११॥ मुने तस्योत्तरे भागे कुंडं तक्षकसंज्ञितं ॥ कर्नौकक्रियस्तत्र न सर्पैरभिभूयते ॥१२॥ तत्कुंडादुत्तरे भागे क्षेत्रे क्षेमकरः सदा ॥ भक्तानां साधसंध्वंसी कपालीनाम भै

॥ रवः ॥१३॥ भैरवस्य महाक्षेत्रं तद्वै साधकसिद्धिदं ॥ तत्र संसाधिता विद्याः षण्मासात्सिद्धिमाप्नुयुः ॥१४॥ तत्र चंडी महामुंडा भक्तविघ्नापहारिणी सदा ॥
॥ बलिपूजोपहाराद्यैः पूज्या स्वाभीष्टसिद्धये ॥१५॥ तस्या यात्रां तु यः कुर्यान्महाष्टम्यां नरोत्तमः ॥ पशवः स्त्रीपुत्रपौत्राद्या लक्ष्मीवांश्चापि जायते ॥१६ ॥
॥ महामुंडाप्रतीच्यां तु चतुःसागरसंज्ञिका ॥ तस्यां स्नातो भवेत्स्नातः सागरेषु चतुर्ष्वपि ॥१९॥ महाप्रसिद्धं तत्स्थानं चतुःसागरसंज्ञितं ॥ चत्वारि त
॥ त्र लिंगानि सागरैः स्थापितानि वै ॥२०॥ तस्या वाप्याश्चतुर्दिक्षु पूजितानि हरं स्वयं ॥ तदुत्तरे महालिंगं वृषभेश्वरसंज्ञितं ॥२१॥ हरस्य वृषभेणै
॥ व स्थापितं तत्र स्वभक्तितः ॥ तस्य दर्शनतः पुंसां षण्मासात्सिद्धिरुद्भवेत् ॥२२॥ वृषेश्वरादुदीच्यां तु गंधर्वेश्वरसंज्ञितं ॥ गंधर्वकुंडं तत्प्राच्यां
॥ तत्र स्नात्वा नरोत्तमः ॥२३॥ गंधर्वेश्वरमभ्यर्च्य दत्वा दानानि शक्तितः ॥ स तर्पयित्वा देवांश्च गंधर्वैः सह मोदते ॥२४॥ कर्कोटक नामा नागोस्ति
॥ गंधर्वेश्वरपूर्वतः ॥ तत्र कर्कोटवापी तु लिंगं कर्कोटकेश्वरं ॥२५॥ तस्या वाप्यां नरः स्नात्वा कर्कोटेशं समर्च्य च ॥ कर्कोटनागमाराध्य नागलो

लोके महीयते ॥२६॥ कर्कोटनागो यैर्दृष्टस्तत्राप्यां विहितोदकैः ॥ क्रमते न विषं तेषां देहे स्थावरजंगमं ॥२७॥ कर्कोटेशात्सु ... पुंधुमारीश्वराभिधं ॥ तल्लिंगाभ्यर्चनात्सु
सां न भवेद्देहिजं भयं ॥२८॥ स्वतीर्थापुरे वेश्वरं लिंगं तदुदीच्यां व्यवस्थितं ॥ द्रष्टव्यं तत्प्रयत्नेन चतुर्वर्गफलप्रदं ॥२९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ति१ तिर्यां तु २

838

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उनेत्रकुं।

पूज्ये षष्टिसिद्धये॥ पूजिता सती इष्टसिद्धये भवतीत्यर्थः॥ कुंडने ति कचिन्निति चनाः कुर्वन्ति सुर्थः शैलेन्द्रोऽस्तिं कथयिष्यन्न भगस्त्यस्तावधानयति॥ अथेदं हिमवंतं मेनापितृणां मानसी कन्या हिमवतो भार्या तथा च हरिवंशे॥ सनातनलोकस्था नूपितृणा मुपक्रम्य एतेषां मानसी कन्या मेना नाम महागिरेः पत्नी हिमवतः श्रेष्ठा यस्यां मेना कउच्यत इति। ३५
हे प्रियस्वामिन् अष्टौ या बालीप्रभृतयः अलालीप्रमुखा मातरो दृष्टास्ता वक्ष्यति॥ ब्राह्मीलाली वैष्णवी रौद्री वाराही नारसिंहिका॥ कौमारी चापि माहेंद्री चामुंडा चैव चंडिकेति॥ स्वः स्वरूपाः

॥ दिग्गजेनार्चितं लिंगं सुप्रतीकेन तत्सुनरं॥ सुप्रतीकेश्वरं नाम्ना यशोबल विवर्द्धनं॥ ३०॥ स रक्षावसु प्रकारव्यं तत्सुरो भास ... ते महलूा तत्रस्था
॥ ला च तल्लिंगं दृष्ट्वा दिव्यं निर्लोल भेत्॥ ३१॥ तत्रैव आस्ते का महागौरी नाम्ना विजयभैरवी॥ रक्षार्थं मुचरवा रेस्थिता पूज्ये षष्टिसिद्धये॥ ३२॥
॥ वरणायास्तटे रम्ये गणौ कुंडनमुंडनौ॥ क्षेत्ररक्षां विधत्तेस्तौ विघ्नस्तंभनकारकौ॥ ३३॥ तौ दृष्ट्वैव प्रयत्नेन क्षेत्र निर्विघ्नहेतवे॥ कुंडने
॥ शं मुंडनेशं तत्र दृष्ट्वा सुखी भवेत्॥ ३४॥ स्कंद उवाच॥ ॥ इत्थं कलारे कथामेतां श्रुत्वैवावहितो भव॥ वरणायास्तटे रम्ये पयद्वृत्तं पूर्व
॥ मुत्तमं॥ ३५॥ एकादा द्रीद्रमालोक्य मेना संहृष्टमानसा॥ उमामालोक्य मेनोवाच॥ ॥ आर्यपुत्र न जानासि स्वरूपमपि कांचन॥ विवाहसमयाद्धूर्ध्वं
॥ तस्या गौर्या गिरीश्वर॥ ३७॥ सर्वेषां द्रगतिर्देवो भस्मोरगविभूषणः॥ महापितृवनावासो दिग्वासाः कास्ति संप्रति॥ ३८॥ अष्टौ या मातरो दृष्टा ब्रा
॥ ह्मीप्रभृतयः प्रिया॥ स्वः स्वस्वरूपा मन्येहं बालिकाकष्टहेतवः॥ ३९॥

स्वः सुखस्वरूपाः सुखं स्वरूपं यासां ताः सुखस्वरूपिण्य इत्यर्थः इत्यहं मन्ये अन्याया बालिकाः कन्यकास्तापित्रादीनां दुःखहेतवः दुःखदा इत्यर्थः॥ तथा च प्राक्तनं वाक्यं जातेति पकन्या
प्रथमं भातिशोकः कस्मै ददानीति महानूपितर्कः॥ दत्तायदा तदृ मनमानिष्टा कन्या पितृणां खलु दुःखहेतुरिति यद्वा॥ अष्टौ या मातरो मया दृष्टाः स्वबालिकायाः गौर्याः कष्टहेतवः इत्यहं
मन्ये तत्र हेतुः स्वस्वरूपाः भर्तीवरूपयस्यः तद्रूपधर्षितमंकरउमां नाद्रियेतेति शंकार्थः दुराधर्षा इति क्वचित्पाठः॥ ३९॥

५ उमां संस्मृत्य प्रोवाच इति सा तु पतिव्रता ५

६४

६४

१२६

839

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मल्लतायाउपमायाद्दुःखहेतुत्वंप्रकटयंती अर्थाज्जगदीश्वरं स्तौतीति अर्धेनेतस्य स्फुलिंगः कोप्यन्यो नास्तीत्यन्वयः। अनेनसजातीयभेदाभावोध्वनितः। एकस्येतिविजातीयभेदाभावः॥ अद्वितीयस्येतिस्वगतभेदाभावश्चतथा च श्रुतिः। एकमेवाद्वितीयं ब्रह्मेतिपक्षांतरेन्योनास्तीत्यत्र हेतुमाह। एकस्येति अस्मिन्पक्षे एकं पुरुषं इतिवरेकत्वादद्वस्यामुख्यार्थत्वमित्याशंक्याह अद्वितीयस्येतितत्तुदंतप्रहस्तैतस्य स्फुलिंगो जामातुर्हस्तात्तस्यनाथजामातुर्हस्तात्तस्यानेकन्यकायाश्चपिदत्ता तोज्ञात एवेसाशयः। सास्त्वत्र स्वसदित्वं यथा भवति यथा तेसकंदनमिसेतत्व उमावात्सल्यसक्ता गाः उमयावात्सल्येनखिन्नेदेवसन्नाः अवरुद्धाः सगलकराणियस्य सतथा॥ प्रेमःस्नेहः बाधते मामितिशेषः। कथंभूतं मांतदद्दुःखाग्निदूषितं तस्याउमायाः अदर्शनं स

॥तस्यैकस्यकोनेप्यन्योऽस्यद्वितीयस्यस्फुलिंगः॥ तत्तुदंतप्रहस्तैस्वक्रियतामुद्यमो विभो॥४०॥ तस्याः प्रियायाबाल्येनतदपत्यप्रियोगि॥
॥रिः॥ उवाचवचनं सास्रमुमावात्सल्यसन्नगीः॥४१॥ गिरिराजउवाच॥ अहमेवगमिष्यामितस्यामेनेगवेषणे॥ नितरांबाधतेप्रेमतदद्दु॥
॥ःखाग्निदूषितं॥४२॥ यदाप्रभृतिसागौरी निर्गता ममसद्मतः॥ मन्येमेनेतदारभ्य मनसस्थाविनिर्णयौ॥४३॥ तदालापामृतध्येयौ नेमे॥
॥शब्दगुहो प्रिये॥ प्राणेश्वरितदारभ्यस्यातांशब्दांतरग्रहौ॥४४॥ जैवातृकीयतोऽकः स्यादूरीभूतोदृशोर्मम॥ अहोजैवातृकीज्यो॥

ममसभालक्ष्मीः सघः पद्मेतिकुचिसाः सघः पुंभापिनिर्यायाविति पादे अपिशब्दात् कर्हिसौरभमितिगतिः इत्यर्थः। तदेतिहेप्रिये प्राणेश्वरितदारभ्यतस्याउमायागमनमारभ्यमेमशब्दग्रहौ श्रोत्रेशब्दांतरग्रहौनेसर्थः। इत्यन्वयः। कथंभूतौ तदालापामृतध्येयौ उमावाक्यसुधांपिबतौ अयंभावः यथापीतामृतस्यान्यपाने नेच्छा देतितद्वापीतवद्वाक्यामृतस्यममशब्दांतरेनेच्छालसतीत्यर्थः। जैवेतिअहो इतिखेदे। यतोऽकः यतोदिवसात्यस्मात् दिवसादारभ्य जैवातृकश्चंद्रः तस्य इयंजैवातृकीचंद्रज्योत्स्नातत्तुल्या गौरीममनेत्रयोर्दृशोर्दूरीभूतास्यात् अभवत्। ततोऽकः तस्मात् दिवसादारभ्य जैवातृकीज्योत्स्नाचांद्रमसीकौमुदीमांअतिदुनोतितापयतीत्यर्थः। सुखदापिचंद्रिकाउमाविश्लेषान्ममदुःखदाभातीत्यर्थः॥४६॥ ॥हरेकृष्णहरेकृष्णहरेहरहरेहरे। हरेरामहरेरामहरे

१२६

८४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मल

…नबलोदये शुभलग्नबलस्योदये सतीत्यर्थः इत्युक्ता दत्तानीत्युक्तं तत्र एकतिकानि कानि चेति कानि कानीति संख्येयं जाति विषये प्रश्नः कियंतीति संख्यानविषये तद्द्वयं दर्शयति तुलेति
तुलाः पलशतं यदाहामरः तुला स्त्रियां पलशतमिति मुक्ताफलानां मौक्तिकफलानां यदाहामरः त्वथ मौक्तिकं मुक्तेति हीरकाणां वज्राणां हीरा इति लोके प्रसिद्धानां कथंभूतानां वारितराणां वांछितः
प्राप्ततरः प्रकाशो यैस्ते वारितराः तेषां जलोद्भवत्वेन अतिशुभ्राणां श्वेतानामित्यर्थः म द्वावरि पुत रंतिस्त्वं तानि वारितराः नवलक्षाधिक तुलाशतमित्यन्वयः षडस्राणां षट्कोणानां सुतेज

॥इत्युक्त्वा दायरत्नानि वासांसि विविधानि च॥ धराधरेंद्रो निर्यातः शुभलग्नबलोदये॥४७॥ अगस्त्य उवाच॥ कानि कानि च रत्नानि कियंत्यपि च षण्मुख॥
२या ॥न्या पादाय प्रतस्थे सतानि मे ब्रूहि पृच्छतः॥४८॥ स्कंद उवाच॥ तुला मुक्ताफलानां तु कोटिद्वयपरीमिता॥ तथा वारितराणां च हीरकाणां तुला॥
॥शतं॥४९॥ नवलक्ष्याधिकं विप्र षडस्राणां सुवर्चसां॥ लक्षद्वयं विद्रूराणां तुला विमलवर्चसां॥५०॥ कोटयः पद्मरागाणां पंचविंशत्तुला मुने॥पु॥
॥ष्पराग तुला लक्षं गुणितं नवसंख्यया॥ तथा गोमेदरत्नानां तुला लक्षमिता मुने॥ इंद्रनीलमणीनां च तुलाः कोट्यर्धसंमिताः॥५२॥ गरुडोद्गारर॥
तानां ५५ ॥तुलाः प्रयुतसंमिताः॥ तु द्विद्रुमरत्नानां तुलाश्च नवकोटयः॥५३॥ अष्टांगाभरणानां च संख्या कर्तुं न शक्यते॥ वाससां च विचित्राणां कोमला॥

सामिति षडस्राणां विशेषणं॥ विद्रूराणां विशेषणं निर्मलवर्चसामिति॥५०॥ ॥पद्मरागाणां विशेषरत्नानां यदाहामरः॥ शोणरत्नं लोहितकः पद्मराग इति पुष्परागा तुला लक्षं वरत्नविशेषाणां
प लक्षशतसहस्रं गोमेदरत्नानां पीतवर्णरत्नानामित्यर्थः गरुडोद्गाररत्नानां गरुडत्मतानां हरिन्मणीनामिति यावत् यदाहामरः गारुत्मतं मरकतमश्मगर्भो हरिन्मणिरिति शुद्धवि
द्रुमरत्नानां निर्मलनिर्मलप्रवालरत्नानामित्यर्थः॥ अष्टांगाभरणानां शिरोललाटं …त्रयीवाहस्तकटिरणादि…नां॥५४॥ ॥श्रीरामजयराम…राम॥॥॥॥

६५

841

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काशीं विशिनष्टि ॥ अनेकेति त्रिभिः ॥ रत्नचिता रत्नभूमिकां यासां ता रत्नस्थानकानां नेति ॥ अनेकप्रासादमालिक्यं ज्योतिस्ततिभिस्ततं त्यागि दि
शुभ्रवरमाका रथ्यायातां सौधानामुपरि अग्रे विविधा ये स्वर्णकलशास्तैरुज्ज्वलं अतिशयकाशीनाम्ना ने दिशां शुरंजयस्यां ता जयंती वैजयंती
नां तत्तन्नाम पताकाविशेषाणां निकरैः ह्यत्वा त्रिदिवस्थलमिव तिलुभोपमा ॥ महासिद्ध्यष्टकमणिमादि प्रमादि वा सर्वफलानामवनपाल
नयेषु तेर्वनैः सर्वफलसमृद्धेरित्यर्थः ॥ तटेषूच्चप्रदेशेषु गंगातीरेषु वा ॥५६॥ उच्छलत्प्रस्फुरत चारुसुंदरं शोचिर्दीप्तिर्येषां तेषां जटिलितं संवलि

सर्वाण्यपि समादाय प्रतस्थे भूधरेश्वरः ॥ आगत्य वरुणातीरं दूरात्काशीं व्यलोकयत् ॥५६॥ अनेकरत्ननिचयैः रत्नचिताखिलभूमिका ॥
नानाप्रासादमालिक्य ज्योतिःस्रोतितताम्बरां ॥५७॥ सौधाग्रविविधस्वर्णकलशोच्चलदिङ्मुखां ॥ जयंतीवैजयंतीनां निकरैस्त्रिदिवस्थ
ळीं ॥५८॥ महासिद्ध्यष्टकस्यापि क्रीडोपवनमद्भुतं ॥ जितकल्पद्रुमवनावनैः सर्वफलावनैः ॥५९॥ इति काशीसमृद्धिं स विलोक्याभूद्वि
लज्जितः ॥ उवाच च मनस्येव भूधरेंद्रः स्ववचः ॥६०॥ प्रासादेषु प्रतोलीषु प्राकारेषु स्थलेषु च ॥ गोपुरेषु विचित्रेषु कपाटेषु तटेष्वपि ॥
६१॥ मणिमालिक्यरत्नानां मुच्छलद्भासुरोचिषां ॥ ज्योतिर्जालैर्जटिलितं यद्धेदमवलोक्यते ॥६२॥ ह्यवाक्स्योरंत [illegible] राळं तथ्येति समवे
म्यहं ॥ ईदृक्संपत्तिसंभारः कुबेरस्यापि नो गृहे ॥६३॥ अपि वैकुंठभवने नेतरस्येह का कथा ॥ इति यावद्गिरींद्रः सोसौ भावयति चेतसि ॥
६४॥ तावत्कार्पटिकः कश्चित्तल्लोचनपथं गतः ॥ आहूय बहुमानं तमपृच्छदचलेश्वरः ॥६५॥ हिमवानुवाच ॥ ॥ हंहो कार्पटिक
हि श्रेष्ठ अध्यास्वेतदिहासनं ॥ स्वपुरोदंतमाख्याहि किमपूर्वमिहाध्वग ॥६६॥ कोत्र संप्रत्यधिष्ठाता किमधिष्ठात्चेष्टितं ॥ यदि जाना
सि तत्सर्वमिति च ध्वमभाषितः ॥६७॥ सोपि कार्पटिकस्तस्य गिरिराजस्य भाषितं ॥ समाकर्ण्य समाचष्टुं समुपचक्रमे ॥६८॥ ध्य॥

तं अपि वैकुंठभवने तत्रापि न इतरस्य भवने का कथा तादृक्संपद्भिर्नास्तीति किं वक्तव्यमित्यर्थः ॥ कार्पटिकः काषायवस्त्रधारी सघूद्रविशेषः ॥ हंहो
इत्यव्ययं संबोधने ॥ अध्यास्व अधितिष्ठ स्वपुरोदंतं स्वस्य सम्यक् पुरोद्भवजनश्रुतिरित्यर्थः ॥ स्वपुरमविमुक्तं तस्योदंतं हत्तांतमाख्याहि कि
थय रहस्व पुरे अपूर्वं च किं तत्राप्यस्तीत्यर्थः ॥ किमपूर्वमिति स्वपुरे त्वस्य अखिलसमर्थ इति वा ॥ समुपचक्रमे समुपक्रांतवान् ॥६८॥ ध्य॥

१२९

842

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहानीतिमंदराज्जगन्नाथे विश्वनाथे समायाते सति पंचषाणि पंचषाणि इवात्र अहानि दिनान्येवव्यतिक्रांतानि इतीदृशीतानिइतिद्वयोरन्वयः॥ ननुब्रह्मणे वरदानाद्दिवोदासे धर्मेण राज्यं प्रशासति सति कथं का स्या विश्वेशागमनं तत्राह॥ दिवोदासे गते दिवी ति॥ यत्त्वं छं को त्र स प्रत्यधिष्ठातेति तत्रोत्तरमाह त्वमेवा इति वै शब्दः प्रसिद्धिद्योतनार्थः अत्र कारयान्तदुपरि छिन्नस्य कथं जगदधिष्ठातृत्वं तत्राह॥ सर्वग इति॥ व्यापक इत्यर्थः॥ सर्वदृक्तिति पृथक् वाक्यं अतः सर्वग इत्यनेन न नपोन रुत्त्यं सर्वदृ इति पाठे सर्वस्वरूप इत्यर्थः॥ ब्रह्मैवेदं सर्वमित्या

६६॥

कार्पटिक उवाच॥ ॥ आचक्षे शृणु राजेंद्र यत्पृष्टो स्मि त्वया रविर्वे॥ अहानि पंचषान्येव व्यतिक्रांतानि मानद॥ ६९॥ समा
याते जगन्नाथे पर्वतेंद्रसुतापतौ॥ सुंदरान्मंदराद्द्देर्दिवोदासे गते दिवि॥ ७०॥ त्वयाज्जगदधिष्ठाता सोधिष्ठातात्र स
र्वगः॥ सर्वदृक् सर्वदः सर्वः कथं न ज्ञायते विभो॥ ७१॥ मन्ये दृषत्स्वरूपोसि दृषदोपि कठोरधीः॥ यतो विश्वेश्वरं का
र्यां न वेत्सि गिरिजापतिं॥ ७२॥ स्वभावकठिनास्मापि सर्वर्हिमहान्गिरिः॥ प्राप्याधिकसुतादानाद्योधि नो द्विश्वनाय
कं॥ ७३॥ बिभ्रत्सहजकाठिन्यं जातो गौरीगुरुर्गुरुः॥ शंभुं प्रपूज्य सुतया स्व जा विश्वगुरोरपि॥ ७४॥ चेष्टितं तस्य को
वेद वेदवेद्य॥स्य चेरिलुः॥ मनागिति च ज्ञानं हंत च्चेष्टितमिदं जगत्॥ ७५॥ अधिष्ठातामयाख्यातस्त्वाद्याधिष्ठातृचे
ष्टितं॥ अपूर्वं यत्त्वया पृष्टं तदाख्याहि च तच्छृणु॥ ७६॥ श्रुक्ते ज्येष्ठेश्वरस्थाने सांप्रतं स उमापतिः॥ कांचीं प्राप्य मुदा तिष्ठ
हिरिवाजां गजासरवः॥ ७७॥ ७॥

दिश्रुतेः॥ दृषत्स्वरूपः पाषाणतुल्यः दृषदुपमापितव न नून मित्याह॥ दृषदोपीति॥ तत्र हेतुमाह यत इति॥ ७२॥ एतद्विवृणोति स्वभाव
कठिनास्मेति द्वाभ्यां॥ अधिनोल॥ अप्रीयत तोषयामासेत्यर्थः॥ विश्वेशप्रीणनफलमाह॥ बिभ्रदिति स्त्रजा शिरोधार्य्यया॥ विश्वगुरो
र्ब्रह्मणः यत्पृष्टं किमधिष्ठातृचेष्टितमिति तत्रोत्तरमाह चेष्टितमिति॥ च एवार्थे वेदैस्तैरेकवेद्यस्येत्यर्थः॥ यत्पृष्टं किमपूर्वमिहाधिष्ठातेति तिष्ठे

६६

निष्ठतिमिरिरोगो नामवर्गीस्सत्वनीतायासरवस्य रसद्वियाकरस्य
सत्वेया॥ ७१॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥

१३०

843

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे२

हर्षहेतुमाह उमानाम्नेनमिति द्वाभ्यां राजन्निति विश्वेश्वरः श्रूयः प्रासादो विश्वकर्मणा निर्मापितस्तेन तत्र पूर्वं भूमिति दीगीयेनान्वयः किंभूतः सुशोभनं निर्म्माणं यस्य कर्यं भूतस्य विश्वे
श्वरस्य जन्मनिर्वाणदायिनः प्राणिमात्रस्य मोक्षदायिनः समासनिविष्टस्यापि विशेषणं क्वचित् संज्ञपूर्वं तेनुमाह नकर्णाभ्यामिति प्रासादं विशिनष्टि पत्रेत्यादि कथं तत्वेश्य नंशाते

।। स्कंद उवाच ।। यदा यदा मगिरिजा मृडनाम्नाक्षरामृतं ।। आविष्करोति पथिकोऽडीन्दोः हृष्येत्तदा तदा ।। ७८ ।। उमा नामामृतं पीतं येनेह जगतीतले ।। न जातु जन
।। नीस्तन्यमपि बेत्स कुंभसंभव ।। ७९ ।। उमेति द्व्यक्षरं मंत्रं योनिर्हृदा मनुस्मरेत् ।। न स्मरेच्चित्रगुप्तस्तं कृतपापमपि द्विज ।। ८० ।। पुनः शुश्राव हिमवान्रत्त
को ।। ष्टः कार्पटिकोदितं ।। ।। कार्पटिक उवाच ।। राजन्विश्वेश्वरार्थं यः प्रासादो विश्वकर्मणा ।। ८१ ।। निर्मीयते निर्माणो जन्मनिर्वाणदायिनः ।। तदपूर्वं नक
।। र्णाभ्यामथाकर्णितवाहनं ।। ८२ ।। यत्रातिमित्रतेजोभिः शलाकाभिः समंततः ।। भ्रमिमाणिक्यरत्नानां प्रासादेऽस्मिन्नयः कृताः ।। ८३ ।। एकैकं भुवनं भ
।। र्तुमष्टाष्टाविवकल्पिताः ।। वल्लुर्दशसुधा शोभा विष्टपेषु समंततः ।। ८४ ।। तस्मिन्विमाने सा स्त्री हृष्टा तत्कोटिगुणोत्तरा ।। चंद्रकांतमणीनां च स्तंभाधार
।। शिलाश्रयाः ।। ८५ ।। चित्ररत्नमयैस्तंभैः संभिन्ना सत्सभा परा ।। पद्मरागेंद्रनीलानां शालीनाः शालभंजिकाः ।। ८६ ।। नीराजयंत्यहोरात्रं यत्र रत्नप्रदीप
।। कैः ।। स्फुरत्स्फटिकनिर्माणस्फुरत्पद्मशिलातले ।। ८७ ।। अनेकरत्नरूपाणि विविधानि समंततः ।। आरक्तपीतमांजिष्ठनीलकिर्मीरवर्णकैः ।। ८८ ।।
।। विन्यस्तानीव भासंते चित्रे चित्रकृतापनः ।। दृष्टापिच्छिलविलोक्यं तेमाणिक्यस्तंभ राजपः ।। ८९ ।। रामराम राम सदाशिवाय नमः ।। ७७७७७ ।।

नेनयं थेन यत्र प्रासादे इत्यन्वयः मित्रं सूर्यमतिक्रांतानि तेषां शलाकानां तेजोभिः ८३ अष्टाष्टाविति पृथक्पदे विष्टपेषु भुवनेषु विमाने प्रासादे स्तंभिनाः श्राकांताः
तस्मिन्भा[?]रास्तेषां चित्ररत्नमयस्तंभानां प्रभावाविभ्रंतीति तत्र पालसभा न राइति किविधा शालीनाः शोभनाः शालभंजिकाः पुत्तलिकाः नीराजयंति नीराजनां कुर्वंति ।। किर्मी
रं कल्माषं चित्रकृता चित्रकारेण दृष्टापिच्छिनेन दृष्टप्रतिबंधकाः पनः यत्र प्रासादे यत्राविमुक्ते इति पाठे पूर्वं पतो यत्र प्रासाद इति व्याख्येयं ।। ८९ ।। श्रीरामपनमः ।। ७७७

१३१।।

844

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नोच्चय[illegible]सम्भृतान्।।पौलस्त्यः कुबेरः स्वाडिकूटतः शोभनाद्विरस्त्रं गतः चित्रकूटइतिकवित्सकोटिहाटककूटानिअसंख्यातस्वर्णराशीनआनयामास कारयामासेनिव्क
न् यथासंख्यानि समानि[illegible]यथावत्असंख्यानीत्यर्थः।।९५।।[illegible]।।कामदुघा कामधेनुः गंधसाररसैश्चंदनरसैः कर्पूररंभाः कर्पूरोत्पा

६७ ।।यत्राविमुक्तेरस्वसेवेमोक्षलक्ष्मीपुराइव।।रत्नाकरेषुपःसर्वेष्योगणारत्नोच्चयान्बहून्।।९०।।राजेशीश्वकुः समानीययत्राडिशिखरोपमान्।।यत्र ६७ ८४
।।पातालतलतोनागानांकोशवेश्मतः।।९१।।गणोर्मणिगणाः सर्वसमोहृत्यगिरीक्षलाः।।शिवसक्तः स्वयं यत्रपौलस्त्यः स्वाडिकूटतः।।९१।।
।।कोटिहाटककूटानिकारयामासराक्षसैः।।प्रासादनिर्मितिकृत्वा भक्तादीपालरस्थिताः।।९२।।माणिक्यानिसमाज[illegible]कुर्पया संख्यान्य
।।होन्नृप।।चिंतामणिः स्वयंतत्रकर्मणोविश्वकर्मणो।।९३।।विश्राणयेद्दहोराज्ञेविविधान्चिंतितान्मणीन्।।नानावर्णपताकाश्चयत्रकल्पम
।।हीरुहः।।अनल्पाः कल्पयन्त्येवनित्यंकिसमन्वितः।।९५।।अद्ययोपत्रसततंदधिक्षीरेक्षुमर्पिषां।।पंचामृतानांस्नपनैः स्नपयंतिदिनेदि
।।ने।।९६।।यत्रकामदुघानित्यंस्नापयेन्मधुधारया।।स्वदुग्धयास्वयंयत्नात्याविश्वेशंलिंगरूपिणं।।९७।।गंधसाररसैर्यत्रवसेवतेमलयावतः।।क
।।र्पूररंभाकर्पूरघरैर्यत्न्यानिषेवते।।९८।।इत्याद्यपूर्वयत्रास्तिप्रत्यहंसकरालये।।कृपांतत्वमुमाकांतनयेसिकठिनाशया।।९९।।इतितस्यसमू
।।द्भितांहृष्ट्वाजामातुरद्विराट्।।नृपयापरिभूतोभून्नितरांकुभसंभव।।तस्मैकार्पटिकायाथसहत्वापारितोषिकं।।ततश्चिंतापरोजातोऽद्रिराट्
।।कार्पटिकेगते।।१०१।।उवाचेतिमनस्येवविस्मयोत्फुल्ललोचनः।।अहोमदद्रिदंजातंमत्पापाद्याविरामशाकृ।।१०२।।यावत्संपन्निसंभाराः स्क
।।यतेदृश्यतेत्रवे।।जामातुरत्रसदनेलीलाविजगतीपतेः।।१०३।।हेरामहेरामरामरामहरेहरे।।रामपनमः।।छछछछछ।।छछछछछ।।

